KÂVYAMÂLÂ. 80.

THE
PRÂCHÎNA-LEKHA-MÂLÂ
OR
A COLLECTION OF
Ancient Historical Records.

Vol. III.

EDITED BY

PAṆḌIT BHAVADATTA S'ÂSTRÎ,

Son of

MAHÂMAHOPÂDYÂYA PAṆḌIT S'IVADATTA

AND

KÂS'ÎNÂTH PÂṆḌURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S 'NIRṆAYA-SÂGARA' PRESS.

BOMBAY.

1903.

Price 1 Rupee.

काव्यमाला. ८०.

प्राचीनलेखमाला।

(तृतीयो भागः।)

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसादद्वारककेदारनाथ-
कृपाङ्गीकृतशोधनकर्मणा
महामहोपाध्यायपण्डितशिवदत्तशर्मतनूजपण्डितभवदत्तशास्त्रिणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा च
संशोधितः।

स च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः।

१९०३

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपते-
रेवाधिकारः।)

मूल्यमेको रूप्यकः।

प्राचीनलेखमालाया अनुक्रमणी ।

प्राचीनलेखमाला ।

(१२५)

दूधपानीघाटे श्रीमदुदयमानराज्यप्राप्तिप्रशस्तिलेखः[1]।

ओम् ।

श्रीरात्मदेहप्रतिमासहस्रमालोक्य भोगी[न्द्रफ]णामणिस्थम् ।
ई[र्ष्याकु]ला करतलेन हरेः प्रहा[र] मुल्ला[सय]न्ती भवतु [श्रि]ये वः ॥

बभूव पूर्वं **मगधाधिराजः** श्री**आदिसिङ्घो**(सिंहो)ऽरिगजैकसिङ्घः(सिंहः) ।
पराक्रमैर्यः प्रथितोऽद्वितीयः श्रीमज्ज[रासं]ध इव द्वितीयः ॥

अस्यां **भ्र[म]रशाल्मल्यां छिङ्गलायां** [त]थैव च ।
नभूतीष[ण्ड]के चापि बभूवाधिपतिः पुरा ॥
अथ कस्मिंश्चि[त्स]मये वणिजो भ्रातरस्त्रयः ।
तामलिप्ति[म]योध्याया ययुः पूर्वं वणिज्यया ॥
भूयः प्रतिनिवृत्तास्ते स्वमावासं यियासवः ।
प्रयोजनेन केनापि चिरं चक्रुरिह स्थितिम् ॥
सुवर्णमणिमाणिक्यमुक्ताप्रभृति यैर्धनम् ।
वित्तपस्पर्धयेवासीदपर्यन्तमुपार्जितम् ॥
सर्वभूताश्रयाः सत्यदयादाक्षिण्यशालिनः ।
स्रष्टार इव लोकस्य त्रयः क्षितिमुपागताः ॥

---

१. लेखोऽयं **गयाक्षेत्र**तो दक्षिणस्यां दिशि **हजारीबागप्रान्ते दमदमा**पार्श्वे **दूधपानी**घाटे A. Cunningham महाशयेनोपलब्धः Professor F. Kielhorn, Ph. D., C. I. E. महाशयेन व्याख्यातः. स्पष्टतया कालनिश्चयो न जातः.

कैलासः कठिनः कलङ्कमलिनश्चन्द्रस्तुषाराचलः
प्रायस्तीक्ष्णकरप्रहारविवशो नित्यं गलत्येव हि ।
तारल्यं च समाश्रिता गुणवतो(युता) हारा इति प्रायशो
येषामत्र बभूव निर्मलगुणैः शीलस्य नैवोपमा ॥
दातृत्वेन समो बभूव न पुरा कर्णोऽपि येषामसौ
शौर्येणापि जगज्जिगीषुरगमन्नैवार्जुनस्तुल्यताम् ।
ये चासह्यपराक्रमक्रमपदाक्रान्तत्रिलोकीतला
वीरानाहवमूर्धसु प्रबलिनः पङ्क्तौनिवोच्चिक्षिपुः ॥
दिक्कामिनीतनुविलेपनचन्दनानि
राज्यश्रियः स्तनतटीविकटांशुकानि ।
अद्यापि चन्द्रकरहारतुषारभांसि
सर्वा दिशो धवलयन्ति यशांसि येषाम् ॥
विद्यासमुन्नतगुणा अपि न [स्मयान्धा]
नम्राः सुदूरमथ चोन्नतमूर्तिभाजः ।
निस्त्रिंशनिष्ठुरकराः कृपयाकुलाश्च
ये चार्थिकल्पतरवः शिवशौरिभक्ताः ॥
स श्रीमानादिसिङ्घो(सिंहो)ऽथ कदाचिदटवीमिमाम् ।
पारब्धी खेलनोद्युक्तः प्रविवेशावनीश्वरः ॥
आदिदेश समाहूय स पल्लीत्रितयाज्जनम् ।
यूयमद्यावलगकमसभ्यं ददताश्विति ॥
अत्रत्यस्तत्समाकर्ण्य [तूर्णं] बलपरिग्रहः ।
वणिजां भ्रातरं ज्येष्ठमुदयमानमुपागमत् ॥
राज्ञोऽवलगनार्थाय तमभ्यर्थ्य प्रयत्नतः ।
प्रेषयामास तं सोऽपि वल्लभोऽभून्महीपतेः ॥
अल्पैरहोभिरनुभूय नृपप्रसादं
श्रीपट्टबन्धमधिगम्य ततः क्रमेण ।

श्रीआदिसिङ्ह(सिंह)नृपतिं परिबोध्य तेन
संमानितो भ्रमरशाल्मलिपल्लिलोकः ॥
तुष्टास्ततो भ्रमरशाल्मलिवासिनस्ते
भूयस्तमागतमुपेत्य जनाः प्रणम्य ।
राजा भव त्वमिह पालय पल्लिमेता-
मित्यादि तत्परधियोऽभिदधुस्तमुच्चैः ॥
एवं नाम भवत्विति प्रतिवचस्तस्मात्समाकर्ण्य ते
तस्मै राज्यपदं ददुः क्षितिभृताप्याज्ञापितास्तत्कृते ।
सोऽस्मिन्विक्रमखण्डितारिसुभटश्रेणिः श्रुतार्थश्चिरं
राज्यं निर्जितसर्वपल्लिरकरोन्नाम्नोदयाख्यो नृपः ॥
यस्य त्यागनयान्वयोन्नतिगुणग्रामाधिपत्यार्जितां
कीर्तिं चन्द्रकरावदातसुभगामद्यापि सोत्कण्ठिताः ।
गेहासीनसुराङ्गनांजनकृतप्रीतिं सुरेन्द्रालय-
प्रान्तप्रोत्थितकल्पपादपतले गायन्ति सिद्धस्त्रियः ॥
आगत्योदयमानस्तु तैरेवाभ्यर्थितस्तदा ।
पल्लीद्वयेऽपि राज्यार्थं भ्रातरौ विससर्ज सः ॥
श्रीमाञ्छ्रीधौतमानाख्यः प्रख्यातो [न]भूतिषण्डके ।
वश्यात्मोदयमानस्य चिरं राज्यमचीकरत् ॥
प्रचण्डसुभटाटोपः खण्डितामित्रमण्डलः ।
अभूदजितमानोऽपि च्छिङ्गलायां महीपतिः ॥
पत्युर्भ्रमरशाल्मल्याच्छिङ्गला[न]भूतिषण्डकौ ।
वश्यौ बभूवतुः पूर्वमेवमेतौ यथाक्रमम् ॥
आरभ्योदयमानमादिपुरुषं गोत्रक्रमोऽयं महा-
नस्माकं परिवर्धमानमहिमेत्यालोक्य ते पूर्वजाः ।
अस्मद्गोत्रभवात्कदाचिद''''नाद्व्रचु(?)त्थानिकं स्यादिदं
सत्पल्लीद्वयमित्यवेत्य चखनुः(?) प्राशस्त्यवर्णानिमान् ॥

यावत्प्रान्तमरीचिरेचकचयव्याप्तत्रिलोकोच्छ्रयं
चक्रं चक्रधरो बिभर्ति गिरिशो यावद्भवानीपतिः ।
यावल्लोकसिसृक्षयाकुलमिलच्चिन्तालसश्चात्मभू-
र्गोत्रस्योदयमानदेवनृपतेस्तावत्स्थितिर्दृश्यताम् ॥
(एपिग्राफिआ इण्डिका—२।३४५-३४७)

---

(१२६)

कामरूपविषयाधीश्वरश्रीवैद्यदेवमहाराजानां शासनप्रशस्तिः[1] ।

ओं नमो भगवते वासुदेवाय । स्वस्ति ॥

अम्बरमानस्तम्भः कुम्भः संसारबीजरक्षायाः ।
हरिदन्तरमितमूर्तिः क्रीडापोत्री हरिर्जयति ॥

एतस्य दक्षिणदृशो वंशे मिहिरस्य जातवान्पूर्वम् ।
विग्रहपालो नृपतिः सर्वाकारर्धिसंसिद्धः ॥

यस्य वंशक्रमेणाभूत्सचिवः शास्त्रवित्तमः ।
योगदेव इति ख्यातः स्फुरद्दोर्दण्डविक्रमः ॥

तस्योर्जस्वलपौरुषस्य नृपतेः श्री**रामपालो**ऽभव-
त्पुत्रः पालकुलाब्धिशीतकिरणः साम्राज्यविख्यातिभाक् ।
तेने येन जगत्रये जनकभूलाभाद्यथावद्यशः
क्षोणीनायकभीमरावणवधाद्युद्धार्णवोल्लङ्घनात् ॥

यस्य शुद्धसचिवः पुराभव**द्बोधिदेव** इति तत्त्वबोधभूः ।
विश्व(ष्व)गेव विदितोऽद्भुतैर्गुणैरुज्झितात्मसदृशः क्षितावयम् ॥

अस्य **प्रतापदेवी** पत्नी धर्मर्द्धिकीर्तिविश्रान्तिः ।
आसीदसीमकान्तिः संतोषस्याकृतिः पत्युः ॥

---

१. प्रशस्तिरियं Mr. R. H. Brereton महाशयेन वाराणस्यध्यक्षेण लब्धा Mr. Arthur Venis, M. A. महाशयेन वाराणसीविश्वविद्यालयाध्यक्षेण प्रकाशिता.

अभूदमुष्यां तनयोऽस्य विश्रुतः श्री**वैद्यदेवः** परया श्रिया युतः ।
यदुच्छलत्कीर्तिश(स)रोवरोद[रे] पद्माङ्कुराभः शिवभूधरोऽभवत् ॥

दैवज्ञेषु च तर्ककेषु च जनुर्दिष्टस्य दिष्टिश्रुते-
　रन्नस्वप्नधृतीर्झटित्यरिभटैरुन्मुच्य संमूर्छितम् ।
किं चैतन्निजबन्धुवृन्दनयनप्रोद्भूतहर्षाम्बुभिः
　पारक्यप्रसरप्रतापदहनस्याभूद्विनिर्वापणम् ॥

सोऽयं **रामनरेन्द्र**जस्य सचिवः साम्राज्यलक्ष्मीजुषः
　प्रख्यातस्य **कुमारपाल**नृपतेश्चित्तानुरूपोऽभवत् ।
यस्यारातिकिरीटहाटककृतप्रासादकण्ठीरव-
　ग्रासत्रासवशादपैष्यति विधोर्बिम्बाङ्करूपी मृगः ॥

सचिवसमाजश(स)रोजतिग्मभानुः प्रसरयशोम्बुधिरेष **वैद्यदेवः** ।
सहजवदान्यतयैव चम्पकेशः सुजनमनःकुमुदेषु शीतरश्मिः ॥

यस्यानुत्तरवङ्गसंगरजये नौवाटहीहीरव-
　त्रस्तैर्दिक्करिभिश्च यन्न चलितं चेन्नास्ति तद्गम्यभूः ।
किं चोत्पातुककेनिपातपतनप्रोत्सर्पितैः शीकरै-
　राकाशे स्थिरता कृता यदि भवेत्स्यान्निष्कलङ्कः शशी ॥

गौडेशस्य कुमारपालनृपतेर्दोर्वीर्यतेजस्पते-
　स्त्रैलोक्योदरपूरिभूरियशसः प्रज्ञानवाचस्पतेः ।
सप्ताङ्गक्षितिपाधिपत्वमभितः संचिन्तयन्नुग्रधीः
　प्राणेभ्योऽप्यतिबन्धुरस्य सचिवः सोऽभूद्गुणिग्रामणीः ॥

एतादृशो हरिहरिद्भुवि सत्कृतस्य
　श्रीतिङ्ग्यदेवनृपतेर्विकृतिं निशम्य ।
गौडेश्वरेण भुवि तस्य नरेश्वरत्वे
　श्री**वैद्यदेव** उरुकीर्तिरयं नियुक्तः ॥

स्रजमिव शिरस्यादायाज्ञां प्रभोरुरुतेजसः
　कतिपयदिनैर्दत्वा जिष्णुः प्रयाणमसौ द्रुतम् ।

तमवनिपतिं जित्वा युद्धे बभूव महीपति-
निजभुजपरिस्पन्दैः साक्षाद्दिवस्पतिविक्रमः ॥

एतस्य प्रवरप्रयाणसमये पांशूत्करैः स्थण्डिल-
प्राये व्योमतलेऽर्कसप्तिकगणैर्लब्धोऽङ्घ्रियानश्रमः ।
किं चाक्षिद्वयगोपनेन करयोरन्यक्रियास्वक्षमः
सुत्रामा नयनानिमीलनकरं कर्म स्वकं निन्दति ॥

दोर्दण्डारणिजे हविर्भुजि भटव्रातेन्धनैरेधिते
संग्रामाध्वरपूजिते रिपुशिरःश्रेणीलसच्छ्रीफलैः ।
कृत्वा होमविधिं परक्षितिभुजा दत्त्वाथ पूर्णाहुतिं
लब्धोदग्रयशो महत्फलमसौ श्रीवैद्यदेवो बभौ ॥

यदुरुसमरमध्यात्खड्गघातोत्पतद्भिः
परसुभटशिरोभिर्व्योम कीर्णं निरीक्ष्य ।
झटिति विसरराहुव्य(व्यू)हधीबिभ्यदर्कः
स्वरुचमपि रजोभिः प्रोञ्छयन्स्वं जुगोप ॥

चन्द्रस्योद्भवभूर्महीध्रस(श)रणं सत्त्वप्रधानाशयः
पात्रश्रीमहितः स्फुरद्रसमयः सोऽयं गभीरः परः ।
रत्नानां निलयः श्रियः कुलगृहं स्वान्तस्थितश्रीपतिः
स्यादेवं सदृशोऽम्बुधेर्यदि जलाधारोऽथवा लङ्घितः ॥

ज्ञानैर्गीष्पतिरूर्जितैर्दिनपतिः सत्पौरुषैः श्रीपति-
र्धैर्यैरम्बुपतिर्धनैर्धनपतिर्दानैः स चम्पापतिः ।
किं चैतेऽपि गिरोपमानविषयाः प्रायः प्रसिद्धेर्बला-
द्ब्रूमः किंतु वयं स्वयं स्वसदृशः सर्वैर्गुणानां गणैः ॥

यस्य श्रीबुधदेव इत्यनुजभूः श्रीरामभद्रानुज-
प्रायस्तत्तदसीमनिर्मलगुणैर्धर्मर्द्धिशीलर्द्धिभूः ।
दानैः शोभनपल्लवैर्द्विजकुलप्रीतिप्रदानैरपि
ख्यातः कल्पमहीरुहप्रतिकृतिर्दोर्वीर्यचञ्चद्यशाः ॥

अथाभवत्कौशिकसंज्ञको मुनिर्मुनीन्द्रमुख्यो निजगोत्रपूरुषः।
पयोजजन्मास्यचयश्रमश्रमाद्यदास्यपद्मे तु सुखं गिरा स्थितम् ॥
एतद्वंशे महति **भरतः** प्रादुरासीद्द्विजाति-
भीवग्रामे प्रविसरयशाः शासनोऽग्रे वरेन्ग्याम्।
आस्तामन्यद्गुणगणसमाख्यानमाख्यानमात्रा-
द्यन्नाम्नोऽपि स्फुटति निखिलः कण्णिशानां(किल्बिषाणां)प्रपञ्चः॥
अस्य विप्रतिलको **युधिष्ठिरः** पुत्र इत्यभवत्सुधीश्वरः॥
शास्त्रवेदपरिशुद्धबोधभूः श्रोत्रियत्वविलसद्यशोनिधिः॥
पाईति धर्मपत्नी धीरवरस्यास्य चित्तविश्रान्तिः।
अ[ा]सीदसीमकान्तिः शीलौदार्यश्रियां वसतिः॥
पूर्वपूर्वजनुर्जन्मकर्मपाकादभूत्सुतः।
तस्यैतस्यां द्विजाधीशपूज्यः श्री**श्रीधरः** परः॥
तीर्थेषु भ्रमणाच्छ्रुताध्ययनतो दानात्तथाध्यापना-
द्यज्ञानां करणाद्व्रतैकचरणात्सर्वोत्तरः श्रोत्रियः।
प्रातर्नक्तमयाचितोपवसनैर्येन स्वयं गुग्गुलो-
राकर्षाद्वरदः कृतोऽत्र हि कलौ श्री**सोमनाथः** प्रभुः॥
कर्मब्रह्मविदां मुख्यः सर्वाकारतपोनिधिः।
श्रौतस्मार्तरहस्येषु वागीश इव विश्रुतः॥
एतस्मै शासनं प्रादाद्वैद्यदेवक्षितीश्वरः।
वैशाखे विशु(षु)[व]त्यां च स्वर्गार्थं हरिवासरे॥

स्वस्ति हंसाकाञ्चीसमावासितश्रीमज्जयक(स्क)न्धावारात्परममाहेश्वरः परमवैष्णवः महाराजाधिराजः परमेश्वरः परमभट्टारकः श्रीमान्**वैद्यदेवदेवः** कुशली श्री**प्राग्ज्योतिष**भुक्तौ **कामरूप**मण्डले **वाडा**विषये भट्टगङ्गाधर-भुक्तकशा(स)**न्तिवाडामन्दरा**ग्रामीययथाप्रधानप्रतिवासिचट्टभट्टविसयि-ल्लकादिजनपदान् कर्षकांश्च यथात्यागं मानयति बोधयति समादिशति वः—'मतमस्तु भवताम्—'एतद्द्वयं चतु:[१]सीमावच्छिन्नं परिबोधशुद्धम्

१. आदर्शे तु सर्वत्र सीमाशब्दस्तालव्यादिरेव दृश्यते.

अचट्टभट्टप्रवेशं सजलस्थलं भूच्छिद्रं चाकिंचित्करग्राह्यं चतुर्थाब्द सं वैशाखप्रथमादिना गुग्गुली श्री**श्रीधर**शर्मणे चतुःशतिकं शासनीकृत्य प्रदत्तमस्माभिः । तदेतस्मिन्विधेया भवेत' इति । सं ४ सूर्यगत्या वैशाखदिने १ नि ॥०॥ **सन्तिवडामन्दरा**ग्रामयोरेकीभूयाष्टसीमान्निनयकृतः । पूर्वदिशस्तावद्दिग्दाण्डिधरमादाय यावत् पश्चिमकूलसीमा । ऐशानदिशः शिङ्गिआधरसीमालेङ्गवडाभोग्येकंसपलभू १॥ उत्तरदिशः कोण्टुवाडोङ्गीनडजोलीनवधरासीमा । शिरवडाशिलगुडिभोग्यं किंचिदतिक्रम्य जयरातिपोला उणैपोलाविरामादाय वायव्यदिशः पिपामुण्डा अश्वत्थसीमा अझडाचौवोल वुडिपोखि रिपूर्वधरकुलाचापडि अष्टबलपुराणधर्मोलि पश्चिमायावत् । पश्चिमदिशः सीमा किंचिद्धरक्रित्वा नैर्ऋत्यदिशो धम्मालिमादाय नैपोश्टङ्गारयो विवादभूमेर्वार्ध्यर्धमादाय लच्छुवडास्थितैकवाटीसमेतघाटचम्पकः सीमा वेलवणीपटानवपल । दक्षिणदिशः कुम्भकारभोग्यबहिःसीमा कोण्टोहाडाद्धवोलयावत् हेलावणामुण्डमादाय दिग्दाण्डि यावत् अग्निदिशः सीमा । एवमष्ट सीमा द्वितीयपटकस्य चतुर्दशपङ्क्त्याः(?) ॥

सन्तिपाटकसंज्ञं तु **मन्दरा**ग्रामसंयुतम् ।
व(वा)डाविषयसंबद्धं भूच्छिद्रेणेति निश्चयात् ॥
सर्वायोपायसंयुक्तं करोपस्करवर्जितम् ।
यावच्चन्द्रार्कसंभोग्यं यावदिच्छाक्रियाफलम् ॥
जलस्थलखिलारण्यवाटगोवाटसंयुतम् ।

कोष्ठ(ष्ठे) यश्च करिस्य(ष्य)ति स्वयमिदं यः कारयिस्य(ष्य)त्यसौ
पुत्रादिक्षयमभ्युदीक्ष्य निरये कल्पान्तरं स्थास्यति ।
यः श्लाघ्यः परिपा[लयि]स्य(ष्य)ति सुतैर्वित्तैः स वर्धिस्य(ष्य)ते
स्वर्लोकं परिभुज्य यास्यति चिराद्विष्णोर्वरेण्यं पदम् ॥

यावद्भास्करहिमकरताराभूधरप[यो]धिवसुधाद्याः ।
तावद्विलश(स)तु नृपतेः कीर्तिः श्रीवैद्यदेवस्य ॥

इमां राजगुरोः पुत्रः श्री**मुरारे**र्द्विजन्मनः ॥
पद्मागर्भोद्भवश्चक्रे प्रस(श)स्तिं श्री**मनोरथः** ॥

देवोऽयं रिपुचक्रविक्रमकथाप्रत्यर्थिदोर्विभ्रमः
शश्वद्विश्वपरिभ्रमन्नवनवोन्मीलद्यश[ा]ः **श्रीधरः** ।
एतस्मै मुदितो द्विजातिपतये धर्माधिकारार्पित-
श्री**गोनन्दन**कोविदैकवचसा प्रादादिदं सा(शा)सनम् ॥
कर्णभद्रेण भद्रेण शिल्पिनानल्पबुद्धिना ।
ताम्रं विनयनम्रेण निर्मितं साधुकर्मणा ॥

एतादृशे मुनिवचनानि भवन्ति—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्टायां कृमिर्भूत्वा पच्यते पितृभिः सह ॥
गामेकां स्वर्णमेकं वा भूमेरप्यर्धमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

(एपिग्राफिआ इण्डिका—२।३५०-३५४)

---

(१२७)

कान्यकुब्जाधीश्वरश्रीमदनपालतनयश्रीगोविन्दचन्द्रमहाराजपुत्राणां शासनपत्रम्[१] ।

ॐ नमो भगवते वासुदेवाय ।

तमाद्यं सर्वदेवानां दामोदरमुपास्महे ।
त्रैलोक्यं यस्य वक्त्रीव क्रोडान्तःस्थं वलित्रयी ॥
वंसे(शे) **गाहडवालाख्ये** बभूव विजयी नृपः ।
महीमलसुतः श्रीमान्नलनाभागसंनिभः ॥

---

१. पत्रमिदं Mr. R. F. Brereton महाशयेन वाराणस्यध्यक्षेण Arthur Venis M. A. संज्ञकस्य वाराणसीविश्वविद्यालयाध्यक्षस्य पार्श्वे प्रेषितं तेन च प्रकाशितम्.

याते श्रीभोजभूपे विबुधवरवधूनेत्रसीमातिथित्वं
श्रीकर्णे कीर्तिशेषं गतवति च नृपे क्ष्मात्यये जायमाने ।
भर्तारं यं धरित्री त्रिदिवविभुनिभं प्रीतियोगादुपेता
त्राता विश्वस्य पूर्वं समभवदिह स क्ष्मापतिश्चन्द्रदेवः ॥

तस्माद् भूद्रि(द्वि)षदिलापतिदन्तिसिंहः
क्षोणीपतिर्मदनपाल इति प्रसिद्धः ।
येनाक्रियन्त वभु(बहु)शः समरप्रबन्धाः
संनर्तितप्रहतशत्रुकबन्धबन्धाः ॥

तस्मादजायत नरेश्वरवृन्दवन्द्य-
पादारविन्दयुगलो ज्वलितप्रतापः ।
क्षोणीपतीन्द्रतिलको रिपुरग(ङ्ग)भङ्गी
गोविन्दचन्द्र इति विश्रुतनामकीर्तिः ॥

तिष्ठतो यस्य दोःस्तम्भे मत्तशौर्यैकदन्तिनः ।
धनुर्गुणकिणश्रेणी मदराजीव लक्ष्यते ॥

संवत्सहस्रैके द्विषष्ट्युत्तरशताभ्यधिके कार्तिकपौर्णमास्यां भौमे दिने । अङ्के[ना]पि संवत् ११६२ [कार्तिक]सुदि [१]५ भौमे अद्येह श्रीमद्विष्णु-पुरावासितश्रीविजयकटके सकलकल्मषक्षयकारिण्यां गङ्गायां स्नात्वा यथा-विधानं मन्त्रदेवऋषिमनुष्यभूतपितॄंस्तर्पयित्वा सूर्यं भट्टारकं संपूज्य भगवन्तं महेश्वरं समभ्यर्च्य विश्वाधारं वासुदेवं समाराध्य मन्त्रपूतं भु(हु)तवहं हुत्वा पञ्चालदेशे जीआवतीपत्तलायां उसिथाग्रामे समस्त-विषयसा(पा)र्श्ववर्तिसमस्तमहत्तमजनपदान्संबोधयति समाज्ञापयति—यथा ग्रामोऽयं मया स्वसीमातृणयूतिगोचरपर्यन्तः सजलस्थलः साम्रमधूकः सग-र्तोषरपाषाणः सनदीवनलोहलवणाकरः सदशापराधदण्डः साकाशपातालः स्वसीमाचतुराघाटविशुद्धान्तः पूर्वदत्तदेवब्राह्मणवर्जितः नलिनीदलगत-जलवत्तरलतरं प्राणिनां जीवितं विज्ञाय करिकलभकर्णाग्रविलसितच-पलां लक्ष्मीं विलोक्य जलबुद्बुदाकारं यौवनं परिज्ञाय कदलीदण्डवत्संसा-रमसारतरं समाकलय्य साविथदेशनिर्गताय वाजसनेयशाखामृगाय बन्धु-

लगोत्राय बन्धुलाघमर्षणविश्वामित्रत्रिप्रवराय दीक्षित**नागानन्द**पौत्राय दीक्षित**पुरवास**पुत्राय यजुर्वेदविद्यानलिनीविकासनप्रत्यक्षभास्कराय दीक्षित**वील्हाकाय** श्रद्धाविशुद्धमनसा महाराजपुत्रश्रीमद्गोविन्दचन्द्रदेवेन कुशपूतहस्तोदकेन कार्तिक्यां निमित्ते सम्यगाजू(हू)यास्मै ब्राह्मणाय मातापित्रोरात्मनश्च यशःपुण्यविवृद्धये चन्द्रार्कोदधिक्षितिपवनाम्बराणि यावच्छासनीकृत्य प्रदत्तः । मत्त्वा यद्दीयमानभागभागकूटकदशवधविंशतिछवथाकेरे(?)तुरुष्कदण्डप्रभृतिसर्वादायान् तत्सर्वमस्मै निवेदनीयम् ।

ये यास्यन्ति महीभृतो मम कुले किंवा परस्मिन्पुर-
　　स्तेषामेष मयाञ्जलिर्विरचितो नादेयमस्मात्कियत् ।
दूर्वामात्रमपि स्वधर्मनिरता दत्तं सदा पाल्यतां
　　वायुर्वास्यति तप्स्यति प्रतपनः श्रुत्वा मुनीनां वचः ॥

अथात्र पौराणिकाः श्लोकाः—

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव वा ।
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥
बहुदि(भि)र्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवत्तत्र(वान्तप्र)तिमानि तानि को नाम साधुः पुनराददीत ॥

असत्कुलं परमुदारमुदाहरद्भि-
　　रनै(न्यै)श्च दानमिदमचाणु(भ्यनु)मोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
　　दानं फलं परयशःपरिपालनं च ॥

षंख(शङ्खं) भद्रासनं छत्रं वराश्वा वरवारणाः ।
भूमिदानस्य चिह्नानि मसं(फलं) [स्वर्गः] पुरंदर ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्टायां कृमिर्भूत्वा पितृभिः सह मोदते ॥
प्रतीहारगौतमश्च जागूकश्च पुरोहितः ।
जननी राल्हदेवी च वील्हणश्च महत्तकः ॥
एषां संमतिं प्राप्य सम्यग्लिखितवानिदम् ।
नाम्ना विजयदासाख्यः शासनं राजसंमतम् ॥

(एपिग्राफिआ इण्डिका—२।३५९–३६१)

(१२८)

मोकलमहाराजकारितशिवमन्दिरप्रशस्तिः[1] ।

ॐ नमः शिवाय ।

सिद्धार्थामरसुन्दरीकरवलत्सिन्दूरधारारुण-
श्रीगण्डस्थलमण्डलीयुगलसद्दानाम्बुपूरोज्ज्वलः ।
संध्याभ्रच्छुरिताग्रसानुनिपतन्नाकापगौघद्वयः
स्वर्णोर्वीभृदिव प्रयच्छतु शिवं देवो गजास्योऽव्ययम् ॥
वेदा वागिति शिष्टतामुपगतो यः कर्मणामीक्षिता
साक्षी तत्प्रतिभूः पुनर्भवति सन्सिद्धार्थसंदर्शनः ।
जात्यैवैषु विनश्वरेषु सकलं दाता विविक्तः फलं
देवः स्वस्तिकरः परः स सततं स्तादेकलिङ्गाभिधः ॥
भूमीभृत्स्वयमेधितस्थितिरियं गुर्वी नगा बन्धवो
विन्ध्योऽगस्त्यचरित्रतो न चकितः प्रास्थापयद्ब्राह्मणान् ।
कन्या मान्यतमा महोत्सवविधावित्येकमन्त्रोक्तितो
यामानीनयदर्चनाय गिरिजा विन्ध्यालया सावतात् ॥

---

१. अस्य प्रशस्तिभूतस्याधारभूता शिला मेवाडदेशान्तर्गतचित्रकूटनगरस्थशिवमन्दिरे उपलभ्यते. अस्याः प्रतिलेखः Dr. A. Führer महाशयैः कृतः Dr. Burgess महाशयैः मह्यं दत्त इति Professor F. Kielhorn, Ph. D., C. I. E., महाशयाः.

कालिन्दीतटकुञ्जबद्धवसतिः सेयं प्रिया राधिका
स्मर्तव्यं ननु रुक्मिणी न भवती हुं चारुहासिन्यसि ।
युक्तं ना[सि] कलावती सुविदितं त्वं सत्यभामेऽन्यथा
नोक्तासीति विनिह्नुतोक्तमुदितश्लेषोऽच्युतः पातु वः ॥
स्फारन्यायोऽन्ववायो गुहिलनरपतेरस्ति जाग्रत्प्रशस्ति-
र्ध्वस्तीभूतान्तरायो वसतिरिह युगे धर्म्यकर्मोदयस्य ।
शश्वद्यागानुरागे(ग)स्थिरविमलनिधौ भूरिभोगोनभागां
भूयो नूनां विधत्ते सपदि शतमखी यत्र संभूय शक्रः ॥
वाक्सेतोरचलन्मतिर्दिशि दिशि प्रख्यातमानोन्नति-
र्निर्यान्निस्वनवाहिनीपरिवृतो नानाधनैकाकरः ।
अत्यक्तक्षितिविग्रहो मुनिकथागीतादिगोत्रस्थिति-
र्विन्ध्यो बन्धुरबन्धुतां वितनुते यस्योपपन्नश्रियः ॥
वंशे तत्रारिसिंहः क्षितिपतिरजनि क्षत्रनक्षत्रलक्ष्मी-
वीक्षादक्षोरुयुत्क्ष्माबहुलजरजनिध्वंसभास्वद्गभस्तिः ।
विन्ध्यावन्ध्यप्रदेशस्फुरदमलखनिव्यक्तरत्नाकरत्व-
स्फारश्रीमेदपाटक्षितिब(व)लयवलद्दुग्धपाथोदचन्द्रः ॥
नरपतिररिसिंहः शस्त्रशास्त्रोपदेष्टा
वितरणरणकर्णो विश्वविख्यातवर्णः ।
स्फुरदमलगुणौघः पुण्यगण्योरुनामा
नयविनयविवेकोद्यानपुंस्कोकिलः सन् ॥
बिभ्यत्सिंहपदादमुष्य सकरी नूनं मघोनो यतो
वाजी सत्र(त्र)हविस्तताध्वरभुवं नोच्चैःश्रवा गच्छति ।
आहूतः कथमेरु वाहनमृते देवाग्रणीर्वृत्रहा
मेघं वाहनमातनोदयमतः सद्धोमधूमोद्भवम् ॥
कीर्तिः कौतुकिनी दिगन्तमगमत्कर्पूरपूरोज्व(ज्ज्व)ला
खेलन्ती निजवासिताभ्रमवशादालिङ्गिता दिग्गजैः ।

क्षीराम्भोनिधिगाहनं तु विधिना कृत्वादरादुत्थिता
ब्रह्मादीननुयोक्तुमुत्तमगुणस्यास्य प्रगल्भा दिवम् ॥
विशिष्टजनसंगतौ व्यतरदेकलक्ष्यं यत-
स्ततोऽधिकतरं यशोऽलभत भोजभूमीपतिः।
अयं कथमदःसमः कविभिरुच्यते वाददा-
द्विशेषविधिनान्वहं विविधलक्षभोजानपि ॥
निर्व्रीडो न महेश्वरो न कठिनो नाचेतनश्चिन्तितं
दातानेकगवीश्वरः परिवृढो नो भारती दुर्भगा।
सेनानीर्न विपक्षसंगतिरतो नोच्चैःश्रवा वा हयो
नारामः कतिचित्तरुः कथमदः पुर्याः स धुर्यो दिवः ॥
शूरः सूनृतवागनूनविभ[वो] वंशावतंसः सुत-
स्तस्य न्यक्कृतरत्नसानुगरिमा हम्मीरवीरो जयी।
विख्यातः स्मररूपजित्वरवपुर्लक्ष्मीनिवासाच्युतो
वाग्देवीचतुराननो रिपुकुलप्लोषोग्ररूपो महान् ॥
हम्मीरः किल वैभवोचितविधिर्दित्सुः सहस्रं गवा-
मित्याकर्ण्य सहस्रगू रविशचीनाथौ भयं जग्मतुः।
शश्वत्तद्गृहसि स्थितान्सुररिपोः श्रुत्वा सहस्रं पुन-
र्धेनूनां समुपागतावतिमुदा तद्दानमेवेक्षितुम् ॥
कर्णादीनतिशय्य दिग्जयविधावादाय दिङ्मण्डली-
दण्डं दूरमपास्य कालमसकृद्दाता स्वयं दक्षिणाम्।
इत्याकर्ण्य जनश्रुतीः परिभवं स्वं शङ्कमानोऽन्तकृ-
द्द्रष्टुं न क्षमते प्रजा मनुनये यस्मिन्महीं शासति ॥
प्रासादमासादितशातकुम्भकुम्भं वसद्देवमचीकरद्यः।
अचीखनत्सागरकल्पमल्पेतरत्सरश्चूतवनीभिरिद्धम् ॥
संग्रामग्रामभूमौ सदिदमसिलता संगता पञ्चशाखे
सच्छाये श्यामलाङ्गी क्षतजजलवलत्पुष्टिरिष्टप्रचारा।

चित्रं सूते विकोशा कुसुममतिमहत्कीर्तनीयं दिगन्ते
धा[म्ना]म्नाता नितान्तं दलयति नियतं वारणाङ्के पतन्ती ॥
हम्मीरवीरो रणरङ्गधीरो वाम्माधुरीतर्जितकेकिकीरः।
धराधवालंकरणैकहीरस्तत्तद्गनीभूषितसिन्धुतीरः ॥
एतत्पाणौ कृपाणी द्विषदसुपवनाहारतोषं दधाना
कालाकारोरगीव स्फुरति सचकितं वीक्षिता भीतिहेतुः।
नाथः काये कथंचिद्दशति बहुमता नो बिभीते विपक्षा-
स्त्वर्गे वासं क्ष[ता]नां वितरति रमते न द्विजिह्वेन चित्रम् ॥
पायं [पायं सुपीनः] परभटरुधिरं तन्महीगर्भजाता
खड्गः कालः कुतोऽयं कथमियमपरा कीर्तिरत्युज्व(ज्ज्व)लास्य।
एकेनास्नायि नूनं रुददरिवनितानेत्रतोयेऽञ्जनाढ्ये
तासामुद्वर्तितेयं मृदुभुजब(व)लयस्वच्छचूर्णैरजस्रम् ॥
उद्यत्प्रौढप्रतापानलमुषितमहाबिम्बशेषो विवस्वा-
न्पश्चादुद्दामकीर्तिच्छुरिततरतनुः शीतरश्मित्वमेति।
शङ्के रूपान्तरं स्वं कलयति स वपुर्भेदभीतो रणक्ष्मा
धीरे हम्मीरवीरे घ्नति परसुभटान्संगरे संमुखस्थान् ॥
कुर्वन्पद्मे जनुः स्वं विधिरिति विधिदृग्दृष्टसृष्टयग्रदिष्टो
नो पङ्के जन्मदोषं व्यजगणदतुलं तस्य रक्तेतरस्य।
भूत्वा हम्मीरदेवक्षितिपतियशसः स्वच्छवर्णोपमेयो
गन्ता पुण्योपमानं दिशि दिशि सुचिरं सत्कवीनां मुखेषु ॥
गौरो गौरीशहासादपि रुचिररुचिश्चन्दनाच्चन्द्रतो वा
कान्त्या कर्णाटकान्तासितदशन[च]तुष्कानुमेया सुगेया।
शेषस्याशेषवेषस्फुरदमृतरुचश्चारुसौन्दर्यधुर्या
कीर्तिर्यस्येन्दुमूर्तेः किल चरति दशाशान्तविश्रान्तयात्रा ॥
तस्मात्क्षेत्रमहीपतिः समभवत्ख्यातो गुणाम्भोनिधिः
शौर्यौदार्यमहत्व(त्त्व)सत्व(त्त्व)महितो धर्मो वपुष्मानिव।

शक्रार्धासनभाजि येन जनके रत्नाकरालंकृति-
भूर्भुक्ता जितपूर्वराजगिरिमप्राप्तप्रभाशालिना ॥

हृदि विनिहितरामो योऽस्त्रविद्याभिरामो
मदनसदृशमूर्तिर्विश्वविख्यातकीर्तिः ।
समरहतविपक्षो लीलया दत्तलक्ष्मी-
र्नयनजितसरोजः प्रक्रियाक्रान्तभोजः ॥

संग्रामे दन्तिदन्तज्वलनकणमुचि प्रोल्लसद्वीरयोध-
स्फारोन्मुक्ताशुगालीनिबिडकवलिताशेषकाष्ठान्तराले ।
जित्वा दुर्गं समग्रं नरपतिमहितं साधुवादस्य सम्य-
क्स्तम्भं योधाद्धरित्र्यामरिकलपतगश्रेणिचण्डप्रदीपः ॥

आक्रान्ता वृषपुंगवेन विलसद्भासा चतुर्भिः पदैः
सम्यग्वीक्षणपालिता नवनवप्राप्तप्रकर्षोदया ।
प्रासोष्टामरनैचिकीव बहुशो रत्नान्यनर्घ्याणि गौः
शूरे कीर्तिपयो धराशतमखे यस्मिन्महीं शासति ॥

कीर्तिक्षीरोदपूरे बहुविधबिरुदप्रोल्लसद्वीचिमाले
कृष्णः शेतेऽस्य खड्गः सुखमुरुसमरे शेषमासाद्य शत्रोः ।
दृश्यन्ते राजहंसा दिशि दिशि न ततो मानसे लीयमानाः
सीदत्पक्षा विलक्षाः स्फुरति न कमलोन्मेषितापेक्षितैषाम् ॥

अस्यासिः कालरात्रिः स्फुरति किल भवन्मण्डले वैरि........
........[प्रो]द्भासिवेश्मप्रभवदहिभयं भूतराजोरुतापम् ।
पद्मोद्बोधो न चैषां भवति विघटते चक्रयो[गो] नियोगा-
द्भूरिर्जागर्ति भित्तिः पतति निजपथो नोज्झितः पङ्कपातः ॥

भ्रातः कल्पतरो किमात्थ भगवन्हेमाचल श्रूयतां
कर्तुं क्षेत्रमहीपतिः प्रयतते दानानि पुण्याशयः ।
वर्ते[ऽहं स्व?]करे गृहाङ्गणभुवि त्वं वर्तसे नित्यशः
क्रीडार्थं यदि [वा] ददाति हि तदा वक्तुं क ईष्टे जनः ॥

इत्थं दानकथा मिथो विजयते चिन्तामणिस्वर्गवी-
मुख्यानामपि दानशास्त्रविलसन्नाम्नामसुष्य प्रभोः।
उन्मीलच्छरदम्बुजामलदलस्वच्छायताक्षिस्फुर-
त्कोणस्थायुकमित्रवैरिपरिषत्संपद्विपद्वर्त्मनः॥
माद्यद्वेतण्डचण्डध्वनिभरविगलद्वीरवर्गोरुधैर्ये
स्फूर्जत्कोदण्डदण्डप्रपतदिषुचयच्छन्नसैन्येऽप्यनन्ये।
जन्ये प्राणैकपण्ये गणयति न गणं विद्विषां पुण्यराशि-
र्धन्यः क्षेत्रक्षितीशः प्रतिभटनृपतिक्ष्माकराकृष्टिदृष्टिः॥
मूर्च्छालं तु जडीभवच्छ्रुतिपथं संशुष्कितैकत्वचं
मीलन्तं च मुहुर्मुहुः शिथिलितं यान्तं न [वा] सुस्थितम्।
दारिद्र्योपहतं विबोधयति यद्दुष्टाहिदष्टं यथा
जाप्यं कर्णपथाश्रितं सुविमलं यन्नाममन्त्राक्षरम्॥
तत्सूनुः किल लक्षसिंहनृपतिः ख्यातो गुणग्रामणी-
रुद्यद्दानफलामलार्जुनयशोवल्लीमतल्लीतरुः।
यत्तेजःशिखिनो [वि]पक्षवनितानेत्राम्बुजातद्युतेः
काष्ठान्ताक्रमणं [झ]टित्यनुदिनं नाभूद्विचारास्पदम्॥
रामः किं जितदूषणः सुभरतो रामानुरागास्पदं
शत्रुघ्नः किमु लक्ष्मणोदयभरः सुग्रीव इद्धाङ्गदः।
तारावल्लभ उत्तमेन वपुषालंकारमा[या]दतो
यो रामायणनायकैकतनुतां द्रष्टुं विधात्रा कृतः॥
दानादुद्दामसामा शरणगतजनत्राणपाषाणसीमा
भीमासीमैकधामा शतमखपुरतो विद्विषा गीतनामा।
अक्षामारामदामा मखमुखविलसद्धूमधूमोच्चसामा
सल्लक्ष्माशेषरोमा धरणिसुरतरुर्लक्षसिंहः स धीमान्॥
वैरिक्षोणीन्द्रमत्तद्विरदमदनुदः सिंहतः शुद्धसारा-
दारादुद्गीतकीर्तेरमरपुरभिष[क्कान्ति]निर्णीतमूर्तेः।

दाने माने कृपाणे यशसि महसि [वा] साधुवाण्यां कृपाण्यां
वीराल्लक्षक्षितीशाज्जगति न हि परः ख्यातिभक्तिः सु[भु]क्तिः ॥
नीतिप्रीतिभुजार्जितानि [लक्ष]शो रत्नानि यत्नादयं
दायं दायममायया व्यतनुत ध्वस्तान्तरायां गयाम् ।
तीर्थानां करमाकलय्य विधिनान्यत्रापि युङ्क्ते धनं
प्रौढग्रावनिबद्धतीर्थसरसीजाग्रद्यशोऽम्भोरुहः ॥
संग्रामेषु गतागतानि विद[ध]ल्लक्षं परैर्लक्षितो
दत्वा(त्त्वा) लक्षमपि स्व[यं न] तनुते संतोषमब्जेक्षणः ।
कुर्वाणः किल कानकीमपि तुलां तत्खण्डबिम्बच्छला-
[ल्ल]क्षं स्वां तनुमातनोदिति नृपो लक्षप्रथोऽजायत ॥
दाने हेम्नस्तुलायां मखभुवि बहुधा शुद्धिमापादि[ता]नां
भास्वज्जाम्बूनदानां कुतुकिजनभरैस्तर्किता राशयोऽस्य ।
संग्रामे लुण्टितानां प्रतिनृपमहसां राशयस्ते किमेते
विन्ध्यं बन्धुं समेतुं किमु समुपगताः साधु हेमाद्रिपादाः ॥
रुद्धाशेषपदां शकाधिपकरव्यग्रीभवज्जीवनां
धीरोऽमूमुचदर्जुनीमिव गयां मायाविमुक्ताशयः ।
धर्मश्चास्य समस्तलोकमहितः [का]ष्ठां परामागतो
निः[सत्त्वी ?]कृतधर्मराजवसतेः पद्मालयासद्मनः ॥
मत्तुल्या [न]नु नाभवत्किल तुला पूर्वेति गर्वं तुला-
मुष्य क्षोणिपतेर्ध्रुवं कृतवतो गर्वासहिष्णोः पुरः ।
तस्यास्तस्य मुदानुदां विदधता धीरेण दत्तापरा-
सौ मानादधिकाधिकीकृतविधिः सद्यो वियद्धाटका ॥
संख्यातुं कथमीशते कविजना दानानि नानाविधा-
न्यस्याकृष्टसमस्तराजवसुधावित्तस्य चित्तोन्नतेः ।
लब्धा नोद्विजते वनीपकगणान्दत्वा(त्त्वा) न यत्कीर्तये-
त्पात्रं प्राप्य मुदान्वितस्तृणतुलां स्वर्णे समारोपयेत् ॥

तस्य क्ष्मावलयं नयेन नयतः संतोषमायु[ष्म]तः
संभूतः स्मरसुन्दरो गुरुनतः पुत्रः सुधीर्मोकलः ।
शक्त्या भूभृति दारुणं वितनु[ते] यत्तत्कुमारः पुरः
सर्वज्ञोऽस्ति यतस्ततोऽचलभुवो नाथस्तु पित्रा कृतः ॥

प्रासादा बहुशः समुन्नतियुजः क्षोणीभुजा कारिताः
शुध्यन्मूर्धसु राजमानकनकप्रस्फारकुम्भश्रियः ।
नागेन्द्रा नु शिरःसु हाटकघटाना[धा]य लोलत्सुधा-
न्यातुं नाकमिवोत्थिता मखभुजां पीयूषपानोत्सुकाः ॥

अङ्गाः संप्राप्तभङ्गाः स्मृतवनविटपाः कामरूपा विरूपा
वङ्गा गङ्गैकसङ्गा गतविरुदमदा जातसादा निषादाः ।
चीनाः संग्रामदीनाः स्खलदसिधनुषो भीतिशुष्कास्तुरुष्का
भूमीपृष्ठे गरिष्ठे स्फुरति महिमनि क्ष्मापतेर्मोकलस्य ॥

मूर्धा सिन्दूररेखाशतमखधनुषा राजमाना गभीरं
कुर्वन्तः शब्दमुच्चै रदरुचिचपलाः स्निग्धतन्वा कचाभाः ।
संग्रामग्रामयाता रिपुकरिजलदाः प्राप्तकालोपयोगा
यस्येषुव्रातभिन्नाः खलु रुधिरजलं भूरि वर्षन्ति सद्यः ॥

अस्य प्रौढप्रयाणक्षणरणर[ण]कहेषमाणोरुमान-
स्फूर्जद्गर्वार्वव[र्य]क्रमणभरभवद्धूलिधारान्धकारम् ।
ना[शं ने]ता विवस्वानिति तु विरमतु ध्वस्तनेत्रप्रकाशः
स्वानश्वानस्ववर्णान्यदि परिचिनुते तत्स भाग्यं महीयः ॥

वासो नाशासु भास्वत्कररुचिररुचाभासितास्वस्य वैरा-
त्पारावारान्तरायादपि नहि गमनं दूरमस्मादकस्मात् ।
सेवाहेवाकमेवाचरत बहुमतं दत्त वित्तं नितान्तं
[मं]त्रोऽमात्यैरकारि प्रतिविमतसदो भूपतेर्मोकलस्य ॥

प्रुष्टप्रौढारिवर्गप्रथितपुरब(व)लद्धूमधूमप्रचारै-
र्धूम्रं ब्र[ह्म]ाण्डभाण्डोदरमतिविपुलं वीक्ष्य दक्षेषु मुख्यः ।

कीर्त्यालेपं सुधोत्थं कलयति बलवान्दिग्वधूकिंकराभि-
स्तारावद्भिन्दुवृन्दच्छुरणबहुरुचा योऽम्बरेणावृताभिः ॥
नेता पातोत्तराशां यवननरपतिं लुण्टिताशेषसेनं
पेरोजं कीर्तिवल्लीकुसुममुरुमतिर्योऽकरोत्संगरस्थः ।
पल्लीशाक्रान्तिवार्ता कलयति कलया कीर्तिता यस्य हेलां
पञ्चास्यस्येव माद्यद्गजदलनरुचेर्लीलया रङ्कुभङ्गः ॥
आरूढः सविता तुलां कलयति द्राङ्नीचतां कन्यया
दूरं मुक्तपरिग्रहो बहुरुचा चित्रोल्लसद्धस्तया ।
धीरोऽयं पदमुत्तमं तु विधिना प्राप्तस्तुलां गाहते
कन्याभिर्म्रियतेतमां क्षितिभुजां श्रीमोकलक्ष्मापतिः ॥
मानत्राणमना मनागपि मनोरन्यूननीतिव्रतो
नो जानाति निजप्रतापमतुलं सिंहो यथा विक्रमम् ।
मन्ये भास्वरहेमराशिमिषतो धाता तुलायामधा-
देतस्मादपि सोऽगमच्च गुरुतामद्यापि जा[ना]ति किम् ॥
दृष्ट्वा हाटककोटिकूटमतुलं दानाय मानाधिकं
सद्यः शोधित[सूत्र]तैकमतयः संशेरते शाब्दिकाः ।
शक्रप्रार्थितहेमदे सुरतरौ किं किं नु चिन्तामणौ
हेमाद्रौ शकलीकृते किमु तुलाशब्दस्तु संकेतितः ॥
दीव्यत्तद्वीरतुङ्गत्तरतुरगवरव्रातजातोरुवात-
क्षुभ्यत्तत्क्ष्मोत्थरेणुक्षतनयनरुजाव्यग्रसूताः खरांशोः ।
मन्दायन्ते गतेश्वास्तत इव वनिता वैरिणां तद्दिनानां
यामाञ्जानन्ति दीर्घानवितथविरुदे मोकलेन्द्रे रणस्थे ॥
को वा नो वेद विद्वांश्चरमयुगकलावेकपादेव धर्मः
खञ्जन्नष्टावलम्बः किल चरतु कथं पीनपङ्के जनेऽस्मिन् ।
सोऽयं सद्वंशयष्टिं बहिरबहिरथो शुद्धसारोपपन्नं
प्राप्य श्रीमोकलेन्द्रं प्रविशति विपुलां मण्डलीं पण्डितानाम् ॥

नूनं द्यूतविधावधान्मखभुजामीशः सुमेरुं पणं
गण्यस्तत्र मनस्विनां व्यजयत श्रीमोकलक्ष्मापतिः।
तादृक्षाः क[थ]मन्यथावनितले हेम्नाममी राशयो
नैषां दानविधावमुष्य च मनःपीडाकलापि क्वचित् ॥
वह्नावह्नाय सर्पिःपतननवरुचौ भूमिधूमायमाने
दूनां.....म[क्षि ?]पन्तौ कथमुपकुरुते यागभागो मघोनः।
पुण्येनास्यैव जाने दिनमणिरयते सत्कराणां सहस्रं
बिभ्रत्सद्योऽस्ततन्द्रः स्थगयति विधिना योऽयमक्ष्णां सहस्रम् ॥
आरुह्यामलमण्डलोऽकृत तुलां यः पुष्करद्योतनं
पुण्यश्रीः स कथं तथा प्रथमतो गण्यो न तेजस्विनाम्।
निष्पङ्का करलालिता वसुमती सद्राजहंसा यतो
व(ब)न्धूनामुदयस्ततस्तदुदये स्यात्संपदामौचिती ॥
पारावारस्य वेलातटनिकटमनु प्राप्तशैलाधिवासा
शत्रुश्रेणी समग्रा निवसति सततं भीतभीता नितान्तम्।
जेतुं यात्रादसीया यदि भवति तदा वाजिराजीखुराग्र-
त्रुट्यत्क्ष्माधूलिधारा स्थलयति जलधिं पारयानाय तस्य ॥
आसाद्यातिथिमाश्रयं त्रिजगतां श्रीद्वारकानायकं
प्रासादं रचितोपचारमकरोद्भूमीपतिर्मोकलः।
देवेनाम्बुजबान्धवेन चकितं यो वीक्षितः शङ्कया
विन्ध्याद्रेर्गिरिसत्तमस्य नियतं मुक्तस्य वाग्बन्धनात् ॥
यस्य प्रत्युप्तकर्मद्रवदखिलमहाधातुसंभारधारा-
पातक्ष्मातापशुष्यद्गलबिलविलसल्लोललालः फणीन्द्रः।
व्याचष्टे स्पष्टमिष्टं ध्रुवमयमधुना भाष्यमाभाष्य शिष्यं
स श्रीभर्तुः पुरस्ताज्जयति खगपतिर्मोकलेन्द्रस्य कीर्तेः ॥
सोढुं नेशः पयोधिः क्षणमपि विरहं द्वारकानाथ(य)कस्य
प्रेम्णा पादोपमूलं स्वयमुपगतवान्यत्तडागच्छलेन।

नोदन्या कुम्भयोनेरतिपततितरामन्तरेणैनमेष्य-
ञ्शापान्तं मे विदध्यादयमिति विनयाद्विन्ध्य एवानयद्यम् ॥
विन्ध्यस्कन्धैकबन्धुर्निजविततिभरादन्धुतानीतसिन्धु-
र्नीरक्रीडत्पुरंध्रिप्रसभकुचतटाघातसीदत्तरङ्गः ।
संतुष्यत्तोयजन्तुर्विविधनगनदीवेगसंरोधतन्तुः
सन्सेतुर्नेतुरस्य स्फुरति वसुमतीसिद्धिहेतुः सुकेतुः ॥

अमुष्य धरणीभृतो विषयमध्यवर्ती महा-
दरीवृतवपुष्टया [वि]वृतदूरगम्भीरतः ।
म[हो]दर इवापरः परममानगम्यान्तरः
पवित्रतरकीर्तनो जयति चित्रकूटाचलः ॥

जायन्तां नाम कामं कुलधरणिभृतः सप्तशृङ्गौघतुङ्गा
वैचित्र्या चित्रकूटं तुलयितुमनलं तीर्थभूतप्रदेशम् ।
मा भूवन्निर्झरिण्यो मदुदितजनुषो नीचगामानशौण्डः
शृङ्गे यः क्षीरवारांनिधिमधिततरामुद्यदम्भोजवासम् ॥

उद्दामग्रावनिर्यज्झरभरकणिकाजातसेकातरेक-
स्निह्यच्छालप्रवालप्रभवदुरुतराभोगसूनप्रसूतात् ।
मध्वासारादपारादुप[ह्व]तजनुषो दाववह्नेर्निदाघे
विष्वद्रीचो वनानि प्रसभपरिभवं नेह शैले विदन्ति ॥

एतस्मिन्सरिदस्ति निर्मलजला यस्यां निवापाञ्जला-
वुन्मीलत्तिलजातपातकवलव्यग्राः शफर्यश्चलाः ।
क्रीडासंभ्रमविस्मृतान्सुबहुशो मज्जद्वधूनामहो
नेत्राणीव विलोपिकज्जलकणांश्चेतुं स्फुरन्ति स्फुटम् ॥

लङ्का किं नाम दुर्गं जलनिधिरचिता यत्र सा काल[काका ?]
[प्रा]वृट्का[ले] विवर्गैरपि गलितमदैर्या त्रियेतेति मानी ।
यो धत्ते क्षीरवारांनिधिमुपरि परै राजहंसैरगम्य-
स्तद्दुर्गं चित्रकूटो जयति वसुमतीमण्डनं भूतिभूमिः ॥

सौभाग्यैकमहौषधिर्भगवती यस्मिन्भवानी स्वयं
जागर्ति प्रियसंनिधानवसतिः साध्वीजनानां गुरुः।
देवः सोऽपि समस्तनाकरमणीसंतानदामव्रज-
प्रश्च्योतन्मकरन्दबिन्दुसुरभिप्रस्फारनृत्याङ्गणः॥
सेवाहेवाकिदेवस्तुतहरचरितप्रोल्लसद्भावसंप-
त्सद्यःस्विद्यद्भवानीकृतसुखवसनस्फारसौरभ्यहारि।
यद्वारि प्रातिभाव्यं वहति मृगदृशां मज्जतीनामजस्रं
पातिव्रत्ये समन्तात्समधिकसुभगंभावुकत्वेऽपि शश्वत्॥
गिरिः कैलासो यद्दशमुखभुजोच्छ्वासनदिना-
द्दलन्मूलस्थामा प्रभवति न नाथ्यं विषहितुम्।
प्रदेशप्राग्भारप्र[कृ]तिरमणीये तदधुना
समाधीशः श्रीमानिह वसति गौरीसहचरः॥
एकैकग्रावतावत्कृतिमुषितमहासर्वकर्मीणमानं
कृत्वा प्रासादमाशामुखमुकुरमतिव्योमसीमानमस्य।
यस्याशेषोपचारक्षमधनमुदितारी.....................
द्वीरः श्रीमोकलेन्द्रो धनपुरमुचितं ग्राममायामिसीमम्॥
अब्दे बाणाष्टवेदक्षितिपरिकलिते विक्रमाम्भोजबन्धोः
पुण्ये मासे तपस्ये सवितरि मकरं याति जीवे घटस्थ।
पक्षे शुक्लेतरस्मिन्सुरगुरुदिवसे चार्यमर्क्षे तृतीया-
तिथ्यां देवप्रतिष्ठामयमकृततरां मोकलो भूमिपालः॥
उन्मीलद्यागयात्रोद्यतसुरतरुणीगीतसंग्रामधामा
सुत्रामा यावदीष्टे त्रिदशपरपरीपालनस्पष्टनीतिः।
पर्यायोपात्तभूनां स्फुरति दशशती शेषमूर्ध्नां च याव-
त्तावत्प्रस्फारलक्ष्मीरवतु वसुमतीं मोकलेन्द्रस्य बाहुः॥
श्रीमद्दशपुरज्ञातिर्भट्टविष्णोस्तनूद्भवः।
नाम्नैकनाथनामायमलिखत्कृतिमुज्व(ज्ज्व)लाम्॥

अनेकप्रासादैः परिवृतमतिप्रांशुकलशं
गिरीशप्रासादं व्यरचयदनूनैरनुचरैः।
मनाख्यो विख्यातः सकलगुणवान्वीजलसुतः
सुतः शिल्पी जातो गुणगणयुतो वीसल इति॥
अतिप्रशस्तैरलिखत्प्रशस्तिं वर्णैरवर्णेन बहिष्कृतैर्यः।
श्रीमत्समाधीशमहेश्वरस्य प्रसादतोऽसौ चिरजीविनोऽस्तु॥
वी[जलस्य] सुतः शिल्पी मनाख्यः सूत्रधारकः।
तस्यात्मजेन वीसेन प्रशस्तिरियमुत्कृता॥
रुचिराक्षरमुत्कीर्णा प्रशस्तिरियमुज्व(ज्ज्व)ला।
लिलेख वीसलः शिल्पी समाधीशप्रसादतः॥
संवत् १४८९ वर्षे माघसुदि (३) गुरुदिने·······

(एपिग्राफिआ इण्डिका—२।४१०—२१)

---

(१२९)

[1]श्रीकुन्तीमाधवभगवन्मन्दिरस्तम्भोत्कीर्णा प्रशस्तिः।

श्रीकान्तस्य निजोदरान्तरचरद्ब्रह्माण्डखण्डावन-
व्यापाराभिरतस्य वेद[शिर]सामावासभूमेर्हरेः।
नाभ्यम्भोरुहगह्वरापवरकादाविर्बभूवात्मभू-
र्भूतादिप्रकटप्रपञ्चरचनादक्षः पुराणोऽव्ययः॥
तत्पादाम्बुरुहान्महेन्द्रविनुताज्जज्ञे चतुर्थान्वय-
स्त्रैलोक्यैकगुरोर्हरेः पदतलाद्गङ्गाप्रवाहो यथा।
तस्मिन्विस्मितसूरिसंहतिनुतोऽभूदिन्द्रसेनो नृपो
राजा धर्मसुतेन संगरविधि[ः] प्रीतेन पुत्रीकृतः॥

---

१. प्रशस्तिरियं गोदावरीतीरे पिठापुरनाम्नि ग्रामे कुन्तीमाधवनामकविष्णुमन्दिरमस्ति तत्र स्तम्भे उत्कीर्णेयमस्ति. सा च पृथ्वीश्वरदेवमहीपाललेखिता वर्तते इति. इयं च E. HULTZSCH, PH. D. महाशयैः प्रकाशिता.

प्रीतिः श्वेतातपत्रं कनकविरचितं दण्डमाखण्डलाभो
व्योम्नि क्षौमं वितानं सकलनृपजनप्रार्थ्यसिंहासनार्धम् ।
नानावादित्रशङ्खध्वनिभिरभिनुतां मङ्गलालत्तिकां च
प्रादाद्धर्मात्मजोऽस्मात्तुहिनचयसिते चामरे चारुरूपे ॥
अशेषसुखसंभोगभागधेयैकभा[ज]नम् ।
मध्यदेशेऽभवत्तस्य स्थानं कीर्तिपुरं महत् ॥
सोऽयं धर्मनृपालदत्तनिखिलक्ष्मापालचिह्नश्रियं
राजत्प्राज्ययशोवितानरुचिभिर्भूमण्डलं मण्डयन् ।
कुर्वन्सर्वसुधीधियः प्रमुदितास्तारागणैर्वावृतो
राजाराजत चातुरङ्गपृतनासंवेष्टितोऽस्मिन्पुरे ॥
यातेषु केषुचिदशेषधराधिपेषु तद्वंशजेषु विजितारिपराक्रमेषु ।
जज्ञे नयज्ञजनसंसदि कीर्तनीयः शास्ता समस्तजगतामथ कीर्तिवर्मा ॥
तद्वंशो मल्लवर्माभूत्तत्सुतो रणदुर्जयः ।
वैरिणो रणरङ्गस्थमीक्षितुं यं न सेहिरे ॥
ततो निखिलभूपालमौलिलालितशासनः ।
कीर्तिवर्माभवत्तस्य पुत्रोऽभूद्रणदुर्जयः ॥
तत्पुत्रः कीर्तिवर्मा
अनेकहस्त्यश्वपदातिवर्गविनिर्जितारातिकुलः कलावान् ।
शशास पृथ्वीं प्रथितप्रतापस्तदात्मजो मल्लनृपोऽतिवीरः ॥
अथ त्रिनेत्रेण स पल्लवेन विधाय मैत्रीं विधिवद्विधिज्ञः ।
जिगीषया दक्षिणदेशमुच्चैः प्रतस्थिवानास्थितसिंहविक्रमः ॥
सोऽयं गङ्गकलिङ्गवङ्गमगधानन्ध्रान्पुलिन्दान्नृपा-
न्वीरः कुन्तलकेरलक्षितिपतीन्गौडान्सपाण्ड्याधिपान् ।
जित्वा भोजमराटलाटकटकान्दैत्यानिवाखण्डलो
राजाभ्राजत षट्सहस्रजगतीमासाद्य सत्यव्रतः ॥
विविधविभवराजद्राजसंवाभिरामं
निधिनिचयसमेतं सिद्धविद्याधराढ्यम् ।

पुरमिव धनदस्य श्रीनिवासैकभूमि-
र्धनदपुरसमाख्यं तस्य राज्ञो बभूव ॥
तत्रायं धनदपुरे मुरारितुल्यः कल्याणैः स्वकुलपरम्परानुयातैः ।
कौन्तेयात्समधिगतैर्महीपचिह्नैः संयुक्तोऽशिषदवनीं स मल्लभूपः ॥
तत एऋयवर्मा ततः कुडियवर्मा
तस्मान्मल्लमहीपतिः प्रतिबल[ध्वा]न्तौघघर्मद्युति-
र्जातोऽभून्निजखड्गखण्डितमहाचण्डाशनिः शाश्वतः ।
यो लोके गुणयोगतः पिडुवरादित्याभिधानं ययौ
दुष्प्रापं त्रिदशैरशेषजगतामीशैः समस्तैरपि ॥
तस्मादभूत्कुडियवर्मनृपः प्रमाथी
वैरिक्षितीशमदमानमनोरथानाम् ।
यद्युद्धभूमिषु मनीषितपूरुषाप्त्यै
गीर्वाणवारवनिता मुदिताश्चरन्ति ॥
तत्राखिलमहीचा[रु]पद्माकरसमृद्धिदः ।
विमलादित्यदेवोऽभूच्चालुक्यान्वयभूषणम् ॥
तस्याखिलक्षितिपमौलिकिरीटकोटि-
रत्नप्रभानिकरकान्तपदद्वयस्य ।
संग्रामभूमिषु चकार चिरं जिगीषोः
साहाय्यकं कुडियवर्मनृपोऽति[वी]रः ॥
ततः साहाय्यसंतुष्टः कुड्यवर्ममहीभृते ।
विमलादित्यभूपालो गुद्रवारद्वयं ददौ ॥
राजराजस्तु तत्पुत्रो राजराज इव स्वयम् ।
निखिलैश्वर्यदृप्तात्मा राजशेखरसंश्रयः ॥
सोऽयं सूर्यकुलामृतार्णवभवामम्मङ्ग्यम्बां सतीं
राजेन्द्रप्रियपुत्रिकां नृपवर[ः] श्रीराजराजस्तदा ।
नानाभूतसमस्तलोकविभवप्राप्तिप्रधानास्पदं
त्रैलोक्यैकगुरुर्यथा सरसिजां तत्रोपमेये हरिः ॥

अजनि निजभुजोद्यद्विक्रमाक्रान्तविश्व-
क्षितिभरणसमर्थः श्रीकुलोत्तुङ्गचोडः।
दिनकरमिव ताभ्यां यं कराकृष्यमाणा
प्रथित[ब]हलभासं राजलक्ष्मीः सिषेवे॥
तस्मादाविरभूद्वीरो वीरचोडः प्रतापवान्।
कुमारः कुपितारातिराजन्यमदभञ्जनः॥
श्रीकुलोत्तुङ्गचोडोऽपि पालयन्सकलामिलाम्।
वीरचोडकुमाराय प्रददौ वेङ्गिमण्डलम्॥
कुब्ज्यवर्ममहीपालः परिपाल्य वसुंधराम्।
स्वराज्यभारमखिलं स्वपुत्रे स नियुक्तवान्॥
एरयोऽभून्नृपस्तस्माद्भूत्रशत्रुपराक्रमः।
ततोऽभवन्नन्निराजः संहृतारातिसंहतिः॥
तस्य प्रपञ्चितसमञ्चितपुण्यकीर्तेः पञ्चाभवन्निजभुजार्जितराज्यभाजः।
पुत्राः पवित्रचरिता विदुराख्यगण्डगोङ्कक्षमाधिपतिमल्लयपण्डसंज्ञाः॥
तेषां गोङ्कमहीपालः पालयन्नन्ध्रमण्डलम्।
श्रीकुलोत्तुङ्गचोडाज्ञां दधानोऽप्यधिकं बभौ॥
पुत्रस्तस्य समस्तराजनिकरप्रोद्यत्किरीटद्युति-
श्रेणिः शोणपदस्य गोङ्कनृपतेः श्रीचोडभूपोऽजनि।
यद्बाहायुगपालिता वसुमती स्वास्थ्यं परं व्यानशे
रामे राजनि राजलोकविनुते यावत्सुखं मेदिनी॥
तस्य गोङ्कक्षितीशस्य भ्रातुर्गण्डस्य धीमतः।
बभूव विदुरो नाम तनयो विनयान्वितः॥
अथ मथितवैरियूथे प्रथितगुणे वीरचोडनरपाले।
शासति राज्यं वेङ्गीमण्डलमाखण्डलोपमे रेजे॥
तस्याखिलारिनरपालसमूहराज-
लक्ष्मीकचग्रहणलम्पटदक्षहस्तः।

श्रीवीरचोडनृपतेर्विदुरक्षितीशः
साचिव्यमाचरदयं चतुरप्रतापः ॥
विदुरो वीरचोडस्य शासनानुचरश्चिरम् ।
पाण्ड्यदेवं जिगायाजौ सामन्तगणसंयुतम् ॥

तस्मै श्रीवीरचोडक्षितिपतिरखिलक्ष्माभृतां विस्मिताना-
मग्रे सिंहासनार्धं सकलनृपजनप्रार्थितं संदिदेश ।
देशं चाशेषसस्यप्रचुरफलयुतं सिन्धुयुग्मान्तराख्यं
प्रादात्प्रीतस्य भूयो विदुरनृपतये पातितारातिराजे ॥

अथ पृथुतरकीर्तिः श्रीकुलोत्तुङ्गचोडः
परनृपकुलमाथं गोङ्कभूपालपुत्रम् ।
सुतमिव परिगृह्यागर्हणीयस्वभावं
स्वतनयजनचिह्नैश्चोडभूपं युयोज ॥

ततश्चोडमहीपाय सूनवे स नृपोत्तमः ।
प्रीतः षोडशसाहस्रं प्रददौ वेङ्गिमण्डलम् ॥

सोऽयं चोडक्षितीशः प्रतिनृपतिकुलोन्मूलनाभीलभीमः
श्रीमद्वेङ्गीधरित्रीमभिमतफलदां पालयञ्छैलधीरः ।
रेजे राजीवराजन्निजनयनयुगो योगगम्ये पुराणे
पुष्णन्विष्णावभीक्ष्णं निखिलनृपजनाभ्यर्चितो भक्तियुक्तिम् ॥

तस्य त्रिवर्गसहचर्यतिमात्रपूर्णे
तारापतिप्रतिमवक्त्ररुचिः प्रियाभूत् ।
लक्ष्मीरिवाक्षयगुणा पतिदेवतानां
गुण्डाम्बिका धुरि सदा परिकीर्तनीया ॥

ताभ्यां शचीवासवसन्निभाभ्यामशेषलोकस्थितिहेतुभूतः ।
श्रीगोङ्कभूपोऽजनि राजलोककिरीटकोटीविलसन्निदेशः ॥

यद्युद्धेऽभिमुखा हताः किल पुरा देवत्वमाप्ता द्विषः
श्रुत्वा वारिधरध्वनी[न्] घनपथे लोकान्तरस्था अपि ।

तद्युद्धोद्यमभूरिभैरववृहद्भेरीरवाशङ्कया
कार्येष्वीप्सितसिद्धिमस्य नितरामाशीर्भिराशासत ॥
येनाखिलक्षितितलत्रिदशालयानां
कूटेषु हाटकमया घटिता विरेजुः ।
कुम्भाः स्वकीयजयघोषणसंप्रयुक्त-
स्तम्भा इवाभ्रचर[सं]स्तुतकीर्तिनैव ॥
येन श्रीमद्भीमनाथस्य चक्रे शार्ङ्गं धाम प्रस्थितायाः स्वकीर्तेः ।
हेम्नो भूम्ना पादविन्यासहेतोः प्रासादाग्र्यं व्योमनि श्रेणिकेव ॥
यस्य श्रीकालहस्त्यद्रिमहेन्द्राचलमध्यगाः ।
भूपाः पुण्यप्रवीणस्य किङ्करा गोङ्कभूपतेः ॥
तस्य त्रिलोकगणनीयगुणाभिरामा
रामाजनेषु रमणीयविशेषमूर्तिः ।
सर्वाम्बिका तनुमती वसुधैव साक्षा-
दक्षीणपुण्यनिचया खलु धर्मपत्नी ॥
जातस्ताभ्यां परपुरजयी शूलपाणेरिवांशो
विद्वत्संघस्तुतशुभगुणो जन्मभूमिः कलानाम् ।
यन्नामैवाखिलरिपुकुलोत्सादकृन्मन्त्र उक्तो
दातार्थिभ्योऽर्थितगुरुतरं वीरराजेन्द्रचोडः ॥
येनाम्भोराशिभीमभ्रमितजलमिलद्ग्राहपाठीनसंव-
प्रेङ्खत्कल्लोलमालाकलुषमनिमिषैः खातमादौ सरस्तत् ।
निःशेषं शोषयित्वावधि जलधिजलं कुम्भयोनिर्यथाद्यो(?)
भीमो भीतिं वितन्वन्द्रुतमितजगतां रावणो राघवेण ॥
यस्याविखण्डितविजृम्भितपुण्डरीक-
खण्डप्रभापटलपाण्डुतरेण नित्यम् ।
संछादिता वसुमती यशसा बभास
छत्रेण मौक्तिकमयेन विभूषितेव ॥

येनाराधनसाधनानि दधिरे भीमेश्वरस्यालये
सौवर्णान्यतिदीप्ररत्ननिकरैर्हेमप्रभा चार्पिता ।
यस्त्वक्षीणसुवर्णभारघटितं सद्रुक्मपीठस्थितं
कृत्वेन्द्रादिगणान्गुणैरतिययौ श्रीभीमनाथं मुदा ॥

कनत्कनकसंदोहकृतं मकरतोरणम् ।
योऽदाद्बालेन्दुचूडाय दाक्षारामनिवासिने ॥

विद्युल्लतेव जगतीतलसंचरिष्णु-
रानन्ददा शशिकलेव सतां नितान्तम् ।
अक्काम्बिकेति तरुणीजनरत्नभूता
जाया स तस्य जगतीपतिसत्तमस्य ॥

जातस्ताभ्यां शिवाभ्यामिव सकलजगद्रक्षणैकान्तदक्षैः
साक्षाद्देवः कुमारः सकलनृपकलाकोविदो गोङ्कभूपः ।
यद्वैरिक्षोणिपालाः क्षणमपि निखिले क्ष्मातले नाप्तवन्तः
पादन्यासावकाशं वियति विदधिरे धाम तद्योग्यरूपाः ॥

यमर्थिसार्थाभिमतार्थदं क्षितौ क्षीणारिभूपालमवेक्ष्य नूनम् ।
स्वस्थोऽभवत्कल्पकभूरुहश्चिरं राजेन्द्रचोडप्रियपुत्रमुच्चैः ॥

संजीवनीव सकलस्य जनस्य नित्यं
रक्षाविधानचतुराभवदस्य पत्नी ।
लोकेषु यच्चरितमेव वदन्ति सन्तः
शास्त्रं नियामकमशेषसतीजनस्य ॥

या पर्वतापरमहीनृपवंशदुग्ध-
रत्नाकरादुदभवज्जगतां भवाय ।
पद्मालयेव हरिपादसरोजसक्ता
जायाम्बिकानिखिलसंपदवाप्तिहेतुः ॥

आस्थानमण्डपमखण्डितभोगभोग्यं
स्तम्भैः स्फुरत्परिकरैर्हरिनीलकान्तैः ।

श्रीपीठनामनि पुरे वसतोऽकरोद्या
　　कुन्तीमनोरथपथास्तिकरस्य विष्णोः ॥
प्राकारगोपुरमनोहरमेतदीयं
　　निर्माय देवनिलयं कमलालयं या ।
सुस्थाप्य तत्सहितमच्युतमर्हणाभि-
　　राराधयन्त्यभिमतानि फलान्यवाप्नोत् ॥
श्रीसिंहगिर्यधिपतेः परमस्य पुंसो
　　भक्तार्तिकर्तनविधानगृहीतमूर्तेः ।
हेमाङ्गनाम निखिलश्रुतिसारवेद्यं
　　प्रत्यक्षमक्रियत चारु यया जनस्य ॥
भास्वत्स्फाटिकशैलशृङ्गरुचिषु प्रोद्यत्प्रभामण्डला
　　डिण्डीरद्युतिदेवधामशिखरेष्वास्थापिता भूरिशः ।
सौवर्णः कलधौतभूध्रशिखरासीनस्य भानोर्ध्रुवं
　　बभ्रुर्विभ्रममभ्रचारिविनुताः कुम्भा गुणाढ्या यया ॥
ताभ्यां श्रीपृथिवीश्वरः स्वयमिवाशेषस्थितेः कारणं
　　देवः श्रीपृथिवीश्वरोऽजनि जनप्रस्तूयमानोदयः ।
यस्मिन्राजनि रक्षति क्षितितलं क्षीणारिवर्गे जनो
　　व्युत्पत्तिं रिपुचोरवादिषु न च प्राप्नोति शब्देष्वपि ॥
यस्यातिनिर्मलतरेण परीतमेत-
　　द्ब्रह्माण्डमाशु यशसा नितरां विभाति ।
धूमाङ्कधौतकलधौतकरण्डभाण्ड-
　　मध्यप्रविष्टमिव विष्टपवल्लभस्य ॥
यं गन्धसिन्धुरसमं सततप्रवृत्त-
　　दानार्द्रदक्षिणकरं किल वीक्ष्य नूनम् ।
दिक्कुम्भिनो निखिलभूभरणैकदक्षं
　　व्रीडामवाप्य खलु पाण्डुरतां भजन्ते ॥

ग्रामा विद्वज्जनेभ्यो विविधफलभरानम्रकम्रेद्धसस्या-
स्तीर्णास्तूर्णं तटाकास्तटवनकुसुमामोदितार्णः प्रपूर्णाः ।
देशे देशेऽब्धितुल्याः पृथुतरयशसा खानिता येन शश्व-
द्दत्ताश्चैवार्थसंघाः प्रियवचनसमं सूरिसंघेभ्य एव ॥
यात्राप्रारम्भशुम्भत्पटहपटुतरध्वानमाकर्ण्य तूर्णं
हित्वा देशां दिगन्तान्भयचकितदृशो व्याप्य यस्यारिसंघाः ।
किंस्वित्संवर्तमेघध्वनिरुत विकटप्रस्फुटत्काण्डघोषः
किं वा कल्पान्तवायुक्षुभितमिति मुहुश्चिन्तयन्तो भ्रमन्ति ॥
धर्मे धर्मजसंनिभेन जलधिस्तुल्योऽपि गाम्भीर्यतः
सन्मर्यादतया महत्त्वगुणतो रत्नाकरत्वादपि ।
क्षुभ्यत्पङ्ककलङ्ककल्मषतनुः क्षारस्वभावस्तुलां
नाम्नोद्धासुरमूर्तिनाखिलजगत्सेव्येन येनान्वहम् ॥
नित्यालंकृतसत्पथो बुधजनप्रार्थ्योदयोऽभीष्टदो
भक्तानामतुलप्रतापमहिमव्याप्ताखिलक्ष्मातलः ।
विश्वं लोकमनश्वरैर्निजकरैः पद्माकरं नन्दय-
ञ्श्रीपृथ्वीश्वरभूपतिर्विजयते भूमण्डले सूर्यवत् ॥
माता तस्य महीयसः सुरतरुच्छायेव संसेविना-
मिष्टार्थी ददती सती भगवते वेदान्तविद्यात्मने ।
श्रीधाम्ने नवखण्डवाडविदितं प्रोल्नाटिदेशे मुदा
विश्वस्य क्षितिमण्डलस्य तिलकं शालेयसंशोभितम् ॥
नागव्योमेन्दुरूपप्रमितशकशरन्मेषसंक्रान्तिकाले
पुण्ये पुण्यप्रवीणा विविधफलकुलालंकृतं ग्रामवर्यम् ।
श्रीपीठस्थाय शश्वच्छ्रुतिनिकरशिरोवर्तिने माधवाय
प्रादाद्द्रोङ्कक्षितीशप्रियतरमहिषी विष्णवे जायमाम्बा ॥

शकवर्षंबुलु ११०८ गुनेण्टि मेषसंक्रान्तिनिमित्तमुन श्रीपीठापुरमुन श्रीकुन्तीमाधवदेवरकुं ब्रोलु नाटिलोनि नवखण्डवाड अनियेडि ऊरु गृहक्षेत्रारामसहितमुगानखण्डमुन्नु श्रीमन्महामण्डलेश्वरवेलनाटिकुलोत्तुङ्ग-

राजेन्द्रचोडयराजुल कोडकुलु श्रीमन्महामण्डलेश्वरकुलोत्तुङ्गमन्मगोङ्करा-जुल महादेवुलु जायमदेवुलु हविर्बल्यर्चनार्थमुन्नित्यनैमित्तिकमासोत्सवसं-वत्सरोत्सवार्थमुन्नु गीतनृत्तवाद्यादिविविधभोगार्थमुङ्गानाचन्द्रार्कमुगानिच्चि-रि । तत्र स राजराजपरमेश्वरो राजपुरंदरः परममाहेश्वरः श्रीगोङ्कभूप-प्रियतनयः समधिगतसकलशास्त्रनयः पृथ्वीश्वरदेवमहीपालः खण्डितवि-रोधिमण्डलः प्रोलुनाटिविषयवासिनो राष्ट्रकूटप्रमुखान्सकुटुम्बिनः सर्वान्स-माहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकादिसमक्षमित्थमाज्ञापयति—अस्मन्मात्रा जायममहादेव्या प्रोलुनाण्टिविषये नवखण्डवाडनामा ग्रामो गृ-हक्षेत्रारामसहितो खण्डः श्रीपिठापुरवासिने भगवते श्रीकुन्तीमाधवदेवाय हविर्बल्यर्चनार्थं नित्यनैमित्तिकमासोत्सवसंवत्सरोत्सवाद्यर्थं गीतनृत्त-वाद्यादिविविधभोगार्थं च दत्त इति विदितमस्तु वः । अस्य ग्रामस्य सीमानः पूर्वतः पेरावुगट्टु सीमा । आग्नेयत इन्दुरावलु सीमा । दक्षिणतः सूरे गुण्डगट्टु सीमा । नैर्ऋततः डोङ्किसूडियालु सीमा । पश्चिमतः कोम्मिनायकुचेडवु तूर्पूगट्टु सीमा । वायव्यतः वड्डुविगरुवु सीमा । उत्तरतः पुट्टलत्रोव एङ्गट्टु सीमा । ऐशतः सब्वालरावि सीमा । ई धर्मुवुनकुनेब्बरु विघ्नमु सेसिरेनि वारु पञ्चमहापातकमु सेसिन पापमुनं बोदुरु गं(ग)कडत वेयि गोवुलनुं वेवुरु ब्राह्मलनु बन्धिच्चिन पाप-मुनं बोदुरु ।

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥

इति व्यासवचनाच्चायं धर्मः परिपालनीयः ।

शत्रुणापि कृतो धर्मः पालनीयं प्रयत्नतः ।
शत्रुरेव हि तच्छत्रुर्धर्मशत्रुर्न कस्यचित् ॥

तस्मादयं धर्मः सर्वैः परिपालनीयः ।

श्रीपृथ्वीश्वरभूपालनिदेशवशवर्तिना ।
अय्यपिल्लार्यवर्येण कृता शासनपद्धतिः ॥
श्रीपिठापुरसुन कण्टाचारलिखितम् ॥

(एपिग्राफिया इण्डिका—४ । ३९-४७)

---

(१३०)

श्रीशीलादित्यमहाराजनिर्मापितवापीप्रशस्तिपत्रम्[1] ।

ओं स्वस्ति । विजयस्कन्धावारात् खेटकवासकात् प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतः श्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभटार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खङ्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः **श्रीगुहसेनस्तस्य** सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजी-

---

१. अस्याः प्रशस्तेराधारभूतं संपुटितं ताम्रपत्रं काठियावाडदेशे गोहिलवाडप्रान्ते महुवापरिगणे लुसंडीग्रामे एकस्मिन्गृहे गोबन्धनाय कीलकखननसमये एकेन ब्राह्मणेन लब्धमासीत्. एतच्च ताम्रपत्रं गुर्जरभाषायां संक्षिप्तभूमिकां रचयित्वा Mr. Vajeshankar G. Oza महाशयेन Professor Bühler महाशयपार्श्वे प्रेषितमासीत्. अनेन च महाशयेन Th. von Schtscherbatskoi, Ph. D. एतन्महाशयपार्श्वे प्रेषितमासीत्. अनुपदोक्तमहाशयेन Mr. Vajeshankar G. Oza महाशयेन च संशोध्य व्याख्याय च प्रकाशितम्. समयश्चास्य गुप्तसंवत् ३५० (A. D. 669–70).

व्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः **श्रीधरसेन**स्तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतमण्डलाग्रद्युतिभासुरतरांसपीठोदूढगुरुमनोरथमहाभारः सर्वविद्यापरापरविभागाधिगमविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिः धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढधर्मादित्यद्वितीयनामा परममाहेश्वरः **श्रीशीलादित्य**स्तस्यानुजस्तत्पादानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणीयामपि राजलक्ष्मीं स्वधासक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकपरतयैवोद्वहन् खेदसुखरतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशीकृतनृपतिशतशिरोरत्नच्छायोपगूढपादपीठोऽपि परावज्ञाभिमानरसानालिङ्गितमनोवृत्तिः प्रणतिमेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायः कृतनिखिलभुवनामोदविमलगुणसंहतिः प्रसभविघटितसकलकलिविलसितगतिः नीचजनाधिरोहिभिरशेषैर्दोषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्रकौशलातिशयगणतिथविपक्षक्षितिपतिलक्ष्मीस्वयंग्राहकप्रकाशितप्रवीरपुरुषप्रथमसंख्याधिगमः परममाहेश्वरः **श्रीखरग्रह**स्तस्य तनयस्तत्पदानुध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्वसंपदा त्यागौदार्येण च विगतानुसंधानाशमाहिताराातिपक्षमनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरणप्रत्ययोदग्रबाहुदण्डविलङ्घितनिखिलप्रतिपक्षदर्पोदयः स्वधनुःप्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनः परममाहेश्वरः **श्रीधरसेन**स्तस्यानुजस्तत्पादानुध्यातः सच्चरितातिशयितसकलपूर्वनरपतिरतिदुःसाध्या-

नामपि प्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परिवृद्धगुणानुराग-
निर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगतकलाकलापः
कान्तिमान्निर्वृतिहेतुरकलङ्कः कुमुदनाथः प्राज्यप्रतापस्थगितदिगन्तराल-
प्रध्वंसितध्वान्तराशिः सततोदितः सविता प्रकृतिभ्यः परं प्रत्ययमर्थवन्त-
मतिबहुतिथप्रयोजनानुबन्धमागमपरिपूर्णं विदधानः संधिविग्रहसमासनि-
श्चयनिपुणः स्थानेऽनुरूपमादेशं ददद्गुणवृद्धिविधानजनितसंस्कारः साधूनां
राज्यशालातुरीयतन्त्रयोरुभयोरपि निष्णातः प्रकृष्टविक्रमोऽपि करुणामृदुहृ-
दयः श्रुतवानप्यगर्वितः कान्तोऽपि प्रशमी स्थिरसौहृदोऽपि निरसिता
दोषवतामुदयसमयसमुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथित-
बालादित्यद्वितीयनामा परममाहेश्वरः **श्रीध्रुवसेन**स्तस्य सुतस्तत्पादपद्म-
प्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकलः शिशुभाव एव
श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतिविशेषः प्रदानसलिलक्षालिताग्र-
हस्तारविन्दः कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः
कार्मुके धनुर्वेद इव संभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलो-
त्तमाङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरः परमभट्टारकमहाराजाधि-
राजपरमेश्वरचक्रवर्ती **श्रीधरसेन**स्तत्पितामहभ्रातृ**श्रीशीलादित्य**स्य शा-
र्ङ्गपाणेरिवाङ्गजन्मनो भक्तिबन्धुरावयवकल्पितप्रणतेरतिधवलया दूरं तत्पा-
दारविन्दप्रवृत्तया नखमणिरुचा मन्दाकिन्येव नित्यममलितोत्तमाङ्गस्या-
गस्त्यस्येव राजर्षेर्दाक्षिण्यमातन्वानस्य प्रबलधवलिम्ना यशसां वलयेन
मण्डमण्डितककुभा नभसि यामिनीपतेर्विडम्बिताखण्डपरिवेषमण्डलस्य
पयोदश्यामशिखरचूचुकरुचिरसह्यविन्ध्यस्तनयुगायाः क्षितेः पत्युः **श्रीडे-
रभटस्या**ङ्गजः क्षितिपसंहतेरनुरागिण्याः शुचियशोंशुकभृतः स्वयंवरमा-
लामिव राज्यश्रियमर्पयन्त्याः कृतपरिग्रहः शौर्यमप्रतिहतव्यापारमानमित-
प्रचण्डरिपुमण्डलं मण्डलाग्रमिवालम्बमानः शरदि प्रसभमाकृष्टशिलीमु-
खबाणासनापादितप्रसाधनानां परभुवां विधिवदाचरितकरग्रहणः पूर्वमेव
विविधवर्णोज्ज्वलेन श्रुतातिशयेनोद्भासितश्रवणः पुनः पुनरुक्तेनेव रत्ना-

लंकारेणालंकृतश्रोत्रः परिस्फुरत्कटकविकटकीटपक्षरत्नकिरणमविच्छिन्नप्रदानसलिलनिवहावसेकविलसन्नवशैवलाङ्कुरमिवाग्रपाणिमुद्वहन् धृतविशालरत्नावलयजलधिवेलातटायमानभुजपरिष्वक्तविश्वंभरः परममाहेश्वरः **श्रीध्रुवसेन**स्तस्याग्रजोऽपरमहीपतिस्पर्शदोषनाशधियेव लक्ष्म्या स्वयमतिस्पष्टचेष्टमाश्लिष्टाङ्गयष्टिरतिरुचिरतरचरितगरिमपरिकलितसकलनरपतिरतिप्रकृष्टानुरागरसरभसवशीकृतप्रणतसमस्तसामन्तचक्रचूडामणिमयूखखचितचरणकमलयुगलः प्रोद्दामोदारदोर्दण्डदलितद्विषद्वर्गदर्पः प्रसर्पत्पटीयःप्रतापप्लोषिताशेषशत्रुवंशः प्रणयिपक्षनिक्षिप्तलक्ष्मीकः प्रेरितगदोत्क्षिप्तसुदर्शनचक्रः परिहृतबालक्रीडोऽनधःकृतद्विजातिरेकविक्रमप्रसाधितधरित्रीतलोऽनङ्गीकृतजलशय्योऽपूर्वपुरुषोत्तमः साक्षाद्धर्म इव सम्यग्व्यवस्थापितवर्णाश्रमाचारः पूर्वैरप्युर्वीपतिभिस्तृष्णालवलुब्धैर्यान्यपहृतानि देवब्रह्मदेयानि तेषामप्यतिसरलमनःप्रसरमुत्संकलनानुमोदनाभ्यां परिमुदितत्रिभुवनाभिनन्दितोच्छ्रितोत्कृष्टधवलधर्मध्वजप्रकाशितनिजवंशो देवद्विजगुरुं प्रति यथार्हमनवरतप्रवर्तितमहोद्रङ्गादिदानव्यसनानुजातसंतोषोपात्तोदारकीर्तिपङ्क्तिपरम्परादन्तुरितनिखिलदिक्चक्रवालः स्पष्टमेव यथार्थ**धर्मादित्या**परनामा परममाहेश्वरः **श्रीखरग्रह**स्तस्यानुजन्मनः कुमुदखण्डश्रीविकासिन्या कलावतश्चन्द्रिकयेव कीर्त्या धवलितसकलदिङ्मण्डलस्य खण्डितागुरुविलेपनपिण्डश्यामलविन्ध्यशैलविपुलपयोधराभोगायाः क्षोण्याः पत्युः **श्रीशीलादित्यस्य** सूनुर्नवप्रालेयकिरण इव प्रतिदिनसंवर्धमानकलाचक्रवालः केसरीन्द्रशिशुरिव राजलक्ष्मीमचलवनस्थलीमिवालंकुर्वाणः शिखण्डिकेतन इव रुचिमच्चूडामण्डनः प्रचण्डशक्तिप्रभावश्च शरदागम इव प्रतापवानुल्लसत्पद्मः संयुगे विदलयन्नम्भोधरानिव परगजानुदय एव तपनबालातप इव संग्रामे मुष्णन्नभिमुखानामायूंषि द्विषतां परममाहेश्वरः **श्रीशीलादित्यः** कुशली सर्वानेव समाज्ञापयति—अस्तु वः संविदितम् । यथा मया मातापित्रोः पुण्याप्यायनाय द्वीपविनिर्गततच्चातुर्विद्यसामान्यडौण्डव्यसगोत्रवाजसनेयिसब्रह्मचारिब्राह्मणधनपतिपुत्रब्राह्मणभट्टीश्वराभ्यां सोदरभ्रा-

तृभ्यां सुराष्ट्रेषु मधुमतीद्वारे देसेनकग्रामे पूर्वसीम्नि पञ्चपञ्चाशद्भूपादावर्तपरिसरा वापी। यस्या आघाटनानि—पूर्वतः पिञ्छकूपिकावहः, दक्षिणतः ब्राह्मणबावप्रत्ययक्षेत्रं मल्लतटाकश्च, अपरतः ग्रामनिपानकूपकः, उत्तरतः मूलवर्मपाटकग्रामसीमा, तथा पूर्वदक्षिणसीम्नि कविट्ठिकाक्षेत्रखण्डं सप्ततिभूपादावर्तपरिमाणम्, यस्य पूर्वतः विशालपाटकग्रामसीमा, दक्षिणतः शिवत्रात इज्जतग्रामसीमा, अपरतः विशालपाटकग्रामसीमा, उत्तरतः विशालपाटकग्रामसीमा, तथा एतत्सीम्नि द्वितीयक्षेत्रखण्डमुच्चासंज्ञितनवतिभूपादावर्तपरिमाणम्, यस्य पूर्वतः विशालपाटकग्रामसीमा, दक्षिणतः विशालपाटकग्रामसीमा, अपरतः पिञ्छकूपिकावहः, उत्तरतः थेरकसत्कौटुम्बक्षेत्रम्, तथा पूर्वसीम्नि तृतीयखण्डं विंशतिभूपादावर्तपरिमाणम्, यस्य पूर्वतः माणइज्जिका नदी, दक्षिणतः बप्पकप्रकृष्टक्षेत्रम्, अपरतः ब्राह्मणस्कन्दसत्कब्रह्मदेयक्षेत्रम्, उत्तरतः ईश्वरप्रत्यक्षेत्रम्, एवमिदमाघाटनविशुद्धं वापीसमन्वितं क्षेत्रखण्डत्रयं सोद्रङ्गं सोपरिकरं सभूतवातप्रत्यायं सधान्यहिरण्यादेयं सदशापराधं सोत्पद्यमानविष्टिकसर्वराजकीयानामहस्तप्रक्षेपणीयं पूर्वप्रत्तदेवब्रह्मदेयरहितं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयभोग्यमुदकातिसर्गेण धर्मदायो निसृष्टः । यतस्तयोः समुचितया ब्रह्मदेयस्थित्या भुञ्जतोः कर्षतोः कर्षयतोः प्रदिशतोर्वा न कैश्चिद्व्यासेधे वर्तितव्यम्। आगामिभद्रनृपतिभिरप्यस्मद्वंशजैरन्यैर्वा अनित्यान्यैश्वर्याण्यस्थिरं मानुषं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति। उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य सदा फलम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
षष्टिं वर्षसहस्राणां स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकोऽत्र राजपुत्रध्रुवसेनः।

लिखितमिदं संधिविग्रहाधिकृतदिविरपतिश्रीस्कन्दभटपुत्रदिविरपति-श्रीमदनहिलेनेति। सं. ३००।१० फाल्गुन व. ३ स्वहस्तो मम।

(एपिग्रांफिया इण्डिका—४।७६-८१)

---

(१३१)

मल्लिदेवमन्मसत्यमहाराजयोः प्रशस्तिपत्रम्।

श्रीभर्तुर्नाभिगम्भीरसरःसरसिजादभूत्।
पद्मभूर्भूतलोकानामेकस्मादुद्भवो यतः॥
मानसस्तस्य पुत्रोऽत्रिरत्रेरमृतदीधितिः।
सोमश्चूडामणिः सोमवंशकर्ता ततो बुधः॥
ततः पुरूरवा नाम चक्रवर्ती सुविक्रमः।
तस्मादायुरभूत्तस्मान्नहुषोऽथ पुरुस्ततः॥

ततो जनमेजयस्ततः प्राचीशस्तस्मात्संयातिः सार्वभौमस्ततो महाभीमः। इत्थमनेकनरपतिषु गतेषु पाण्डुर्नाम नरपतिरुद्बभूव। पुत्रास्तस्य धर्मभीमार्जुननकुलसहदेवाः पञ्चेन्द्रियवत्पञ्च स्युर्विषयग्राहिणः। तत्र—

येनादाहि विजित्य खाण्डवमठो गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालावि(भि)दैत्यान्बहून्।
इन्द्रार्धासनमध्यशायि जयिना यत्कालकेयादिका-
ञ्जित्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः॥

ततोऽर्जुनादभिमन्युस्ततः परीक्षित्ततो जनमेजयस्ततः क्षेमकस्ततो नरवाहनस्ततः शतानीकस्तत उदयनस्ततप्रतित्रि(भृ)तिष्वविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकोनषष्ठिचक्रिवर्तिषु गतेषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दै-

---

१. इयं च प्रशस्तिः पीठापुरग्रामे कुन्तीमाधवमन्दिरस्थकीर्तिस्तम्भे दक्षिणभागे प्रारब्धा पूर्वभागे समाप्ता चोपलभ्यते. सेयं E. Hultzsch, PH. D. महाशयेन प्रकाशिता. (1195-96 A. D.)

बदुरीहया लोकान्तरमगमत्। तस्मिन्काले महादेव्यन्तर्वत्नी पुरोहितेन सार्धं मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन **विष्णुभट्ट**सोमयाजिना दुहितृनिर्विशेषमभिरक्षिता सती नन्दनं **विष्णुवर्धन**मसूत। तस्य कुमारस्य मानव्यसगोत्रहारितीपुत्रद्विपक्षक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत्। स च मात्रा विदितवृत्तान्तः सन्निर्गत्य चालुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणगणांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिडक्कवराहालाञ्छनपिञ्छचकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडम्बगङ्गादिभूपान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास। तस्य पल्लवान्वयजातमहादेव्यां **विजयादित्यः** सुतोऽभूत्। ततः **पुलकेशी** ततः **कीर्तिवर्मा** ततः **सत्याश्रयविष्णुवर्धनौ** तयोर्ज्येष्ठः कुन्तलराजलक्ष्मीमग्रहीत्। इतरो वेङ्गीभुवं सोऽयम्। स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादासादितवरवराहलाञ्छनक्षणवशीकृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णुः **सत्याश्रयवल्लभेन्द्रस्य भ्राता** कुब्जविष्णुवर्धनोऽष्टादश वर्षाणि वेङ्गीदेशमपालयत्। तत्सुतो **जयसिंहवल्लभ**स्त्रयस्त्रिंशतं तदनुज **इन्द्रराजः** सप्त दिनानि तत्सुतो **विष्णुवर्धनो** नव वर्षाणि तत्सूनुर्**मङ्गियुवराजः** पञ्चविंशतिम् एवमविच्छिन्नचालुक्यक्षितिपालपरम्परया।

बभूव श्रीनिधी राजा राजराजमहीपतिः।
स्वनीत्या पालयत्युर्वीं स रत्नाकरमेखलाम्॥

अपि च।

कुले यदूनामजनिष्ट राजा हरिप्रभोर्हैहयनामधेयः।
ततः कृतार्थीकृतबन्धुलोकः कृती कृतज्ञः कृतवीर्य आसीत्॥

रोचिष्णुरथचक्रेण क्रान्तविश्वो यथा रविः।
स्फुरत्करसहस्रेण कार्तवीर्यस्ततोऽजनि॥

जीवत्युदारे सितकीर्तिमात्रकलेवरे भूयसि भूपवर्गे ।
ततस्ततोत्तुङ्गजगद्विभूतिरभीरभून्मुम्मडिभीमभूपः ॥
वल्लीव तन्वी तस्यासीच्छद्विदेवी वराङ्गना ।
तयोरग्रसुतो वेन्नभूपालोऽस्यानुजः सुखी ॥
श्रीमान्राजपङ्कुक्ष्मानाथः कोनमण्डलाधीशः ।
उपयेमे यः कुलजे लक्ष्मीतोण्डाभिके देव्यौ ॥
लक्ष्मीमुम्मडिभीमेशं राजेन्द्रचोडभूभुजम् ।
असूत तोण्डमाम्बा च सुतं सत्यमहीपतिम् ॥

सोऽयं राजेन्द्रचूडभूपतिः स्वपितामहेन श्रीमद्राजाधिराजराजेन्द्रचोडप्रसादाल्लब्धानि सिंहासनप्रतिढक्कापिञ्छकुन्तैकशङ्खाद्यखिलसाम्राज्यचिह्नानि समादाय वेङ्गीभुवो भर्ताभवत् ।

दग्ध्वा यः प्रबलप्रतापवडवासप्तार्चिषा विद्विषः
प्राप्तो विक्रमरुद्रतां निजकरस्पष्टीकृताशेषभूः ।
लोकस्वस्वसमस्तवृत्तिरगमद्यो **हैहयादित्यतां**
यातो यः खलु गण्डवेण्डङ्कवतां प्रोत्खण्डितारिश्रिया ॥
तस्याभवत्कुलस्त्रीणां विष्णोर्लक्ष्मीरिव प्रिया ।
मैलारदेवी महिषी योषिल्लोकविभूषणम् ॥
अस्याः सुतानां पञ्चानां ज्वलत्पञ्चाग्नितेजसाम् ।
अग्रजो **वेतभूपालो मल्लिदेवनृपो**ऽनुजः ॥
वेतभूपालकाज्जातौ गङ्गाश्रीबिम्बमाववयोः ।
सितकीर्ती सुतौ **मन्मचोडसूर्यक्षितीश्वरौ** ॥
निजकार्मुकनिर्मुक्तबाणनिर्मलितद्विषौ ।
सौभ्रात्रभुजवीर्याभ्यामुभौ राघवलक्ष्मणौ ॥
नृपकुलतिलको यः **कोनराजेन्द्रचोडः**
कृतसकलसुकृत्यो गण्डवेण्डङ्कवनाम्ना ।
द्विभुजमिह सह प्राकारकं कारयित्वा
शिवमलमत शैलं मण्डपं भीमनाथे ॥

तस्याग्रावरजन्मानौ जगद्विदितविक्रमौ ।
श्रीमन्मुम्मडिभीमेशसत्याश्रयमहीपती ॥
विभज्येमां भुवं भूयः पालयामासतुः स्वयम् ।
निजप्रतापदग्धारिमण्डलाधीशमण्डलौ ॥
तयोर्मुम्मडिभीमेशाल्लो**कभूपालको**ऽजनि ।
लोकालोकान्तरालानि शोभयन्निजतेजसा ॥
सत्येशाद्बलि**नौ** जातौ बलकृष्णसमौ नृपौ ।
श्रीमद्राजपण्डुश्रीकोनभीमक्षितीश्वरौ ॥
जातो राजपण्डोश्च पार्वतीवल्लभाद्भुवः ।
भर्ता श्रीवल्लभाधीशः क्षालयन्कलिकल्मषम् ॥
अनन्तरं पितुः श्रीमान्निजसिंहासनस्थितः ।
सोऽयं **लोकमहीपालः** पालयामास मेदिनीम् ॥
तथा **श्रीभीमभूपालः** पितुः सत्यमहीपतेः ।
राज्यलक्ष्मीं भुवा सार्धं दध्रे साक्षादिवाच्युतः ॥

धीरप्रद्वेषियोषिद्गणविरहजलापारधारास्त्यजन्ती
स्वज्योतिर्जालदृग्विभ्रमविहितमहामोहमग्नांस्तदीशान् ।
आलिङ्ग्यालिङ्ग्य कण्ठेष्वथ तदसुसमं सर्ववित्तं हरन्ती
भाति प्रौढाङ्गनेव स्वकरदृढगृहीतापि यत्खङ्गवल्ली ॥

तयोरनन्तरं क्षोणीमक्षतं परिरक्षतः ।
मल्लिदेवमहीपालवल्लभे(वे)शविशांपती ॥

यः प्रौढक्षितिपालमौलिमुकुटालंकारसिंहासनः
प्रोद्वृत्तारिपुरापरत्रिपुरहा भूधूर्धरः श्रीधरः ।
यश्चाशेषकलाकलापविभवः क्ष्माभारतीवल्लभः
संपद्भोगपुरंदरः क्षितिभृतां **श्रीमल्लिदेवाधिपः** ॥

श्रीवल्लभमहीपाल उण्डिकामनृपात्मजाम् ।
उपयेमेऽग्रमहिषीमचमाम्बेति विश्रुताम् ॥

तस्यामजनयत्पुत्रौ वंशवार्धिसुधाकरौ ।
मन्मसत्यमहीपालपण्डुनामक्षितीश्वरौ ॥

अपि च ।

स्वश्रीबाहुलताधृतासिलतिकामात्रैकमित्रो युधि
श्रीहस्तास्थितवारिराशिरशनालीलाब्जराज्यश्रियाम् ।
सत्यो नित्यरतो मतिप्रणिहितप्रत्यग्रनीतिः श्रुति-
स्मृत्युत्पादितधर्मकर्मनिरतानुष्ठाननिष्ठापरः ॥

चतुर्दश समाः श्रीमत्पुरुविक्रमचक्रिणि ।
वल्लभक्षोणिपाले च राज्यं कृत्वा दिवं गते ॥
ततस्तदात्मजः **श्रीमान्मन्मसत्यमहीपतिः** ।
पितुः सिंहासनारूढः प्रौढारिवडवानलः ॥
अर्थिसंदोहमन्दारः कामिनीमकरध्वजः ।
प्रतिक्षत्रियनक्षत्रप्रभाविभ्रमभानुमान् ॥
अक्षीणगुणमाणिक्यधीगभीरमहार्णवः ।
ब्रह्माण्डमण्डनाखण्डकीर्तिधामसुधाकरः ॥
समस्तभुवनाधारधीरताकाञ्चनाचलः ।
अनन्तकान्तिसंतानलक्ष्मीलक्ष्मीनिकेतनः ॥

सोऽयं **मल्लिदेव**क्षितिपतिर्यश्चैष वल्लभेन्द्रस्य तनयः **मन्मसत्येश्वरः**, उभौ सह संभूय गुद्दवादिविषयराष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्वान्समाहूये-त्थमाज्ञापयतः । विदितमस्तु श्रीगुद्दवादिविषये ओदियूरुनामग्रामोऽस्माभिः श्रीपीठापुरीनिवासिने श्रीकुन्तीमाधवदेवाय सर्वकरपरिहारेण दत्त इति ।

अपि च ।

गाढारूढो निरूढोन्नतिधनधनितप्रौढविद्वेषिसाल-
स्कन्धास्कन्धान्तराणि स्फुरदसुलतिकाजिह्वया विद्धमृद्धम् ।
पायं पायं तदीयात्यलघुलसदसुस्पर्शनं शोचते य-
द्बाहुर्भोगेन्द्रलीलः प्रधनभुवि कुलोत्तुङ्गपृथ्वीश्वरस्य ॥

माता या जायमाम्बा सकलकुलसतीसत्तमोत्तुङ्गकीर्ति-
मूर्तीभूता गरुत्मद्ध्वजपदजलजद्वन्द्वसद्राजहंसी ।
या श्रीमन्मन्मगोङ्कक्षितिपवरविभोर्धर्मपत्नी तयोच्चैः
स्वस्याः सद्भक्तिसाक्षीकृतविमलशिला मन्दिरालंकृतायाः ॥

शकवर्षंवुलु गुर्नेंदि मेषसंक्रान्तिनिमित्तमुन श्रीपिठापुरमुन श्रीकुन्ती-माधवदेवरकुगुद्दवादिलीनि ओदियूरनियेडि ऊरु गृहक्षेत्रारामसहितमु गलानखण्डमुनु श्रीमन्महामण्डलेश्वरकोनमल्लिदेवराजुनु वल्लभराजु को-ड्कुमन्मसत्ति राजुनु हविर्वल्लयर्चनार्थमु नित्यनैमित्तिकमासोत्सवसंवत्स-रोत्सवार्थमुनु गीतनृत्यवाद्यादिविविधभोगार्थमुंगानिच्चिरि अस्य ग्रामस्य सीमानः पूर्वतः वलेंगुएगुदयसीमा । आग्नेयतः वेलेगुनएनिक अलमुन भोडतातकालिय सीमा । दक्षिणतः श्रीपादमुलुपल्लि सीरिपुरमुन मय्यनि-कुट्ट वेमुगुण्डय सीमा । कोल्कुरु कु नलंजेवु कोम्मुन गुण्डय पट्टि वच्चि । नैर्ऋततः एनुंगुदल कोप्पल्लि पोलमुन मय्यनकुट्टन पुल्लिगुट्टय सीमा । पश्चिमतः कोप्पल्लि तुर्पुन कवलगुंट्टल सीमा । वायव्यतः चनुपकल्य वयलि केशवचंदुचेवु तुर्पुन गट्टयवु गट्टय सीमा । उत्तरतः संप्पर पोलमुन भी-मराजुचेवु दक्षिणमु गट्टय सीमा । उप्पुटे नु नक्कलकालियं गलसिन मय्य-निकुट्ट मेरगानु वच्चि । ऐशानतः उप्पुटेटि दक्षिणमुन गट्टु वट्टि वच्चि वेलेग्गुन प्रेमुलवक्कय सीमा । ई धम्मवुनकुनेव्वरु विलंबमु सेसिरेनि वारुपञ्चमहापातकमु सेसिन पापमुनं वोदुरु गंग्गकत वेयि कविललनु वेवुरु ब्राह्मणुलनु वधिंच्चिन पापमुनं वोदुरु ।

बहुभिर्वसुंधरा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

इति व्यासवचनाच्चायं धर्मः परिपालनीयः ।

शत्रुणापि कृतो धर्मः पालनीयः प्रयत्नतः।
शत्रुरेव हि शत्रुर्न धर्मः शत्रुर्न कस्यचित् ॥

तस्मादयं धर्मः सर्वैः परिपालनीयः।
श्रीपीठापुरमुनकंटाचार्यलिखितम् ॥

(एपिग्राफिया इण्डिका—४। ८७-९३)

---

(१३२)

श्रीवेङ्कटपतिरायशासनपत्रम्[१]।

यस्य संपर्कपुण्येन नारीरत्नमभूच्छिला।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम्।
विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥
जयति क्षीरजलधेर्जातं सव्येक्षणं हरेः।
आलम्बनं चकोराणाममरायुष्करं महः ॥

पौत्रस्तस्य **पुरूरवा बुध**सुतस्तस्या**यु**रस्यात्मजः
संजज्ञे **नहुषो ययाति**रभवत्तस्माच्च **पूरु**स्ततः।
तद्वंशे **भरतो** बभूव नृपतिस्तत्संततौ **शंतनु**-
स्तत्तुर्यो **विजयोऽभिमन्यु**रुदभूत्तस्मात्**परीक्षि**त्ततः ॥

नन्दस्तस्याष्टमोऽभूत्समजनि नवमस्तस्य राज्ञश्चळिक्क-
क्ष्मापस्तत्सप्तमः श्रीपतिरुचिरभवद्राजपूर्वो नरेन्द्रः।

---

१. इदं शासनपत्रं ताम्रपत्रे लिखितं प्रथमं Sir Walter Elliot महाशयेन मषीचिह्नितं प्रतिकृतम्. तत्रैकं तु Dr. Burgess महाशयतः, अपरं तु Dr. Fleet महाशयतः प्राप्तम्. यद्यपि Dr. Burnell महाशयकृतसंक्षिप्तव्याख्यानसहितोऽयं लेखः प्राक् Indian Antiquary द्वितीयभागे मुद्रितः, तथापि विजयनगरराज-कुलमधिकृत्य दाक्षिणात्यग्रन्थकर्तृपण्डितवरश्रीमदप्पयदीक्षितसमयनिर्णयायात्र पुनर्मु-द्रितः, इति E. HULTZSCH, PH. D. महाशयाः प्रकाशकाः. (A. D. 1601)

तस्यासीद्द्विज्जलेन्द्रो दशम इह नृपो **वीरहेमाळिराय**-
स्तार्तीयीको मुरारौ कृतनतिरुदभूत्तस्य **मायापुरीशः** ॥
तत्तुर्योऽजनि **तातपिन्नममहीपालो** निजालोकन-
त्रस्तामित्रगणस्ततोऽजनि हरन्दुर्गाणि सप्ताहितात् ।
अह्नैकेन च **सोमिदेवनृपतिस्तस्यैव** जज्ञे सुतो
वीरो **राघवदेवरा**डिति ततः श्री**पिन्नमो**ऽभून्नृपः ॥
आरवीटिनगरीविभोरभूदस्य बुक्कधरणीपतिः सुतः ।
येन **साळुवनृसिंहराज्यमेधमानमहसा** स्थिरीकृतम् ॥
स्वःकामिनीः स्वतनुकान्तिभिराक्षिपन्तीं
बुक्कावनीपतिलको बुधकल्पशाखी ।
कल्याणिनीं कमलनाभ इवाब्धिकन्यां
बल्लाम्बिकामुदवहद्बहुमान्यशीलाम् ॥
सुतेव कलशाम्बुधेः सुरभिलाशुगं माधवा-
त्कुमारमिव शंकरात्कुलमहीभृतः कन्यका ।
जयन्तममरप्रभोरपि शचीव **बुक्काधिपा**-
च्छ्रुतं जगति **बल्ल**मालभत **रामराजं** सुतम् ॥
सहस्रैः सप्तत्या सहितमपि यः सिन्धुजनुषां
सपादस्यानीकं समिति भुजशौर्येण महता ।
विजित्यादत्तेऽस्मादवनिगिरिदुर्गं विभुतया
विधूतेन्द्रः **कासप्पो(प्प)**डयमपि विद्राव्य सहसा ॥
कन्दनवोलिदुर्गमुरु कन्दळदभ्युदयो
बाहुबलेन यो बहुतरेण विजित्य हरेः ।
संनिहितस्य तस्य चरणाम्बुषु भक्ततया
ज्ञातिभिरर्पितं सुधयति स्म निषेव्य विषम् ॥
श्रीरामराजक्षितिपस्य तस्य चिन्तामणेरर्थिकदम्बकानाम् ।
लक्ष्मीरिवाम्भोरुहलोचनस्य **लक्काम्बिका**मुष्य महिष्यलासीत् ॥

तस्याधिकैः समभवत्तनयस्तपोभिः
श्रीरङ्गराजनृपतिः शशिवंशदीपः ।
आसन्समुल्लसति धामनि यस्य चित्रं
नेत्राणि वैरिसुदृशां च निरञ्जनानि ॥
सतीं **तिरुमलाम्बिकां** चरितलीलयारुन्धती-
प्रथामपि तितिक्षया वसुमतीयशो रुन्धतीम् ।
हिमांशुरिव रोहिणीं हृदयहारिणीं सद्गुणै-
रमोदत सधर्मिणीमयमवाप्य वीराग्रणीः ॥
रचितनयविचारं **रामराजं** च धीरं
वरतिरुमलरायं वेङ्कटाद्रिक्षितीशम् ।
अजनयत स एतानानुपूर्व्या कुमारा-
निह **तिरुमलदेव्या**मेव राजा महौजाः ॥
सकलभुवनकण्टकानरातीन्समिति निहत्य स **रामराज**वीरः ।
भरतमनु भगीरथादिराजप्रथितयशाः प्रशशास चक्रमुर्व्याः ॥
व्यराजत श्री**वरवेङ्कटाद्रिराजः** क्षितौ [1]लक्ष्मणचारुमूर्तिः ।
ज्याघोषदूरीकृतमे[2]घनादः कुर्वन्[3]सुमित्राशयहर्षपोषम् ॥
त्रिषु श्रीरङ्गक्ष्मापरिवृढकुमारेष्वधिरणं
विजित्यारिक्ष्मापांस्**तिरुमल**महाराजनृपतिः ।
महौजाः साम्राज्ये सुमतिरभिषिक्तो निरुपमे
प्रशास्त्युर्वीं सर्वामपि तिसृषु मूर्तिष्विव हरिः ॥
यशस्विनामग्रसरस्य यस्य पट्टाभिषेके सति पार्थिवेन्दोः ।
दानाम्बुपूरैरभिषिच्यमाना देवीपदं भूमिरियं दधाति ॥
अनन्तरं तत्तनयः प्रतीतश्चकास्ति हस्तापजितद्युशाखी ।
श्री**वेङ्गळांबा**चिरपुण्यराशिः श्री**रङ्गरायः** श्रितभागधेयः ॥

---

१. सौमित्रिवत् लक्षणैर्वा. २. इन्द्रजित्, स्तनितं वा. ३. दशरथपत्न्याः, शोभन-मित्राणां वा.

यथाविधि महीसुरोत्तमकृताभिषेकोत्सवे
यदीयकरवारिदे कनकवृष्टिदे सर्वतः ।
यशोमयतरङ्गिणी दशदिगन्तरे जृम्भते
सतां प्रशमितोऽभवत्कृपणतोरुदावानलः ॥

विद्वत्त्राणपरायणस्तदनुजः श्रीवेङ्गळांबापुरा-
पुण्योत्कर्षफलोदयस्तिरुमलश्रीदेवरायात्मभूः ।
संतानद्रुरिव स्थितः सुरगुरौ साम्राज्यसिंहासने
सर्वां शास्ति नयेन वेङ्कटपतिश्रीदेवरायः क्षमाम् ॥

यथा रघुकुलोद्वहः स्वयमरुन्धतीजानिना
स्वगोत्रगुरुणा सुधीतिलकतातयार्येण यः ।
यथाविधि यशस्विना विरचिताभिषेकक्षणा-
द्विभिद्य यवनाशरान्विजयते प्रशासन्महीम् ॥

श्रीवेङ्कटाम्बा वरराघवाम्बा पेदोपमाम्बा च कृष्णमाम्बा ।
कोडाम्बिका देव्य इमा भजन्ते शक्तित्रयी नीतिदया यथेमम् ॥

यस्यातिप्रथितौजसो रणमुखे सेनाभटैरुद्भटैः
साटोपाहृतसैन्धवद्विपघटाशस्त्रातपत्रादिमः ।
निर्विण्णो मलिकीभरामतनुभूः संप्राप्य गेहं महै-
र्मन्दः सन्महमन्दशाहु रयते सार्थाभिधामन्वहम् ॥

यस्मिन्नङ्गदनिर्विशेषमखिलामुर्वीं भुजे बिभ्रति
प्रीताः पन्नगमण्डलाधिपकुलक्षोणीभृतो निर्भराः ।
यस्मै भूवलयैकधूर्वहकलामाशंसमानाः सदा
सेवन्ते वृषशैलतामधिगताः श्रीवेङ्कटाद्रीश्वरम् ॥

वाराशिगाम्भीर्यविशेषधुर्यश्चौरासिदुर्गैकविभाळवर्यः ।
पराष्टदिग्रायमनः प्रकामभयंकरः शार्ङ्गधरान्तरङ्गः ॥

हतरिपुरनिमेषानोकहो याचकानां
होसविरुदरगण्डो रायराहुत्तमिण्डः ।

महितचरितधन्यो मंनियान्सासुलादि-
प्रकटितबिरुदश्रीः पाटितारातिलोकः ॥
सारवीररमया समुल्लसन्नारवीदिपुरहारनायकः ।
कुण्डलीश्वरमहाभुजः श्रयन्मण्डलीकधरणीवराहताम् ॥
वेङ्कत्रिभुवनीमल्लः संख्यक्षितिकलार्जुनः ।
उरिगोलसुरत्राणो हरिगोचरमानसः ॥
राज्ञां वरो रणमुखरामभद्र इति श्रुतः ।
वर्णितविरुदो नाना वर्णश्रीमण्डलीकगण्ड इति ॥
आत्रेयगोत्रजानामग्रसरो भूभुजामुदारयशाः ।
अतिबिरुदतुरगघट्टो मतिगुरुरारट्टमगधमान्यपदः ॥
शल्यारिनीतिशाली कल्याणपुराधिपः कलाचतुरः ।
चाळिक्कचक्रवर्ती माणिक्कमहाकिरीटमहनीयः ॥
एविरुदरायराहुतवेश्यैकभुजङ्गबिरुदमत्तश्रीः ।
रम्यतरकीर्तिरोड्डियरायदिशापट्टबिरुदघोषेण ॥
औषधिपत्युपमायितगण्डस्तोषणरूपजितासमकाण्डः ।
भाषेगेतप्पवरायगण्डः पोषणनिर्भरभूनवखण्डः ॥
राजाधिराजबिरुदो राजराजसमाहितिः ।
मूरुरायरगण्डाङ्को मेरुलङ्घियशोभरः ॥
परदारेषु विमुखः पररायभयंकरः ।
शिष्टसंरक्षणपरो दुष्टशार्दूलमर्दनः ॥
अरीभगण्डभेरुण्डो हरिभक्तिसुधानिधिः ।
इत्यादिबिरुदैर्बन्दितत्या नित्यमभिष्टुतः ।
जय जीवेति वादिन्या जनिताञ्जलिबन्धया ॥
काम्बोजभोजकालिङ्गकरहाटादिपार्थिवैः ।
प्रतीहारपदं प्राप्तैः प्रस्तुतस्तुतिघोषणः ॥
सोऽयं नीतिजितादिभूपतिततिः सुत्रामशाखी सुधी-
सार्थानां भुजतेजसा स्ववशयन्कर्णाटसिंहासनम् ।

आसेतोरपि चाहिमाद्रि विमतान्संहृत्य शासन्मुदा
सर्वोर्वी प्रचकास्ति वेङ्कटपतिश्रीदेवरायाग्रणीः ॥
शक्तिनेत्रकळम्बेन्दु(१९२३)गणिते शकवत्सरे ।
प्लवसंवत्सरे पुण्ये मासि वैशाखनामनि ॥
पक्षे वलक्षे पुण्यर्क्षे पुण्यायां द्वादशीतिथौ ।
श्रीवेङ्कटेशपादाब्जसंनिधौ श्रेयसां निधौ ॥
श्रीमच्छ्रीवत्सगोत्राय वरापस्तम्बसूत्रिणे ।
यशस्विने यजुःशाखाध्यायिनेऽभीष्टदायिने ॥
यजनादिमषट्कर्मभजनात्पावनात्मने ।
नित्यनैमित्तिकाचारनिर्मलस्वान्तवृत्तये ॥
मृष्टान्नदानसंतुष्टशिष्टाचारद्विजन्मने ।
अष्टादशपुराणार्थहृष्टाशयसरोरुहे ॥
अवताराय वाल्मीकेरंशाय च बृहस्पतेः ।
राजन्यास्थानरत्नाय रक्षिताशेषबन्धवे ॥
सूर्यदेवार्यभट्टस्य पौत्रायामिततेजसे ।
उर्पूटूरनन्तभट्टपुत्रायातियशस्विने ॥
तिरुवेंगळनाथार्यपौराणिकविपश्चिते ।
पडवीडुमहाराज्ये पुळुवूर्कोट्टके स्थितम् ॥
अरुगुन्नपरन्दागिसीमालक्ष्मीविभूषणम् ।
पेरितिमिरिनाडुस्थं कलवेपत्तुशोभितम् ॥
अरुगुन्नमहाग्रामप्राचीभागमुपाश्रितम् ।
संप्रोल्लसत्क्रूरपाडिदक्षिणस्यां दिशि स्थितम् ॥
श्रीचातूर्सत्रवाड्योस्तु पश्चिमाशामुपाश्रितम् ।
तिमिरिग्रामराजस्य कौबेरीं दिशमाश्रितम् ॥
ज्वरहर्लिंगसमुद्रायप्रतिनामसमन्वितम् ।
विळापाकाख्यसुग्रामं शोभितं शोभनैर्गुणैः ॥

सर्वमान्यं चतुःसीमासहितं च समन्ततः ।
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ॥
अक्षिण्यागामिसंयुक्तमेकभोज्यं सभूरुहम् ।
वापीकूपतटागैश्च कच्छारामैश्च संयुतम् ॥
पुत्रपौत्रादिभिर्भोज्यं क्रमादाचन्द्रतारकम् ।
दानाधमनविक्रीतियोग्यं विनिमयोचितम् ॥
परीतः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधैः श्रौतपथिकैरधिकैर्गिरा ॥
ख्यातानुकूलगोत्राब्धिसुधांशोर्महसां प्रभोः ।
शिवादिवादिमूर्धन्यशिवशास्त्राभिमानिनः ॥
महादेवमहीदेवप्रतिष्ठानिरतस्य ह ।
बल्लाळरायभूपालमनोभीतिप्रदायिनः ॥
विद्वज्जनहृदम्भोजकुलाभ्युदयभास्वतः ।
श्रीनेल्लूरिवीराख्यक्षेत्रस्थानवतः सदा ॥
वीरप्पनायकक्ष्मापपौत्रस्यामित्रकर्षिणः ।
वेलूरिवोंमनृपतेः पुत्रस्यातियशस्विनः ॥
श्रीमतो **लिङ्ग**भूपस्य विज्ञप्तिमनुपालयन् ।
श्रीवीरवेङ्कटप[1]**ति**महारायमहीपतिः ॥
सहिरण्यपयोधारापूर्वकं दत्तवान्मुदा ।
विद्वान्वेङ्गलभट्टाख्यो **रामया**भिधसूरिणे ॥
सभापतिवरायास्मै शिल्पिने **कामयाय** च ।
दत्तवान्भागमेकं तद्भोगाष्टकसमन्वितम् ।
शासनोल्लेखनद्रव्यनिमित्ताय द्वयोरपि ॥

---

१. 'अयं कुवलयानन्दमकरोदप्पदीक्षितः । नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः ॥' इति कुवलयानन्दसमाप्तिलेखतो ज्ञायते कुवलयानन्दाद्यनेकग्रन्थनिर्माता अप्पदीक्षितोऽस्यैव वेङ्कटपतेराश्रित इति. तेनास्य समय एव कुवलयानन्दादिनिर्मातुरप्पदीक्षितस्य समय इति.

श्रीवेङ्कटपतिरायक्षितिपतिवर्यस्य कीर्तिधूर्यस्य।
शासनमिदं सुधीजनकुवलयचन्द्रस्य भूमहेन्द्रस्य॥
वेङ्कटपतिरायगिरा सरसमभाणीत्सभापतेः पौत्रः।
कामकोटिसुतो रामकविः शासनवाङ्मयम्॥
श्रीवेङ्कटपतिरायक्ष्मापतिदेशेन कामयाचार्यः।
गणपयतनयः शासनमलिखदिदं वीरणानुजस्ताम्रम्॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम्॥
स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालनम्।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम्।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा॥
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः॥

(एपिग्राफिआ इण्डिका–४।२७२–२७८)

---

(१३३)

श्रीकर्णमहाराजानां शासनपत्रम्।

स जयति जगदुत्सवप्रवेशप्रथनपरः करपल्लवो मुरारेः।
लसदमृतपयःकणाङ्कलक्ष्मीस्तनकलशाननलब्धसंनिवेशः॥
जयति च गिरिजाकपोलविम्बादविगतपक्षविचित्रितां सभित्तिः।
त्रिपुरविजयिनः प्रियोपरोधाद्धृतमदनाभयदानशासनेव॥

---

१. **सातारा**नगरप्रान्तवर्ति **करहाड**ग्रामे कस्यचिज्जीर्णगृहस्य भूमेः खननसमये मिलितान्येतानि ताम्रपत्राणि पुणेनगरस्थानन्दाश्रमाध्यक्षेण आपटे इत्युपाख्येन हरिनारायणशर्मणा प्रेषितानि. तत्स्थमिदं शासनम्, इति **डा० रा० गो० भाण्डारकर**-महाशयाः प्रकाशकाः. (शकसं० ८८० A. D. 958.)

श्रीमानस्ति नभस्तलैकतिलकस्त्रैलोक्यनेत्रोत्सवो
देवो मन्मथबान्धवः कुमुदिनीनाथः सुधादीधितिः ।
निःशेषामरतर्पणार्पिततनुप्रक्षीणतालंकृते-
र्यस्यांशः शिरसा गुणप्रियतया नूनं धृतः शंभुना ॥

तस्माद्विकासनपरः कुमुदावलीनां
दोषान्धकारदलनः परिपूरिताशः ।
ज्योत्स्नाप्रवाह इव दर्शितशुद्धपक्षः
प्रावर्तत क्षितितले क्षितिपालवंशः ॥

अभवदतुलकान्तिस्तत्र मुक्तामणीनां
गण इव यदुवंशो दुग्धसिन्धूयमाने ।
अधिगतहरिनीलप्रोल्लसन्नायकश्री-
रशिथिलगुणसङ्गो भूषणं यो भुवोऽभूत् ॥

उद्वृत्तदैत्यकुलकन्दलशास्तिहेतु-
स्तत्रावतारमकरोत्पुरुषः पुराणः ।
तद्वंशजा जगति तुङ्गयशःप्रभावा-
स्तुङ्गा इति क्षितिभुजः प्रथिता बभूवुः ॥

क्षितितलतिलकस्तदन्वये च क्षतरिपुदन्तिघटोऽजनिष्ट **रट्टः** ।
तमनु च सुतराष्ट्रकूटनाम्ना भुवि विदितोऽजनि **राष्ट्रकूटवंशः** ॥

तस्मादरातिवनिताकुलचारुहार-
नीहारभानुरुदगादिह **दन्तिदुर्गः** ।
एकं चकार चतुरब्ध्युपकण्ठसीम
क्षेत्रं य एतदसिलाङ्गलभिन्नदुर्गः ॥

सुस्निग्धां घनपत्रसंचयकृतच्छायां मनोहारिणी-
मूढोदारफलां समाश्रितजनश्रान्तिव्यपोहक्षमाम् ।
यश्चालुक्यकुलालवालवलयादुद्धृत्य लक्ष्मीलतां
सिक्तां दन्तिमदाम्बुभिः स्थिरपदासक्तिं स्ववंशेऽकरोत् ॥

तस्मादपालयदिमां वसुधां पितृव्यः
श्रीकृष्णराजनृपतिः शरदभ्रशुभ्रैः।
यत्कारितेश्वरगृहैर्वसुमत्यनेक-
कैलासशैलनिचितेव चिरं विभाति॥

गोविन्दराज इति तस्य बभूव नाम्ना
सूनुः स भोगभरभङ्गुरराज्यचिन्तः।
आत्मानुजे निरुपमे विनिवेश्य सम्य-
क्साम्राज्यमीश्वरपदं शिथिलीचकार॥

श्वेतातपत्रत्रितयेन्दुबिम्बलोलोदयाद्रेः कलिवल्लभाख्यात्।
ततः कृतारातिमदेभभङ्गो जातो जगत्तुङ्गमृगाधिराजः॥

तत्सूनुरानतनृपो नृपतुङ्गदेवः
सोऽभूत्स्वसैन्यभरभङ्गुरिताहिराजः।
यो मान्यखेटममरेन्द्रपुरोपहासि-
गीर्वाणगर्वमिव खर्वयितुं व्यधत्त॥

चालुक्यवंशं दहता यदीयप्रतापवह्नेरभिलब्धजन्मा।
ब्रह्माण्डभाण्डोदर..........नाद्यापि विश्रान्तिमुपैति शब्दः॥

तस्योर्जितगुर्जरो हृतहटल्लाटोद्भटश्रीमदो
गौडानां विनयव्रतार्पणगुरुः सामुद्रनिद्राहरः।
द्वारस्थाङ्गकलिङ्गगाङ्गमगधैरभ्यर्चिताज्ञश्चिरं
सूनुः सूनृतवाग्भुवः परिवृढः श्रीकृष्णराजोऽभवत्॥

अभूज्जगत्तुङ्ग इति प्रसिद्धस्तदङ्गजः स्त्रीनयनामृतांशुः।
अलब्धराज्यः स दिवं विनिन्ये दिव्याङ्गनाप्रार्थनयेव धात्रा॥

तन्नन्दनः क्षितिमपालयदिन्द्रराजो
यद्रूपसंभवपराभवभीरुणेव।
मानात्पुरैव मदनेन पिनाकपाणि-
कोपाग्निना निजतनुः क्रियते स्म भस्म॥

तस्माद**मोघवर्षो** रौद्रधनुर्भङ्गजनितबलमहिमा।
राम इव रामणीयकमहानिधिर्दशरथाज्जातः॥

क्षिप्रं दिवं पितुरिव प्रणयाद्गतस्य
तस्यानुजो मनुजलोकललामभूतः।
राज्यं दधे मदनसौख्यविलासकन्दो
गोविन्दराज इति विश्रुतनामधेयः॥

सोऽप्यङ्गनानयनपाशनिरुद्धबुद्धि-
रुन्मार्गसङ्गविमुखीकृतसर्वसत्त्वः।
दोषाप्रकोपविषमप्रकृतिः श्लथाङ्गः
प्रापत्क्षयं सहजतेजसि जातजाड्ये॥

सामन्तैरथ **रट्ट**राज्यमहिमालम्बार्थमभ्यर्थितो
देवेनापि पिनाकिना हरिकुलोल्लासैषिणा प्रेरितः।
अध्यास्त प्रथमो विवेकिषु **जगत्तुङ्गा**त्मजोऽमोघवा-
क्पीयूषाब्धिर**मोघवर्ष**नृपतिः श्रीवीरसिंहासनम्॥

धर्मे मनुः समरकर्मणि कार्तवीर्यो
वीर्ये बलिर्जनमनोहरणे दिलीपः।
उच्चैश्चिरंतनयशांसि हरन्नपीत्थं
वृद्धेषु नम्रचरितो विनयेन योऽभूत्॥

किमिव सुकृतराशेर्वर्ण्यते तस्य चित्रं
युधि रिपुभिरशेषैर्वीक्षितो भज्यमानैः।
वियति निकटवर्ती यस्य जातः सहायः
प्रणतहरिविरिञ्चाभ्यर्चितश्चन्द्रमौलिः॥

श्रीकृष्णराजनृपतिस्तस्मात्परमेश्वरादजनि सूनुः।
यः शक्तिधरः स्वामी कुमारभावे व्यभूद्भुवने॥
....महतसहस्रभुजो भुजद्वयाकलितसमदरामेण।
..........................गुरुरपि येन सहस्रार्जुनो [विजि]तः॥

श्रीरट्टराज्यपुरवररक्षापरिखां मदेन यस्याज्ञाम् ।
विपुलां विलङ्घयन्तः स्वयमपतन्द्रोहिणोऽधस्तात् ॥
येन मधुकैटभाविव पुनरुन्मग्नौ जनोपमर्दाय ।
श्रीवल्लभेन निहतौ भुवि दन्तिगबप्पुगौ दुष्टौ ॥
रच्छामल्लविषद्रुममुदस्य निहितेन योऽकृत सनाथाम् ।
भूतार्यपुण्यतरुणा वाटीमिव गङ्गपाटीं च ॥
परिवलिताण्णिगपल्लवविपत्तिरासीन्न विस्मयस्थानम् ।
विस्फुरति यत्प्रतापे शोषितविद्वेषिगाङ्गौघे ॥
यस्य परुषेक्षिताखिलदक्षिणदिग्दुर्गविजयमाकर्ण्य ।
गलिता गुर्जरहृदयात्कालञ्जरचित्रकूटाशा ॥
अनमन्नापूर्वापरजलनिधिहिमशैलसिंहलद्वीपात् ।
यं जनकाज्ञावशमपि मण्डलिनश्चण्डदण्डभयात् ॥
स्निग्धश्यामरुचा प्रलम्बभुजया पीनायतोरस्कया
मूर्त्या कीर्तिलताहितामृतजलैर्वृत्तैश्च सत्त्वोद्भवैः ।
ज्ञात्वा यं पुरुषोत्तमं भरसहं विश्वंभराभ्युद्धृतौ
शान्ते धाम्नि लयं गतः प्रशमिनामाद्यः कृतार्थः पिता ॥
वृत्ते नृत्तसुराङ्गने सरभसं दिव्यर्षिदत्ताशिषि
श्रीकान्तस्य नितान्ततोषितहरे राज्याभिषेकोत्सवे ।
यस्याबद्धकरग्रहोद्यमभवत्कम्पानुरागोदया-
द्दिक्कन्याः स्वसमर्पणार्थमभवल्लग्नानुकूल्यप्रियाः ॥
लुप्ताः केऽपि निजास्पदाद्गुणभृतः केचित्प्रतिष्ठापिताः
केऽप्यन्योन्यविभेदतो विरलिताः केचित्तु संश्लेषिताः ।
येनाप्यूर्जितशब्दतन्त्रपतिना वर्णा इवोच्चावचां
नीता मण्डलिनो दशां सुमहतः सिद्धिं पदस्येच्छता ॥
कृत्वा दक्षिणदिग्जयोद्यतधिया चौलान्वयोन्मूलनं
तद्भूमिं निजभृत्यवर्गपरितश्चेरन्मपाण्ड्यादिकान् ।

येनोच्चैः सह सिंहलेन करदान्सन्मण्डलाधीश्वरा-
न्न्यस्तः कीर्तिलताङ्कुरप्रतिकृतिस्तम्भश्च रामेश्वरे ॥

स च परमभट्टारकश्रीमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदकालवर्षदेवः पृथ्वीवल्लभश्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटमहत्तरयुक्तकोपयुक्तकान्समादिशति—अस्तु वः संविदितम्। यथा शकनृपकालातीतसंवत्सरशतेष्वष्टस्वशीत्यधिकेषु कालयुक्तसंवत्सरान्तर्गतफाल्गुनबहुलत्रयोदश्यां बुधे दक्षिणादिङ्मण्डलानि भृत्येभ्यो जीवनं कर्तुं मण्डलेश्वरसर्वस्वानि प्रतिग्रहीतुं कालप्रियगण्डमार्तण्डकृष्णेश्वराद्यायतनानि निष्पादयितुं मेल्पाटीसमावासितश्रीमद्विजयकटकेन मया करहाटीयवल्कलेश्वरस्थानपतिकरञ्जखेटसंततिविनिर्गतेशानशिवाचार्यशिष्याय महातपस्विने सकलशिवसिद्धान्तपारगाय **गगनशिवाय** कार्तिक्यां संकल्पितसकलतपोधना(या)सनाच्छादननिमित्तं **करहाट**विषयप्रतिबद्ध**कल्लि**द्वादशान्तर्गतः **कंकें**नामा ग्रामः सवृक्षमालाकुलः सधान्यहिरण्यादेयः सदण्डदोषदशापराधः सर्वोत्पत्तिसहित आचन्द्रार्कं नमस्यो मया दत्तः। यस्य पूर्वतः **कन्हवन्ना** नदी। दक्षिणतः **पेन्डुरे**। पश्चिमतः **आढेंनामा** ग्रामः। उत्तरतः सैव कन्हवन्ना नदी। एवं चतुराघाटविशुद्धं **कंकें**संज्ञकं ग्रामं **गगनशिव**स्य कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्व्याघातः कार्यः। यश्च करोति स पञ्चभिरपि महापातकैः संयुक्तः स्यात्। उक्तं च—

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

योस्यग्मेन लिखितमिति ॥

(एपिग्राफिआ इण्डिका—४।२८२–२८६)

---

(१३४)

बाईश्रीहरीरकारितवापीप्रशस्तिः[1] ।

नमः सृष्टिकर्त्रे ।

नमोऽपां पतये तुभ्यं सर्वजीवनरूपिणे ।
वरुणाय नमस्तुभ्यं नमः सुकृतसाक्षिणे ॥

जयति जगत्रयजननी कुण्डलिनी नामतः परा शक्तिः ।
सुरनरवन्दितचरणा वापीरूपात्मना सततम् ॥

नमामि विश्वकर्माणं सफलाभीष्टदायकम् ।
कृपातो यस्य सर्वे स्युः कर्म कर्तुं क्षमा नराः ॥

स्वस्ति । श्रीगुर्जरधरिण्यां श्रीमदहिम्मदाबादनगरे पातुसाहश्रीश्रीश्रीमहमूदविजयराज्ये राज्ञोऽन्तःपुरद्वारि सर्वाधिकारिणी बाईश्रीहरीरनाम्नी श्रीनगरादीशानदिगाश्रितहरीरपुरमध्ये चतुर्दिगायातानेकतृषातुरमनुष्यपशुपक्षिवृक्षादिचतुरशीतिलक्षजीवोपभोगाय परमेश्वरप्रीत्यर्थं संवत् १५५६ वर्षे शाके १४२१ प्रवर्तमाने पौष शुदि १३ सोमे वापीं कारयामास। यस्यामगाधामृतपानीयराशिमवलोक्य क्षीरोदधिर्निवासमकरोदिव । सा स्वेदजाण्डजोद्भिज्जजरायुजपोषणार्थमाचन्द्रार्कं स्थिरा भूयात् । तत्र व्ययीकृतद्रव्यसंख्या ३२९००० सर्व० ।

महमूदमहीपालमन्त्रिमुख्या प्रतापिनी ।
धर्मार्थिनो हरीराख्या वापीमिमामचीकरत् ॥

चतुष्पथे चरच्चारुचतुर्दिग्जनसंकुले ।
आचन्द्रार्कमियं वापी मधुरा पीयतां जनैः ॥

---

१. अयं प्रशस्तिलेखो यद्यपि Dr. Burgess महाशयकृतमसीप्रतिकृतिमाश्रित्य Mr H. B. Blochmann M. A. महाशयेन Indian Antiquary ग्रन्थे प्रकाशितो हरि वामन महाशयेनेङ्ग्लिशभाषयानूदितश्च, तथापि बहुशोऽशुद्धं दृष्ट्वा स्वयमेव मषीप्रतिकृतिं कृत्वा पुनरत्र प्रकाशितः इति Rev. J. E. Abbott प्रकाशकाः. A. D. 1499.

दुर्गाणि पुण्यानारामाञ्शतशश्च जलाशयान् ।
पदे पदेऽन्नसत्राणि धनिनः सन्ति शोभनाः ॥
महाधनव्ययं कृत्वा विश्वोपकृतिहेतवे ।
बाईश्रीहरीरनाम्नी वापीमिमामचीकरत् ॥

वापीनिर्माणेऽधिकारी परमेश्वराज्ञापालकमलिक श्रीविहामद । तथा गजधरवैश्य सूत्र० वीरा तथाज्ञाकर सू० देवा श्रीगिरणामहं सायाआ तथा महंवीरा ॥

(एपिग्राफिआ इण्डिका—४।२९८-२९९)

---

(१३५)

दीर्घसीनगरीस्थितवनपतिमहाराजकारित-नाट्यशालाप्रशस्तिः ।

शक संवत् ९९७. A. D 1075.

आसीद्गङ्गान्ववायक्षितिपतितिलको **राजराज**क्षितीशः
क्ष्मापालप्रौढमौलिप्रकरमणिरुचिप्रस्फुरत्पादपीठः ।
योऽरातिक्षत्रचक्रक्रथनकरभुजापालिताशेषपृथ्वी-
चक्रश्चक्रायुधाभो दधदुरसि रमां वाचि वाचामधीशः ॥

तस्यान्वयागतमहाप्रतिहारिमुख्यः
संस्तम्भिताखिलविरोधिनराधिपौजाः ।
गोकर्णसूनुरवनीसुरवंशभानु-
रात्रेयगोत्रमहितो महनीयकीर्तिः ॥
वनपतिरिति नाम्ना तस्य गाम्भीर्यशौर्या-
खिलजगदुपकारैर्न्यग्बभूव प्रचेताः ।

---

१. अयं प्रशस्तिलेखो **गञ्जाम्**परिगणे **कलिङ्गपतम्**नामकत उत्तरस्यां दिशि मीलचतुष्टयान्तरे **दीर्घसी**पर्वतान्तिके आयतशिलायां वर्तते. ततो Dr. Hultzsch महाशयेन मसीचिह्नीकृतो दत्तः. तत्र प्राक् संस्कृतभाषा, तत आन्ध्रभाषेति G. V. Ramamûrti, Parlakimedi महाशयाः.

अधिकमभिमतात्तद्दानमालोक्य चिन्ता-
मणिरिह न विदद्रे यत्तदश्मत्वहेतोः ॥
आजावसौ **चोड**नृपस्य सेनामहावनस्याश्वमृगाकुलस्य ।
मत्तेभसारद्रुमपूर्णितस्य दावानलोऽभूच्च**लमूर्तिगण्डः** ॥
तेनाजौ **चोड**सेनावनदवदहनेनाशुगप्राशशस्त्री
निस्त्रिंशज्वालकेनो**त्कल**गजतुरगानीकिनीनाथभूजा ।
निर्दग्धा भग्नमूला निपतितशिरसश्छिन्नबाहूरुशाखा
दृश्यन्तेऽद्यापि भूतेश्वय इव धवलैरस्थिभिर्जीर्णमांसैः ॥
जित्वा मुहु**र्वेङ्गि**धराधिनाथं तस्याजहाराखिलवस्तुराशिम् ।
दद्दार्णवस्तेन यमाय दूतः प्रस्थापितो दिग्जयकीर्तनाय ॥
जित्वैवं भूमिपालान्**वनपति**रवनावात्मनः कीर्तिवल्लीं
शाकाब्दे शैलपद्मप्रभवनिधियुते **दीर्घरस्यां** नगर्याम् ।
दुर्गादेव्यालयस्याभरणमिव पुरः स्थापयामास गुर्वीं
श्रीमाञ्छ्रीनाथवीर्यः स्थगितदशदिशां नाट्यशालाच्छलेन ॥
दीपमखण्डं प्रादान्**मण्डलिकः** सोऽतिचण्डदोर्दण्डः ।
तस्यामेव समायां तस्यै देव्यै सुरेशपूज्यायै ॥

[श्रीशकुनेण्डलु भूसतिपै शैलनन्दाब्जभवसंख्यनोन्द वेङ्गि देशंबु गिमिडियु गोसिलगिड्डि सिंगिदेशंबु म ····योड्डदेशमनङ्क जनिनभूपालुरननिनोड्चे चलमूर्तिगण्डण्डै नेगडिन मण्डलिकुण्डु भूसुरवंशुण्डु वासवनिभभोगि वणपति सौजन्यगुणयुतुण्डु दीर्घासि भगवति देवि देवालयसुन मुंदटं गड्डवनतरमुग मण्डपमेत्तिंचे भण्डनविजयुण्डु गण्डगोपालुण्डखण्डवर्तिदीविय वेट्टेनद्देविकिनव्वेलं दन मनोवल्लभि वनजनेत्रि दीविय वेट्टें वज्रावतियुनु साक्षुलिनशशुतालगलयत्तकुनु मुदमुन गगनभूमिचन्द्रखरकरोद कशिखि मारुतात्ममूर्तिमहिषमथनि यिष्टपूर्तेफलमुलेखकालंवुनुमेच्चुतोडं दमकुनिच्चुचुनु] ॥

(एपिग्राफिआ इण्डिका—४।३१५–३१७)

(१३६)

श्रीकाटयवेममहाराजधर्मपत्नीमल्लाम्बिकाकारित-मार्कण्डेयशिवालयाग्रहारप्रशस्तिः।

शक संवत् १३३३. A. D 1411.

विश्वंभरोऽव्याद्भूदारः केलिपल्वलिताम्बुधिः।
विश्वंभराभवत्सापि येनोद्वाहमवाप्य भूः॥
भवतां भवतां नागः शांकरिः शंकरोऽन्वहम्।
दानेन सुरभिः स्वस्य दानेन सुरभिश्च यः॥
शिरोरत्नं शंभोः शशधरकिशोरः कलयता-
दलंकारे गौर्या मुकुरति रते दीपति च यः।
बिसाङ्कूरभ्रान्त्या गगनतटिनीहंसपटली
मुहुश्चञ्चूघर्षाद्विमलविमलस्तेजित इव॥
अस्ति स्वस्तिमदाद्यमध्वरभुजामम्भोजनाभं मह-
स्तन्नाभीकमलादभूत्रिजगतां निर्माणकर्मक्षमः।
मुख्यो विश्वसृजां चिरंतनगिरां विश्रामघण्टापथ-
स्तस्यासन्मुखबाहुसक्थिपदतो वर्णाः क्रमेणोदिताः॥
पुंसस्तस्य पुरातनस्य चरणाम्भोजातजातं कुलं
स्वल्पाचारविधानतोऽपि विमलं शुद्धस्वभावादिदम्।
आसीत्किं च कलौ युगे नृपतयः प्रायेण यत्रोदिता-
स्तेजः शौर्यवदान्यताप्रभृतिभिर्युक्ता गुणैः प्राभवन्॥
तत्र पण्टकुलं नाम प्रभूतं बहुशाखिनि।
तराविव फलं रम्यवृत्तं सरसमुज्वलम्॥

---

१. एतत्प्रशस्तिलेखाश्रयताम्रपत्राणि त्रिंशद्वर्षपूर्वं गोदावरीपरिगणान्तर्गते डामलापुरम्नाम्नि वसतौ प्राचीनगृहखननकाले मोक्कपटलरजप्पनाम्ना लब्धानि. ताम्रपत्राणीदानीं मद्रासविचित्रवस्तुसंग्रहशालायां वर्तन्ते इति J. Ramayya B. A., B. L., प्रकाशकाः.

तत्रासीद्वेमभूपालः कुले विबुधरञ्जकः।
पयोधाविव संतानो राजरत्नोद्भवाकरे॥

श्रीमान्वेममहीपतिः स विदधे पातालगङ्गातटे
श्रीशैले जगनोब्बगण्डबिरुदः सोपानवीथीं शुभाम्।
यासौ दीव्यति दिव्यसोमनगरारोहोद्यतानां नृणां
निश्रेणिः परिकल्पितेव नितरामा ब्रह्मकल्पस्थिरा॥

यस्मिन्निःसीमभूदानख्यातिसौभाग्यशालिनि।
द्विजैर्न बहु मन्यन्ते बलिभौवनभार्गवाः॥

अनवोतप्रभुस्तस्मादजायत भुजायतः।
महासेनो महादेवादिवारातिकुलान्तकः॥

अनवोतमहीपतौ धरित्रीं परितो बिभ्रति पन्नगेन्द्रमुख्याः।
चिरमुच्छ्वसिता लघूकृते स्वे भरणे जीवनमस्य संस्तुवन्ति॥

तस्यानुजः सुजननोऽस्ति वसन्तरायो
वीरानवेमनृपतिः क्षुरिकासहायः।
यस्मिन्महीमवति सार्थमभूच्चिराय
नामावनौ सुमनसां बहुशो वदान्ये॥

हेमाद्रिदाननिरते यस्मिन्ननवेमभूपतौ मुदितान्।
अवलोक्य भूमिदेवान्देवाः स्पृहयन्ति भूमिवासाय॥

यस्मिन्किरति वसन्ते दिशि दिशि कामोत्सवेषु कर्पूरम्।
अधिवासितपरिधानानुभवज्ञोऽभूच्चिराय गिरिशोऽपि॥

कुमारगिरिभूपोऽभूदनवोतविभोः सुतः।
जयन्तो वासवस्येव प्रद्युम्न इव शार्ङ्गिणः॥

कोण्डवीडुरिति ख्याते पुरे स्थित्वा कुलागते।
कुमारगिरिभूपोऽयं चिरं भूमिमपालयत्॥

तुला पुरुषरत्नस्य श्रीकुमारगिरेः कुतः।
तुलापुरुषमुख्यानि महादानानि योऽतनोत्॥

आसीदमात्यरत्नं **काटयवेम**प्रभुस्तस्य ।
अतिसुरगुरुभार्गवमतिरतिभार्गवविजयविजयविख्यातिः ॥

सिंहासने निधायासौ **कुमारगिरि**भूवरम् ।
अतेजयन्महातेजाः श्रीकृष्ण इव धर्मजम् ॥

कुमारगिरिभूनाथो यस्मै विक्रमतोषितः ।
प्रादात्प्राचीं भुवं राजमहेन्द्रनगरीमुखाम् ॥

नप्ता **काट**महीभुजो गुणगणोदारस्य **मार**प्रभोः
पौत्रः **काटयवेम**भूमिरमणः श्री**वेम**पृथ्वीपतेः ।
दौहित्रः पुनर**न्नवोत**नृपतेर्धात्रीशचूडामणे-
र्जामाता जयति क्षितिं चिरमवन्**दोड्डाम्बिका**नन्दनः ॥

काटयवेमकटाक्षे प्रभवति सदये च निर्दये च तथा ।
गजपतिमुखनृपतीनां चित्रं मुक्तातपत्रता भवति ॥

भूपालान्नमयन्प्रजाः नियमयन्कान्ताजनं कामय-
न्भूदेवान्रमयन्नरीन्विरमयन्मित्राणि विश्रामयन् ।
कीर्तिं स्वां भ्रमयन्नघानि शमयन्धर्मं समायामय-
न्सोऽयं **वेम**महीपतिर्विजयते **काटा**वनीशात्मजः ॥

अभूत्**काटयवेम**स्य जाया **मल्लाम्बिका** सती ।
अशेषगुणसंपूर्णा पातिव्रत्यधुरंधरा ॥

राजद्राजमहेन्द्रनामनगरे गोदावरीतीरगं
मार्कण्डेयशिवालयं पतिहिता **मल्लाम्बिका** धार्मिका ।
कृत्वा शुद्धसुवर्णरत्नखचितं ब्रह्मप्रतिष्ठास्तथा
सत्राण्यध्वनि च प्रपा विजयतेऽनेकांस्तटाकानपि ॥

श्री शाके गुणरामविश्वगणिते कार्तिक्यहेऽब्दे खरे
प्रादात्**काटयवेमयः** स्ववनिता**मल्लाम्बिका**नामतः ।
ग्रामं मल्लवरं **नृसिंह**विदुषे काण्वद्विजायादरा-
दाचन्द्रार्कमुदर्कलालसमतिः सैश्वर्यभोगाष्टकम् ॥

कोनदेशेऽग्रहारोऽयं भाति मल्लवराधिपः ।
तीरे च वृद्धगौतम्याः पुण्यो मुक्तीश्वरान्तिके ॥
अप्पयार्यस्य पौत्रोऽयं नृसिंहः काश्यपान्वयः ।
अन्नदानपरो नित्यमहीबलतनूभवः ॥
यथाविभागमत्रांशान्विधाय ज्ञातिभिः सह ।
अधीतकाण्वशाखाध्वा भुङ्क्ते धन्यो यथासुखम् ॥

[ईवूरि पोलमेर सोमलु तूर्पुन तोत्तडिमूंडि पोलमेर पुंत वत्तुलमुप्पडितोंटमामिंड्लु मोदलुगां बोयि मल्लायम्मंगारिकोमरगिरिपुरपु पोलमेर पुंत मोचेनु। दक्षिणानु। आकोमरगिरिपुरपु पोलमेरवुंडे वृद्धगौतमि मोचेनु। पडुमटनु वृद्धगौतमि। उत्तराननु। विद्यावृद्धतीर्थमनिवृद्धगौतमिलोनि गुमि मोदलुगा वच्चिन तोत्तडिमूंडि पोलमेर पुंत वत्तुलसुप्पडितोंटमामिंड्लु मोचेंनु]

पालनसुकृतस्य चापहरणदोषस्य च प्रकाशनाय केचन पुरातनाः श्लोका लिख्यन्ते—

दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
शत्रुणापि कृतो धर्मः पालनीयः प्रयत्नतः ।
शत्रुरेव हि शत्रुः स्याद्धर्मः शत्रुर्न कस्यचित् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
तटाकानां सहस्रेण चाश्वमेधशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥

किंचैतद्दातृवचनम्—

कर्तव्यवित्काटयवेमभूपः कृताञ्जलिः प्रार्थयते नृपालान् ।
एष्यान्भवद्भिः परिपालनीयो धर्मो ममायं दयया धिया वा ॥

श्रीरामचन्द्रेणाप्येवमुक्तम्—

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

कृतं श्रीवल्लभेनेदं शासनं सद्विकासनम् ।
कण्वगोत्रेण पुत्रेण लक्ष्मीश्रीवल्लभार्ययोः ॥

श्रीवराहो रक्षतु । मङ्गलमहाश्रीश्रीश्रीजेयुन् । वेसु त्राल्तु ॥

(एपिग्राफिआ इण्डिका—४।३२१-३२५)

---

(१३७)

श्रीसुन्दरपाण्ड्यमहाराजकारितश्रीरङ्गनाथभूषणादिप्रशस्तिः ।[1]

हरिः ओम् । स्वस्ति श्री—

येनासौ करुणामनीयत दशां श्रीरङ्गपद्माकरः
कृत्वा तं भुवनान्तरप्रणयिनं **कर्णाटदोषाकरम्** ।
भूयोऽप्यत्र जगत्रयीबहुमतां लक्ष्मीमवस्थापय-
न्देवः **सुन्दरपाण्ड्यभानु**रुदयं लेभे प्रतापोष्मलम् ॥

दत्तैर्नैकतुलाधिरोहविधिना रङ्गेश्वरस्यालयं
देवः श्री**मधुरा**महेन्द्रनृपतिर्जाम्बूनदैर्निर्ममे ।
अस्योत्तुङ्गभुजाद्रिभासुरयशश्चन्द्रोदयव्यञ्जिका
संध्येवानिशमीक्ष्यते नवजपारक्ता यदंशुच्छटा ॥

आच्छाद्य राजतपनः कनकैर्विमानं
रङ्गे हरेस्तदपदानभुवा स्वनाम्ना ।
अस्थापयत्परममा प्रणवात्सुवर्णे
तस्मिन्पुमांसममले मनसीव योगी ॥

---

१. इयं प्रशस्तिः **त्रिचनापल्लि**परिगणे **श्रीरङ्गम्**द्वीपे **रङ्गनाथ**मन्दिरद्वितीयप्राकारस्य पूर्वभित्तौ समुपलभ्य Mr. V. Venkayya M. A. नामकेन मत्प्रथमप्रतिनिधिना प्रेषिता—इति प्रकाशकाः E. Hultzsch Ph. D. महाशयाः.

कोशादात्तां क्षितिपतिरविः काठकक्षोणिभर्तु-
र्मालां प्रादान्मरकतमयीं शार्ङ्गिणे रङ्गधाम्ने ।
लीना तस्योरसि महति या लीलयोपेत्य पश्चा-
दालिङ्गन्त्याः परिकलयते दीर्घतासाम्यमुर्व्याः ॥

देवाय रङ्गपतये नरदेव भास्वा-
नस्पर्शयन्मणिमयं मुकुटं महौजाः ।
यस्य त्विषा दिनमणेरिव तारकाणां
शान्ता रुचिः शयनभोगिफणामणीनाम् ॥

अकृत कनकवर्मच्छादितं रङ्गभर्तुः
शयनमुरगराजं शार्ङ्गिणो राजसूर्यः ।
विलसति विहरन्त्या यः समन्तेन पत्या
कवचित इव लक्ष्म्याः कौङ्कुमैरङ्गरागैः ॥

प्रत्यादिष्टसुमेरुशृङ्गविभवं विश्वोत्तरक्ष्मापतिः
श्रीरङ्गे नरसिंहधाम विदधे कार्तस्वरं गोपुरम् ।
यस्मिन्नक्तमुदीर्णभासुरमहस्तोमे मुहूर्तं गतः
पर्याप्ताकृतिरेव भास्करमिव प्राप्तः शशी दृश्यते ॥

घोरद्वैरथखिन्नकाठकपुरीसंपत्समाकर्षिणा
देवेनेन्दुकुलोद्भवेन विदधे सर्वोत्तरक्ष्माभृता ।
विष्वक्सेनविमानमक्षतनभःसंचारवेलोन्मिष-
द्रोचिःसंचयवञ्चितद्युमणिना हेम्नातिभूम्ना वृतम् ॥

कृतस्य नृपभास्वता रिपुकिरीटहेमोच्चयै-
रनेकमणिशोभिनो मरकतोरणस्यान्तरे ।
हरिर्विरचितासिको जयति रङ्गधामाश्रय-
स्तपात्ययपयोधरं त्रिदशकार्मुकावेष्टितम् ॥

विष्णोरुद्भुजसुन्दरस्य विदधे वेश्म क्षितीन्द्रार्यमा
कोशागारविलुण्ठितैः क्षितिभुजां कोटीरहेमोच्चयैः ।

अद्याप्यन्तिकभूरमुष्य बहलैर्यत्तेजसामुद्गमै-
रुत्सङ्गस्थविदीर्णदैत्यरुधिरव्याप्तेव विद्योतते ॥
रङ्गेश्वराय क्षितिपालसूर्यः प्रालम्बमुक्तास्रजमुन्नतश्रीः ।
भीतेन शक्रेण किरीटभङ्गात्सुरद्रुमं दत्तमिवोपनिन्ये ॥
मूर्तं यशः स्वमिव **सुन्दरपाण्ड्यदेवो**
मुक्तामयं व्यधित रङ्गपतेर्वितानम् ।
यस्य प्रभाभिरनुयाति तदीयमौलि-
र्भागीरथीपरिगतं मुकुटं पुरारेः ॥
क्रमुकपनसमोचानालिकेराम्रमुख्यैः
कनकनिचयक्लृप्तैर्नैकरूपैः फलौघैः ।
मुदमकृत मुरारेरेकरूपापि रङ्गे
मरकतपृथिवीभृत्संभवा भक्तिवल्ली ॥
नृपतिरविरुदारः संचरन्मेरुतुङ्गं
व्यरचयदधिरङ्गं शातकुम्भं शताङ्गम् ।
तडिदभिसरणश्रीर्व्योम्नि यस्य प्रभाभिः
शरदवतरणेऽपि प्राप्यते वारिवाहैः ॥
सर्वोत्तीर्णमहीपतिर्मधुरिपोर्देवस्य जेता द्विषां
विस्तीर्णामतनिष्ट हाटकमयीं रङ्गे प्रपां जंगमाम् ।
अष्टानां ककुभां मुखेषु युगपत्तत्कीर्तिचन्द्रोदयं
विष्वग्विस्फुरितैर्मयूखविसरैः संध्येव या शंसति ॥
रङ्गास्पदप्रणयिनः परमस्य पुंसो
हैमं सुपर्णमकरोत्क्षितिपालसूर्यः ।
यस्याग्रजन्मन इव प्रभया स्फुरन्त्या
संपद्यते जगति शश्वदहर्मुखश्रीः ॥
आसञ्जयन्नृपरविः शयितस्य रङ्गे
कंसद्विषो वपुषि काञ्चनमन्तरीयम् ।

यस्यांशुभिः कवचितेन हिरण्यगर्भे
भूयो निषण्णमिव नाभिगतेन धात्रा ॥
उच्चैः प्रभावलयमूर्जितकान्ति हैमं
प्रादत्त रङ्गपतये नरपालसूर्यः ।
आभाति यत्तदुपकण्ठगतं प्रफुल्ल-
मन्तस्तमालमिव रम्यमशोकषण्डम् ॥
नृपतपनवितीर्णामास्थितो हैमपीठीं
विविधमणिविचित्रां बिभ्रदुच्चैः प्रभां च ।
जयति धृतमरुत्वत्कार्मुकं रङ्गनाथः
कनकशिखरशृङ्गस्थायिनं कालमेघम् ॥
चैत्रे मासि चकार राजतपनो यात्रोत्सवं रङ्गिनः
श्लाघ्यं कान्तिमयैस्तथाद्भुतमयैः संपन्मयैर्वासरैः ।
नन्दन्त्येव हि ते न विस्मयपदं ये बिभ्रते चेतना-
माचैतन्यभृतोऽपि यत्र दधते वृक्षा विकासं परम् ॥
कर्तुं रङ्गनिवासिनः कमलया साकं विहारोत्सवं
हेम्ना सुन्दरपाण्ड्यदेवनृपतिर्नावं नवां निर्ममे ।
पद्मोचिःखचितैः कवेरतनयारोघोरुहैः शाखिभि-
र्मन्दारद्रुमषण्डमण्डिततटामन्वेति मन्दाकिनीम् ॥
शौर्यानीतैर्नरपतिरविः शार्ङ्गिणो रङ्गभर्तु-
स्तस्तारोच्चैः कनकनिचयैरान्तरं सद्मसालम् ।
वेलाचक्रं विजयजनुषा तस्तरे यः स्वधाम्ना
स्कन्धावारीकृतवसुमतीसीमसालायमानम् ॥
कॢप्तं सुन्दरपाण्ड्यभूमिपतिना यद्रङ्गभर्तुः पुरो
देवस्याभ्यवहारमण्डपमभूद्विस्तीर्णमायाभवत् ।
तेनैव प्रतिपादितस्य हरता पृथ्वीपतीनां धनं
सौवर्णस्य परिच्छदस्य तदलं नासीदवस्थापने ॥

आपादचूडमकरोन्नरपालसूर्यो
रङ्गेशितुर्वपुषि रत्नविभूषणानि ।
यैरस्य वक्षसि निविष्टपदापि पद्मा
रत्नाकरं भवति भूय इव प्रविष्टा ॥

धर्मद्विषः समिति सुन्दरपाण्ड्यदेवे
निर्मथ्य पालयति विश्वमविज्यचापे ।
विष्णोर्विभूषणमभूदमुना वितीर्णं
रङ्गालयस्य तपनीयमयं तनुत्रम् ॥

इच्छां सुन्दरपाण्ड्य उन्नतिमतीं बिभ्रत्स्वया संज्ञया
निष्पाद्याभ्यवहारवारयुगलं निष्कम्पसंपत्तिकम् ।
संपूर्णं विदधे गभीरमुदरं रङ्गेशितुः शार्ङ्गिणो
यस्याभूद्भुवनैश्चतुर्दशभिरप्यापूरणं दुर्लभम् ॥

आतन्वतान्वहमनेकतुलाधिरोहं
रङ्गेन्द्रधाम्नि नरदेवदिवाकरेण ।
हेम्नामसंशयमभज्यत मेरुरर्थे
तत्केतुलक्षणमधास्यत चेन्न मीनम् ॥

मही····महः पतिः प्रतिनरेन्द्रलोकादिव
प्रतापरविमण्डलान्यपहृतानि दोर्विक्रमैः ।
सुवर्णपरिकल्पितान्यतिमहान्ति पात्राण्यदा-
त्कवेरगिरिकन्यकापुलिनशायिने शार्ङ्गिणे ॥

सर्वानप्रणतान्निपात्य नृपतीन्सिंहासनेभ्यो हठा-
त्तैर्निर्माय समाहृतैर्मन इव स्वं प्रांशु सिंहासनम् ।
भूभृद्भानुरदत्त रङ्गपतये यत्प्राप्य लक्ष्मीसखः
सोऽयं मेरुतटीजुषः सतडितो मेघस्य धत्ते श्रियम् ॥

हेमाच्छादनराज इत्यधिगतप्रख्यातनाम्नो हरे-
र्हैमस्योरगसूदनस्य शयनागारस्य चाधिश्रियः ।

त्रीणि स्वर्णमयानि राजतपनश्चक्रे विमानानि यैः
श्रीरङ्गः स इवाभिषेकनिभृतैरुद्भासते मौलिभिः ॥

(एपिग्राफिआ इण्डिका—३।११-१४)

---

(१३८)

अनन्तवर्ममहाराजकरिततडाकप्रतिष्ठाप्रशस्तिः[1] ।

ओम् ।

स्वस्त्यमरपुरानुकारिणः सर्वर्तुसुखरमणीयाद्विजयवतः कलिङ्गनगरवासकान्महेन्द्राचलामलशिखरप्रतिष्ठितस्य सचराचरगुरोः सकलभुवननिर्माणैकसूत्रधारस्य शशाङ्कचूडामणेर्भगवतो गोकर्णस्वामिनश्चरणयुगलप्रणामाद्विगतकलिकलङ्कोऽनेकाहवसंक्षोभजनितजयशब्दः प्रतापावनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीपुञ्जरञ्जितनिजनिस्त्रिंशधारोपार्जितवरचरणः सितकुमुदकुन्देन्दुयशा ध्वस्तारातिकुलाचलो नयविनयदयादाक्षिण्यशौर्यौदार्यसत्यत्यागादिगुणसंपदाधारभूतो परममाहेश्वरो मातापितृपादानुध्यातो गङ्गामलकुलतिलको महाराजश्री**राजेन्द्रवर्म**सूनुः श्री**अनन्तवर्म**देवः कुशली **तिरिकट्ट**विषये **मेदेलाक**ग्रामनिवासिनः कुटुम्बिनः समाज्ञापयति—विदितमस्तु भवताम्—'ग्रामोऽयं होम्बरबलवास्तव्यवाजसनेयकौशिकगोत्र**विष्णुदेव**सूनु**श्रीधर**भट्टाय वेदवेदाङ्गतत्त्वज्ञाय तटाकप्रतिष्ठायामुदकपूर्वकं कृत्वा सूर्यग्रहोपरागे दत्तः । अत्र सीमालिङ्गानि कथ्यन्ते—पूर्वस्यां दिशि वनराजिकापाषाणः, आग्नेय्यां पाषाणः, दक्षिणस्यां चठेरनदी, नैर्ऋत्यां तेन्तलिवृक्षपङ्क्तिः वनराजिका, पश्चिमस्यां गुरातटाकः पाषाणः, वायव्यां कलञ्जातटाकः पाषाणः, वारुण्यां (कौवेर्यां) गर्तः, ऐशान्यां वटवृक्षः वनराजिका त्रिकूटः ।

---

१. इयं प्रशस्तिः **विजगापट्टम्**परिगणे **शृङ्गवरपुकोट**निकटस्थस्य **आल्मण्डा**ग्रामस्य संनिधौ प्राप्य Mr. W. A. Willock I. C. S. महाशयेन प्रेषितेषु त्रिषु ताम्रपत्रेषु लिखिता वर्तते—इति प्रकाशकाः E. Hultzsch Ph. D. महाशयाः.

अत्र व्यासगीतानि भवन्ति—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमी[1] तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स[2] विष्टायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥

लिखितं दुर्गप्परहस्येण(?) उत्कीर्णमक्षशालिना ॥ गाङ्गेयवंशप्रवर्धमानविजयराज्यसंवत्सरशतानि त्रीणि चतुरोत्तराणि ॥

(एपिग्राफिआ इण्डिका ३।१८–२०)

---

(१३९)

श्रीवीरबुक्कमहाराजभ्रातृजश्रीसंगममहाराजानां शासनपत्रम्[3] ।

हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु वः ।
हेमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ ॥

अस्ति प्रस्तूयमानप्रबलनिजभुजाखर्वगर्वानुरोधि-
स्वाधीनोदारसारस्थगितरिपुनृपोद्दामसंग्रामशक्तिः ।
राजा राजन्यकोटिप्रणतिपरिलुठन्मौलिमाणिक्यरोची-
राजीनीराज्यमानस्फुरदुरुचरणाम्भोरुहः **संगमेन्द्रः** ॥

तस्मादुदभवन्पञ्च तनयाः शौर्यशालिनः ।
कल्पावनिरुहाः पूर्वं कलशाम्बुनिधेरिव ॥

---

१. भूमीशब्दे 'कृदिकारात्–' इति ङीषः संभवेन साधुत्वसंभवेऽपि तदजानानाः प्रकाशकवराः E. Hultzsch Ph. D. महाशयास्तु 'भूमिस्तस्य' इति पाठं कल्पयन्ति स्म. २. 'स्वविष्टायां' आदर्शे । 'श्वविष्टायां' प्रकाशकशोधितः. ३. इदं शासनपत्रं Mr. R. Sewell महाशयेन सूचितं Dr. C. D. Macleane महाशयेन Dr. Hultzsch महाशयनिकटे प्रेषितम्. उक्तमहाशयेन मन्निकटे प्रेषितम्—इति प्रकाशकाः H. Krishna Sastri महाशयाः.

आदौ **हरिहर**क्ष्माभृदथ **कम्प**महीपतिः ।
ततो **बुक्क**महीपालः पश्चान्**मारप-मुद्दपौ** ॥
तत्र राजा **हरिहरो** धरणीमसिचच्चिरम् ।
सुत्रामसदृशो येन सुरत्राणः पराजितः ॥
तस्यानुजश्चिरमशाद्धात्रीं **कम्पण**भूपतिः ।
याथार्थ्यमभजन्नाम यस्य कम्पयितुर्द्विषाम् ॥
जयन्तयिव जम्भारेः प्रद्युम्नयिव शार्ङ्गिणः ।
तनयः समभूद्वीरस्तस्य **संगम**भूधरः ॥

यस्य दृष्टिमुदयद्दयारसामर्थिनामभिमतानुबन्धिनीम् ।
हन्त नूनमनुयान्ति सस्पृहं कर्णकल्पतरुकामधेनवः ॥
यद्भुजाश्रयणजातकौतुका नापरं जयरमाभिवृण्वती ।
संयुगानि समुपेयुषी चिरादासिधारमनुतिष्ठति व्रतम् ॥
यद्यशःप्रसरणेन भूयसा ह्लादमीयुषि परं जगत्त्रये ।
अश्नुते विफलतां न चन्द्रमाः केवलं कुमुदिनीविकासनात् ॥
श्रीमान्प्राक्प्रत्यगब्धिद्वितयपरिवृढः सैष भाषातिलङ्घि-
क्षुद्रक्ष्माभृद्भुजङ्गः प्रतिभटधरणीपालसेनाविबाळः(?) ।
माद्यन्नागाश्वमर्त्याधिपतिगजघटापञ्चवक्त्रोऽभियाती-
त्युद्घुष्यन्ते यदीयाः स्फुटमिह बिरुदाः संततं बन्दिवृन्दैः ॥
इत्थं सर्वगुणोपरञ्जनकलामीदृग्विधामेयुष-
स्तस्य क्षोणिवतेरपारयशसस्तत्त्वोपदेशक्रियाम् ।
कर्तुं कामपि वासनामुपनयन्कारुण्यवारांनिधिः
श्रीमान्संनिधिमादधत्पशुपतिः श्रीकण्ठनाथात्मना ॥
माहेश्वराणां तत्त्वानां मान्ये यस्मिन्प्रदर्शके ।
प्राचामदर्शि नाथानां प्रायेण नवता भुवि ॥
यत्पादानतिमात्रेण यतीनां मुक्तिरन्तिके ।
क्रियते तपसा किं तु केवलं कायशोषणम् ॥

कैवल्यपदवीद्वारकवाटोद्घाटकर्मणि ।
कटाक्षाः कुञ्चिका यस्य काङ्क्षतां तत्र निर्वृतिम् ॥
स कदाचित्प्रियं शिष्यं संगमेन्द्रमुपस्थितम् ।
न्यदिशद्देशिको दृष्ट्वा निर्भरप्रेमगर्भया ॥
अग्रहारं कमप्यत्र त्वया दापयितुं मम ।
प्रीतिरस्ति ततः कश्चिद्ग्रामो राजन्प्रदीयताम् ॥
इति तस्य गुरोराज्ञामीशिता धरणीभृताम् ।
अग्रहीदञ्जलिं ग्रथ्नन्नवनम्रेण मौलिना ॥
पाकाख्यो विषयोऽस्त्यपारमहिमा प्राचः पयोधेस्तटे
तस्मिन्विक्रमसिंहमित्यपि पुरं धत्ते ललामश्रियम् ।
तस्याप्युत्तरतस्त्रियोजनमिताद्देशात्स्फुरत्युज्ज्वलो
ग्रामो विट्टरकुंटमित्यमुमदाद्राजा गुरोः प्रीतये ॥
शाकाब्दे नागशैलद्युमणि(१२७८)परिमिते दुर्मुखाब्दे तृतीये
मासि श्रीसंगमेन्द्रो गुरुहितनिरतः संगमे चन्द्रभान्वोः ।
प्रादात्प्रत्यब्दकाले निजपितुरमरत्वाप्तये विद्रगुण्ड-
ग्रामं त्रिंशन्मिताभ्यः श्रुतिपथनिरताभ्यो महीदेवताभ्यः ॥
विद्रगुण्डमितीह प्रथितापरनामशालिनस्तस्य ।
प्रकटयति स यमीन्द्र[ः] प्रायः श्रीकण्ठपुरमिति प्रख्याम् ॥
आ पूसलपाडभुवोऽप्पा मल्लेकुण्डसंज्ञिकासारात् ।
आ पापटपुटसविधादा वा लवणप्रभूतिकुल्यायाः ॥
इति प्राग्दक्षिणप्रत्यगुदीचीनां दिशां क्रमात् ।
अस्याग्रहाररत्नस्य सीमासंधिः प्रदर्शितः ॥
देशोऽभून्मुलिकिप्रथामधिगतस्तत्रास्ति पुष्पाचलो
नाम स्थानमनुत्तमं पुररिपोस्तस्योत्तरस्यां दिशि ।
पेन्नाया स्फुट उत्तरत्र च तटे सिंकेसरीति श्रुतं
ग्रामं पूर्वमदापयन्नुपकराद्ग्रामोपहारं गुरुः ॥

आ सिन्धोर्वर्कराख्याया आ च जम्पूशिलोच्चयात् ।
आ वादरनदीकूलादा च केतनिकुण्टतः ॥

अस्य ग्रामस्य चतसृष्वाशास्विति किल क्रमात् ।
सीमासंधिरभिज्ञेयः सीमाभिर्गुणसंपदाम् ॥

तत्रैको हरितान्ववायजनुषेऽनन्ताय भागस्ततो
वाध्र्यश्चान्वयजन्मने द्विजनुषे द्वौ पेद्दिभट्टाय च ।
भारद्वाजकुलोद्भवाय तदनु द्वावेल्लयाख्याजुषे
हारीताय च वल्लभाय मुनये दत्तस्तथैकः पुनः ॥

कौण्डिन्याय च वोंमयाय विदुषे भागस्तथैकस्ततः
कौण्डिन्याय तु माधवाय धरणीदेवाय चैकस्तथा ।
भागः कूचयभूसुराय कृतिने श्रीवत्सगोत्राय च
श्रीवत्सान्वयसंभवाय च तथा श्रीरुद्रयाख्याभृते ॥

भूयः कौशिकवंशलब्धजनुषेऽनन्ताय भागः श्रुत-
श्चैकः काश्यपगोत्रक्लृप्तजनुषे भागः कुमाराय च ।
भागः कौशिकवंशजाय च तथा श्रीमञ्चयाख्याभृते
कोऽप्यन्यः कपिगोत्रजाय महते श्रीदेवयायेतरः ॥

अन्यः कश्चिदहोभ(ब)लाय च भरद्वाजान्वयोद्भूतये
श्रीवत्सान्वयजन्मनेऽपि च परः श्रीमल्लयार्याय च ।
भारद्वाजकुलोद्भवाय तु पुनः श्रीराघवायेतरो
दत्तो ह्यन्यतमस्तु कौशिकजनुर्भाजे नृसिंहाय च ॥

भागः काश्यपवंशभद्रजनुषे श्रीपेद्दयार्याय च
श्रीमद्गोतमवंशशेखररुचे श्रीपिन्नयाख्याय च ।
कौण्डिन्यान्वयमल्लयाथ च भरद्वाजान्वयश्रेयसे
संभूताय च विट्ठलाय पुनरित्येकैकमेवार्पितः ॥

दत्तो विश्रुतकाश्यपान्वयभुवे श्रीतिप्पयार्याय त-
द्गोत्रोद्भूतिजुषे तथाप्ययल्लुरिति ख्याताय वीतांहसे ।

नागाख्याय च धीमते गुरुभरद्वाजाभिजन्मस्पृशे
वाधूलाय च सर्वनाम वहते भागोऽयमेकैकशः ॥
श्रीशालावतवंशजाय **नृहरिप्रख्याय** दत्ताः पुनः
शाण्डिल्याय च भूसुराधिपतये **श्रीगिर्यभिख्याजुषे** ।
श्रीकण्ठाय च काश्यपान्वयभुवे कौण्डिन्यगोत्रश्रिते
लक्ष्मीदेवविपश्चिते तदितरे भागास्तथैकैकशः ॥
सद्वृत्तोदारमुक्तामयभरितवपुर्नित्यसौगुण्यगण्य-
क्षेत्रालंकारभूतः शमितकटुमनस्तापवह्निप्रकाशः ।
आद्यो वर्णः प्रसिद्धिं श्रयति खलु यतः शाश्वतावासरम्यः
स श्रीकण्ठाग्रहारः स्फुरतु विगलितत्रासमाचन्द्रवासम् ॥
इति **भोगनाथ**[1]सुधिया [2]**संगम**भूपालनर्मसचिवेन ।
श्रीकण्ठपुरसमृद्ध्यौ शासनपत्रेषु विलिखिताः श्लोकाः ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो महद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥
एकैव भगिनी लोके विप्रदत्ता वसुंधरा ।
न भोग्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्टायां जायते क्रिमिः ॥

---

१. अयं **सायण-माधव**योर्भ्राता प्रतीयते, तथा च **पराशरमाधवीये**—
'**श्रीमती** जननी यस्य सुकीर्ति**र्मायणः** पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥
बौधायनं यस्य सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजं कुलं यस्य सर्वज्ञः स हि **माधवः** ॥' इत्युपलभ्यते.

२. अस्यैव **संगम**महाराजस्य राज्यसमये **माधवीयधातुवृत्ति**र्माधवसहोदरसायणेन विरचिता. अतएव—'**कम्प**राजसुत**संगम**महाराजमन्त्रिणा **मायण**पुत्रेण **माधव**सहोदरेण **सायणे**न विरचितायां माधवीयधातुवृत्तौ' इति प्रतिगणसमाप्तौ समुपलभ्यते.

स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
न विषं विषमित्याहुर्ब्रह्मस्वो विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वः पुत्रपौत्रकम् ॥
एवं विज्ञाय यो राजा पालयेत्पृथिवीसुरान् ।
साम्राज्यलक्ष्मीसंपन्नः स भूमौ सुखमेधते ॥

॥ श्रीविरूपाक्ष ॥

श्रीकण्ठपुरसंपूर्त्यै श्रीविरूपाक्षसंज्ञया ।
लिखितः संगमेन्द्रेण पत्रे पञ्चाक्षरो मनुः ॥
श्रीकण्ठनाथ ॥ मङ्गलमहा० श्री श्री श्री श्री श्री ॥

(एपिग्राफिआ इण्डिका—३।२४-३२)

---

(१४०)

श्रीवीरबुक्कमहाराजप्रपौत्रवीरविजयमहाराजपुत्र-श्रीदेवरायमहाराजानां[1] शासनपत्रम् ।

भूयस्यै भवतां भूत्यै भूयादाश्चर्यकुञ्जरः ।
विहारविपिनं यस्य विदुर्वेदान्पुराविदः ॥
क्षेमं वः प्रचुरीकुर्यात्क्षोणीमभ्युद्वहन्नयम् ।
क्रोडाकृतेरभूघस्य क्रीडापल्वलमम्बुधिः ॥
अस्ति क्षीरार्णवोद्भूतमपांपुष्पमनुत्तमम् ।
अम्लानं यदनिर्माल्यमाधत्ते शिरसीश्वरः ॥
सदामोदनिधेस्तस्य संतानो यदुसंज्ञया ।
अभूदाश्चर्यमाधुर्यं वसुधायास्तपःफलम् ॥

---

१. 'इदं शासनपत्रं विल्लूरपरिगणे सत्यमङ्गलम्ग्रामे अरुणाचलसंनिधौ गर्तस्थितं Mr. H. Le. Fanu. I. C. S. महाशयेन गृहीत्वा मत्पार्श्वे प्रेषितम्' इति Dr. E. Hultzsch Ph. D. महाशयाः प्रकाशकाः.

संगमो नाम राजासीत्सारभूते तदन्वये।
प्रजानां यः समस्तानां प्रमोदो मूर्तिमानिव॥
सर्वरत्ननिधेस्तस्य सम्राडासीत्तनूभुवाम्।
मध्ये **बुक्क**महीपालो गणीनामिव कौस्तुभः॥
अहीनभोगसंसक्तिरसौ राजशिखामणिः।
गोप्ता **हरिहरं गौर्यां** कुमारमुदपादयत्॥
यः षोडशमहादानमहामण्डपकर्मणा।
भवनं कृतवान्सर्वं भुवनं कीर्तियोषितः॥
तस्य **मलाम्बिका**जानेरुदभूदुन्नतो गुणैः।
प्रतापदेवरायाख्यः पुत्रः सुत्रामविक्रमः॥
कर्णतालानिलैर्यस्य करिणां समराङ्गणे।
तुलुष्कास्तुरगारूढास्तूलानामभजन्दशाम्॥
हेमाम्बिकायां तस्यासीत्तनयो विनयोन्नतः।
विद्यानिधिर्विशेषज्ञो वीरो **विजय**भूपतिः॥
प्रतापकीर्तिलतयोः प्रभोर्यस्य समिद्धयोः।
पुष्पाणि तडितस्ताराः पुष्पवन्तौ च तौ फले॥
दयानिधेरभूत्तस्य देवी **नारायणा**म्बिका।
शौरेरिव महालक्ष्मीः शंकरस्येव पार्वती॥
पुत्ररूपं तयोः श्लाघ्यं पूर्वजन्मतपः फलम्।
देवरायमहीपालो दाता विजयते भुवि॥
कलिकालानलज्वालाजालग्लपितकन्दलः।
दाताम्बुधारया यस्य ध्रियते धर्मपादपः॥
यस्य प्रतापतपने यशश्चन्द्रे च जाग्रति।
सदैव कमलोल्लासः सदा कुवलयोत्सवः॥
कृते पृथुरभूद्रामस्त्रेतायां द्वापरेऽर्जुनः।
विभाति यः कलौ धीरः क्षितावेकधनुर्धरः॥

सौन्दर्यसारे कंदर्पे सर्वानन्दे सुधाकरम् ।
क्रीडारसेषु यं कृष्णं कीर्तयन्ति कवीश्वराः ॥
राजाधिराजस्तेजस्वी यो राजपरमेश्वरः ।
भाषातिलङ्घिभूपालभुजङ्गबिरुदोज्वलः ॥
मूरुरायरगण्डाङ्कः पराजयभयंकरः ।
हिन्दुरायसुरत्राणो बन्दिवर्गेण वर्ण्यते ॥
प्रतापदेवरायेण प्रख्यातेनानुजन्मना ।
महेन्द्रस्येव यस्य श्रीरुपेन्द्रेण प्रकाशते ॥
श्रीतुङ्गभद्रापरिखे नगरे विजयाह्वये ।
पित्र्यं सिंहासनं प्राप्य सागरान्तां महीमवन् ॥
पुण्यश्लोकाग्रणीः श्रीमान्देवरायमहीपतिः ।
तुङ्गभद्रानदीतीरे श्रीविरूपाक्षसंनिधौ ॥
तत्त्वलोके (१३४६) शकस्याब्दे क्रोधिसंवत्सरे शुभे ।
आषाढामातिथौ पुण्ये सोमवारविराजिते ॥

मरकतनगरप्रान्ते—

आन्दनाडाह्वये देशे चिटेयाख्यूरुसंज्ञकम् ।
ग्रामं तं नामधेयेन कृत्वालंकृतमात्मनः ॥
निधिनिक्षेपवार्यश्मसिद्धसाध्यादिसंयुतम् ।
अखण्डं सीमभिर्जुष्टं निरुपाधिकमञ्चितम् ॥
आचन्द्रतारकं धारापूर्वकं दक्षिणान्वितम् ।
अग्रहारममुं प्रादाद्भूसुरेभ्यः प्रतापवान् ॥
दत्तोऽयमग्रजन्मभ्यो देवरायमहीभुजा ।
आचन्द्रतारकं भूमावग्रहारः सुमेधसाम् ॥

अस्य वृत्तिभाजोऽग्रजन्मानः कथ्यन्ते—

भारद्वाजकुलोत्तंसः कृष्णदेवस्य नन्दनः ।
ऋक्शाखापारगः श्रीमाञ्शिङ्गपार्यो गुणोन्नतः ॥

प्राज्ञो **नरहरिः** श्रीमा**न्नागपो विट्ठपः** सुधीः।
संकणार्यो नरप[ति]सूरि**र्वल्लभ**कोविदः ॥
शिङ्गपार्यस्य तनयाः सहजा विनयोन्नताः।
भारद्वाजो **नरहरिर्विरूपाक्ष**स्य नन्दनः ॥
ऋक्शाखापारदृश्वानो भारद्वाजकुलोद्वहाः।
एकैकवृत्तिभाजोऽस्मिन्नित्यमष्टौ द्विजोत्तमाः ॥
अष्टावस्याग्रहारस्य वृत्तयः परिकल्पिताः।
प्राच्यादिदिक्षु सीमानः कथ्यन्ते देशभाषया ॥
[..]

आभिः सीमाभिरासं हरिहयमहिमा दत्तवानग्रहारं
विप्रेभ्यो वेदविद्भ्यो विमलतरयशा **देवरायक्षितीन्द्रः**।
आलोकालोकशैलादखिलधरणिभृन्मस्तकन्यस्तपादः
प्रीत्या पृथ्वीं समस्तामवतु चिरमिमां दिक्षु दीव्यत्प्रतापः ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम्।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो महद्भिः।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥
श्री श्री श्री श्री श्री ॥ श्रीविरूपाक्ष ॥

(एपिग्राफिआ इण्डिका—३।३७–३९)

---

(१४१)

श्रीमाधववर्ममहाराजानां शासनपत्रम्[1] ।

ओं स्वस्ति ।

इन्दोर्धौतमृणालतन्तुभिरिव श्लिष्टैः करैः कोमलै-
र्बद्धाहेररुणै स्फुरत्फणमणेर्दिग्धप्रभासोंऽशुभिः ।
पार्वत्याः सकचग्रहव्यतिकरव्यावृत्तबन्धश्लथा
गङ्गाम्भःप्लुतिभिन्नभस्मकणिकाः शंभोर्जटाः पान्तु वः ॥

श्रीमानुच्चैर्नभस्तो गुरुरचलपतेः क्षोभजिद्यः क्षमाया
गम्भीरस्तोयराशेरथ दिवसकराद्भास्वदालोककारी ।
ह्लादी सर्वस्य चेन्दोस्त्रिभुवनभवनप्रेरकश्चापि वायो
राजेन्द्रः स्थाणुमूर्तिर्जयति कलिमलक्षालनो **माधवेन्द्रः** ॥

प्रांशुर्महेभकरपीवरचारुबाहुः
कृष्णाश्मसंचयविभेदविशालवक्षाः ।
राजीवकोमलदलायतलोचनान्तः
ख्यातः कलिङ्गजनतासु **पुलिन्दसेनः** ॥

तेनेत्थं गुणिनापि सत्त्वमहता नेष्टं भुवो मण्डलं
शक्तो यः परिपालनाय जगतः को नाम स स्यादिति ।
प्रत्यादिष्टविभूत्सवेन भगवानाराधितः शाश्वत-
स्तच्चित्तानुगुणं विधित्सुरदिशद्वाञ्छां स्वयंभूरपि ॥

स शिलाशकलोद्भेदे तेनाप्यालोक्य धीमता ।
परिकल्पितसद्वंशः प्रभुः **शैलोद्भवः** कृतः ॥

---

१. इदं शासनं येषु ताम्रपत्रेषु संलिखितं वर्तते तानि ताम्रपत्राणि **मद्रास**प्रान्ते **गंजाम**परिगणे **गम्सूरा**धिकारे **बागुदा**ग्रामे एकस्मिन्क्षेत्रे मृद्भाण्डनिहितानि भूमिगर्तस्थानि समुपलब्धानि Mr. E. C. Johnson, I. C. S., (Collector, Ganjam)महाशयेन Dr. Hultzsch महाशयपार्श्वे प्रेषितानि सांप्रतं Government Central Museum, Madras, स्थाने वर्तन्ते इति संशोधकाः F. Kielhorn, Ph. D., C. I. E. महाशयाः.

शैलोद्भवस्य कुलजो **रणभीत** आसी-
द्येनासकृत्कृतभियां द्विषदङ्गनानाम्।
ज्योत्स्नाप्रबोधसमये स्वधियैव सार्ध-
माकम्पितो नयनपक्ष्मजलेषु चन्द्रः॥

तस्याभवद्विबुधपालसमस्य सूनुः
श्रीसैन्यभीत इति भूमिपतिर्गरीयान्।
यं प्राप्य नैकशतवैरिघटाविघट्टि-
लब्धप्रसादविजयं मुमुदे धरित्री॥

तस्यापि वंशेऽथ यथार्थनामा जातो **यशोभीत** इति क्षितीशः।
येन प्ररूढोऽपि शुभैश्चरित्रैर्मृष्टः कलङ्कः कलिदर्पणस्य॥

जातः स तस्य तनयः सुकृती समस्त-
सीमन्तिनीनयनषट्पदपुण्डरीकः।
श्रीसैन्यभीत इति भूमिपतिर्महेभ-
कुम्भस्थलीदलनदुर्ललितासिधारः॥

जातेन येन कमलाकरवत्स्वगोत्र-
मुन्मीलितं दिनकृतेव महोदयेन।
संक्षिप्तमण्डलरुचश्च गताः प्रणाश-
माशु द्विषो ग्रहगणा इव यस्य दीप्त्या॥

कालेयैर्भूतधात्रीपतिभिरुपचितानेकपापावतारै-
र्नीता येषां कथापि प्रलयमभिमता कीर्तिपालैरजस्रम्।
यज्ञैस्तैरश्वमेधप्रभृतिभिरमरा लम्भिता तृप्तिमूर्वी-
मुद्दृप्तारातिपक्षक्षयकृतिपटुना श्रीनिवासेन येन॥

कैङ्गोदकृतनिकेतः शरन्निशाकरमरीचिसितकीर्तिः।
स **श्रीमाधववर्मा** रिपुमानविघट्टनः कुशली॥

गुडुविषये श्रीसामन्तमहासामन्तमहाराजराजानकराजपुत्रदण्डनायका-
न्तरङ्गकुमारामात्योपरिकतदायुक्तकविषयपतिवैश्वासिकपत्तलकादीन्ब्राह्मणपू-

वाज्ञानपदानन्यांश्च वर्तमानभविष्यतो व्यवहारिणः साधारणान्यथार्हं दंतेत्यो-(प्रबोध्यो)पदर्शयति । विदितमस्तु भवतामेतद्विषयसंबन्धखदिरपाट्टके पुइपिणो ग्रामः स्वपित्रोरात्मनश्च पुण्याभिवृद्धये सूर्यग्रहोपरागे तैत्तिरीयचरणाय हारितगोत्राय त्र्यार्षेयाङ्गिरसाम्बरीषयौवनाश्वेति युवनाश्ववदम्बरीषवदङ्गिरस्वत् वामणस्य नप्त्रे आदित्यदेवस्य सूनवे भट्टवामणाय सलिलधारापुरःसरं अकरीकृत्य प्रतिपादितस्तदेषामाचन्द्रार्ककालमुपभुञ्जानानां धर्मगौरवान्न केनचिद्विघाते वर्तितव्यम् । अपि च ।

विद्युद्विलासतरलामवगम्य सम्य-
ग्लोकस्थितिं यशसि सक्तमनोभिरुच्चैः ।
नित्यं परोपकृतिमात्ररतैर्भवद्भि-
र्द्धर्माभिराधनपरैरनुमोदितव्यम् ॥

उक्तं च मानवे धर्मे—

बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
मा भूदफलशङ्का वः परदत्तेऽपि पार्थिवाः ।
स्वदानात्फलमानन्त्यं परदत्तानुपालने ॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥
लिखितोपेन्द्रसिंहोऽत्र तनयः कुण्डभोगिनः ।
लाञ्छितं जयसिंहेन उत्कीर्णं दड्डिभोगिना ॥
सम्यगाराधितस्वामिप्रसादः श्रेष्ठदूतकः ।
गङ्गभद्रो..........प्रातिहार्ये व्यवस्थितः ॥

(एपिग्राफिआ इण्डिका—३।४३–४६)

(१४२)

धारानगराधीश्वरजयसिंहमहाराजानां शासनम्[1]।

ॐ

जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम्।
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम्॥
तन्वन्तु वः स्मरारातेः कल्याणमनिशं जटाः।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गलाः॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक(क्प)तिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसिन्धुराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीभोजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीजयसिंहदेवः कुशली॥ पूर्णपथकमण्डले मक्कुलाग्रामद्विचत्वारिंशदन्तःपातिभीमग्रामे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च समादिशति—अस्तु वः संविदितम्। यथा—श्रीमद्धारावस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा

वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने॥

---

१. इदं शासनं ययोस्ताम्रपत्रयोर्लिखितं वर्तते ते ताम्रपत्रे नर्मदानिकटस्थे मान्धातान्तरीपे नीमारपरिगणे समुपलब्धे Mr. Cousens (Superintendent of the Archæological Survey of Western India) महाशयेन यत्नाधिक्येन प्रतिबिम्बीकृते Dr. Hultzsch महाशयेन मम समीपे प्रैषि इति संशोधकवराः Dr. F. Kielhorn, Ph. D., C. I. E. महाशयाः.

भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥

इति जगतो विनश्वरं स्वरूपमाकलय्योपरिलिखितग्रामोऽयं स्वसीमातृणगोचरयूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतश्च श्री**अमरेश्वरे** पट्टशालाब्राह्मणेभ्यो भोजनादिनिमित्तं मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽदृष्टफलमङ्गीकृत्य चन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकं देवब्राह्मणभुक्तिवर्जमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमेभ्यः समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्धास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तिप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥'

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

इति संवत् १११२ आषाढवदि १३ । स्वयमाज्ञा । मङ्गलं महाश्रीः । स्वहस्तोऽयं श्रीजयसिंहदेवस्य ॥

(एपिग्राफिआ इण्डिका—३।४८–५०)

---

(१४३)

श्रीअन्नवेमभूपतेः शासनपत्त्रम्[1]।

अविघ्नमस्तु।

अव्याद्विभुः किरिवपुर्भुवमुद्धरन्यः
शेषस्फटामणिसहस्रगतस्वबिम्बः।
सुव्यक्तमाश्रितजनाय तदादरेण
स्वीयं विभाति कथयन्निव सर्वगत्वम्॥

शंभोर्हेरिफणारत्नैः कर्तुं हारं समुत्सुकः।
तानि स्पृशन्पितुर्वक्त्रे पश्यन्पातु गजाननः॥

सा चन्द्ररेखा जयति श्रीकण्ठस्य जटास्थिता।
या धत्ते पार्वतीभालफलकश्रियमुज्ज्वलाम्॥

विष्णोर्नाभिसरोजाताज्जातः सरसिजासनः।
तदाज्ञया जगत्सर्वं ससर्ज सचराचरम्॥

यत्र चतुर्थो वर्णः शौरेः पदपद्मसंभवो जयति।
यस्य सहजा स्रवन्ती त्रिभिः प्रवाहैः पुनाति भुवनानि॥

तस्मिन्नभूदिन्दुरिवाम्बुराशौ प्रोलक्षितीशो जगदेकपालः।
कलानिधेर्यस्य निजावतारः संतर्पणायैव सदा बुधानाम्॥

तस्य पुण्योदयाज्जातः सुपुत्रः प्रोलभूपतेः।
वेमावनीश्वरो नाम पुण्यश्लोको नृपाग्रणीः॥

यस्मिन्नृपे शासति धर्मशीले महोत्सवान्प्राप्य महीवधूटी।
स्वीयं हरिश्चन्द्रनृपालमुख्यैर्वियोगदुःखं सहसा मुमोच॥

---

१. इदं शासनं येषु ताम्रपत्त्रेषु लिखितमस्ति तानि ताम्रपत्त्राणि गोदावरीनिकटे अमलापुरम्परिगणे वनमल्लीग्रामे एकस्यां जीर्णकल्पभूमौ खनकेनोपलब्धानि Mr. P. V. S. Gopalam महाशयेन ज्ञात्वा Archæological survey, Madras संज्ञकस्याधिकारिणे निवेदितानि स्वामिना Vissapragad Krishnayya महाशयेन मद्रासस्वामिने समर्पितानि सांप्रतं मद्रासप्रदर्शिन्यां वर्तन्ते इति संशोधकाः Dr. E. Hultzsch, Ph. D. महाशयाः. २. 'हरि' भवेत्.

हेमाद्रिदानान्यकरोदशेषाण्यभुङ्क्त भूमिं द्विजभुक्तशेषाम् ।
यः संततीः सप्त चकार तस्य किं वर्ण्यते वेमविभोश्चरित्रम् ॥

सोपानानि विधाय वेमनृपतिः पातालगङ्गापथे
स्तम्भत्वं निजधर्मशासनविधेः श्रीशैलमेवानयत् ।
आस्थाने सुरसिद्धसंयमिगणैरासेव्यमानः सदा
वक्रैस्तत्पुरुषादिभिः कवयते देवो यदीयं यशः ॥

आसीदप्रतिमप्रतापमहिमा हेमाद्रिदानव्रती
वीरश्रीपतिर**न्नवोत**नृपतिर्वेमक्षितीशात्मजः ।
बाहाखड्गवशादशाद्वसुमतीमेकातपत्रश्रियं
यश्चक्रे च यशःप्रवाहनिवहैस्त्रैलोक्यमेकार्णवम् ॥

जित्वा महीं जिष्णुरिव स्वशक्त्या दत्त्वाग्रहारान्धरणीसुतेभ्यः ।
कृत्वा कृतार्थं निजबन्धुवर्गं जनैः फलं प्राप स भूमिपालः ॥

तस्यानुजन्मा **जगनोब्बगण्डः** कीर्तिप्रियो भूपतिर**न्नवेमः** ।
वृत्तिर्यदीया भुवि मात्रिकाभूद्धर्मार्थकामाचरणोद्यतानाम् ॥

श्री**कौंडवीटी**पुरिराजधान्यां सिंहासनस्थे सति यत्र राज्ञि ।
महोग्रसिंहासनवन्महीध्रान्व्रजन्ति सेर्ष्या इव वैरिभूपाः ॥

यत्खड्गफलके च्छाया स्फुरन्त्यतिविनिर्मलाः ।
अनन्तक्षोणिपालानां भाग्यरेखा इवाहृताः ॥

तेना**न्नवेम**क्षितिपेन दानक्षात्रैकतानेन महोन्नतेन ।
चतुर्दिगन्ता धरणी कृतासीदपारिजाता च सपारिजाता ॥

खड्गो जिष्णुः शुचिः कालः क्रव्यात्पाशी प्रभञ्जनः ।
श्रीदो भीमोऽन्नवेमस्य धत्ते दिक्पालडम्बरम् ॥

केचिद्देशाधिपत्यं कतिचन शिबिकाचामरच्छत्रशोभां
केचिद्राज्यं स्वकीयं कतिचन विभवैरग्रहारानुदारान् ।
विन्दन्ते लोकरक्षाविधिमहितमहाभागधेयेऽ**न्नवेम**-
क्षोणीपाले सभायां सकलगुणनिधौ रत्नसिंहासनस्थे ॥

क्षुरिकाकलिवेतालः कर्पूरवसन्तरायबिरुदाङ्कः ।
निःसीमभूमिदानः श्रीनिधि**रनवेम**भूपतिर्जयति ॥

अन्नवेमप्रभोर्लक्ष्मीर्विबुधानां विभूतये ।
तस्यैव कीर्तये जाता तेषामपि सरस्वती ॥

शाकाब्दे गगनाभ्रविश्व(१३७०)गणिते सिद्धार्थिसंवत्सरे
माघे कृष्णचतुर्दशी शिवतिथौ वी**रान्नवेम**प्रभुः ।
प्रादा**दिंमडिलंक**संज्ञमतुलं कृत्वाग्रहारोत्तमं
ग्रामं लोहितगोत्रजाय विदुषे श्री**इम्मडीन्द्राय** सः ॥

नीतो मन्त्रीश्वरो विद्यागोष्ठीषु विबुधाग्रणीः ।
मित्रं हितोपदेशेषु भूभुजा**मिम्मडी**श्वरः ॥

स **इम्मडीन्द्रः** सकलार्थवेदी मानाधिको **मल्लय**मन्त्रिसूनुः ।
लब्ध्वाग्रहारं लसदन्तरात्मा प्रादात्तदर्धं धरणीसुरेभ्यः ॥

वीराध्यापकमहितं गौतमकन्याप्रवाहपरिवीतम् ।
भाति बहुसस्यशोभितमिम्मडिलंकान्नवेमपुरमनघम् ॥

अथ सीमानिर्णयः—

क्रिद्देवीपश्चिमश्वत्था प्राच्यां यामे तु दिङ्मुखे ।
प्रख्याग्रा मांगणाश्वत्थभुग्गुल्लसंदवेश्मनोः ॥

ऋज्वी या माध्यमा च्छाया प्रतीच्यां दिशि गौतमी ।
उदीच्यामपि कौंडूरीकौंडुपूंडीवटान्तरम् ।
सीमा इम्मडिलंकस्य ग्रामस्य परिकीर्तिताः ॥

अथ पुराणवचनानि—

दानपालनयोर्मध्ये पालनं परमं यशः ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥

स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्॥

रामचन्द्रेण उदीरितं च—

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।
सर्वानेवंभाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामचन्द्रः॥

श्रीमत्त्रिलोचनार्यः सुकविः कविवंशदीपको जयति।
अनवेमनृपतिदत्तस्येम्मडिलङ्कस्य शासनं कृतवान्॥

महानटजटाछटानटदमन्दमन्दाकिनी-
कलक्वणितकङ्कणव्रजविजृम्भिवाग्गुम्फनः।
कविः कविकुलोद्भवो भुवनभव्यदिव्योदयः
शिवागमविशारदो जयति शारदावल्लभः॥

श्रीमत्त्रिपुरान्तकः। अनवेमु व्राळु॥

(एपिग्राफिआ इण्डिका—३।६०–६३)

---

(१४४)

श्रीजायचमूपतिकारितगणपतीश्वरप्रतिष्ठाशासनम्।

श्रीकान्तः श्रियमातनोतु भवतां क्रोडाकृतिर्वारिधे-
रज्ञात्वाशु समुद्धृतां लघुतयोद्धर्तुं क्षितिं दंष्ट्रया।
यस्तावद्ववृधे निपीडिततनुर्ब्रह्माण्डखण्डे भृशं
स्वस्थानस्थितियाचनोचितपदैस्तुष्टाव यावन्न सा॥

---

१. इदं च शासनं **किष्टना**परिगणे **मसुलीपट्टम्** वान्दरताल्लुकामध्ये **टलगडा**-देवीनिकटे **गणपेश्वरम्**ग्रामे **दुर्गाम्बामन्दिर**संमुखे वर्तमानस्य पाषाणस्तम्भस्य त्रिषु पश्चिमदक्षिणपूर्वभागेषूल्लिखितम्. एतस्य समाप्तेरनन्तरं पूर्वभागे उत्तरभागे चापराणि चत्वारि स्वल्पशासनानि समुल्लिखितानि. इदं शासनं Mr. G. Mackenzie महाशयेन Manual of the Kistna District पुस्तके २१४ पृष्ठे Mr. R. Semell महाशयेन च List of Antiquities ग्रन्थे प्रथमभागे ५४ पृष्ठे प्रकाशितम् इति E. Hultsch महाशयाः प्रकाशकवराः. शकसंवत् ११५३ (1232 A. D.) समयस्तु व्यक्त एव.

जयति शिरसि शंभोरिन्दुलेखा मयूखै-
रमृतविसरसारैः क्षालयन्ती जगन्ति।
शिशिरविशदगङ्गावारिभृज्जूटभास्व-
त्कनककलशलग्ना राजतीव प्रणाली॥
गजास्यः पातु वो यस्य भान्ति दानान्तिकालिनः।
महाद्रिनिर्झरोपान्तकान्तनीलोपला इव॥
अस्त्यूर्जितं **काकति**वंशजानां नरेश्वराणां कुलराजधानी।
अन्ध्रावनीमण्डन**मन्मकोण्ड**नामाभिरामं नगरं धरित्र्याम्॥
तत्र स्थितः **प्रोल**धराधिनाथः स्वबाहुवीर्येण धरां ररक्ष।
यस्य प्रतापज्वलने समन्ताच्छत्रुक्षितीशाः शलभा बभूवुः॥
केचि**न्मन्तनगुं[ड]**वत्क्षितिभृतः खड्गेन निष्खण्डिताः
केचि**त्तैलपदेव**वद्गजहयं युद्धाजिरे त्याजिताः।
केचिद्दूरमपोहिताः समरतो **गोविन्ददण्डेश**व-
त्केचित्स्वस्वपदेषु येन निहिताश्**चोडोदयक्ष्मेश**वत्॥
तस्मा**त्प्रोल**नरेशान्**मुप्पलदेव्यां** बभूवतुः पुत्रौ।
रिपुनृपमदेभसिंहौ [रु]**द्रमहादेव**भूप[ती] ख्यातौ॥
पितुः परोक्षे वसुधां शशास **रुद्र**क्ष्माभृद्भुवनैकवीरः।
यस्य प्रतापोल्बणदाववह्निः प्रत्यर्थिपृथ्वीशवनं ददाह॥
उन्मृष्टानि पुराणि येन कथयन्त्यापूर्य तत्तज्जनै-
स्तत्तन्नामभिरो**रुगल्लु**नगरे निर्मापिता वाटिकाः।
किंच स्वेषु कृतेषु तेष्वथ पुरेष्वापूर्य नूत्नैर्जनैः
श्रीरुद्रेश्वरसंज्ञया विरचिताः प्रख्यातदेवालयाः॥
पोषणैस्तोषणैर्दण्डैः पालनैरुपलालनैः।
संवर्धिताः प्रजा येन पित्रेव धरणीभृता॥
दिवं गते **रुद्र**नृपे बभार भुवं **महादेव**विभुर्विनेशुः।
प्रतापभाना[वु]दिते यदीये तेजांसि भानाविव भूपतीनाम्॥

तस्मान्महादेवमहामहीशाद्**बय्याम्बिका**यामभवत्प्रभावान् ।
सर्वंसहासर्वधुरीणपाणिः कुलप्रदीपो **गणपत्यधीशः** ॥
यस्योन्मत्तगजेन्द्रगण्डविगलद्दानाम्बुवृष्टिप्लुते
त्वङ्गत्तुङ्गतुरङ्गनिष्ठुरखुरैः कृष्टे तथानेकधा ।
युत्क्षेत्रे रिपुहस्तिमस्तकगलन्मुक्तौघ[बी]जाकृते
जाताः कीर्तिलताः शशाङ्कविशदा वेल्लन्ति दिग्भित्तिषु ॥
निज[भु]जविजितानां निर्जितानां परैर्वा
शरणमुपगतानां सोमसूर्यान्वयानाम् ।
निखिलनरपतीनामाश्रयः सन्सदा यः
प्रतिदिनपरिवृद्धप्राज्यराज्यो विभाति ॥
अस्य भृत्यः प्रियो भाति गणपत्यवनीभृतः ।
श्रीमज्**जाय**चमूनाथः कथ्यतेऽयं तदन्वयः ॥
विक्रान्तिमानय्यकुले प्रसिद्धे प्रादुर्बभूवात्र कलौ स **भीमः** ।
दुःशासनः शासित एव शत्रुर्दुर्योधनोऽयोधि सुखेन येन ॥
भुवोऽवतंसे **वेलनाण्डु**देशे **क्रोय्यूरु**संज्ञं कुलसन्निवासम् ।
ग्रामं स **भीमो** धनदोपमानश्चकार वित्तैरलकोपमानम् ॥
रच्याम्बिकायां प्रबभूवुरस्मात्ते **जिल्लनारायणसूरया**ख्याः ।
शक्तिप्रभेदैरिव यैस्त्रिभिश्च जिगाय शत्रून्भुवि **चोडिभूपः** ॥
जिल्लः समुल्लासितबाहुवीर्यः **कन्नारदेवं** समरे विजित्य ।
लेभे निजेशाच्छिबिकातपत्राद्यशेषचिह्नैर्ध्वजिनीपतित्वम् ॥
तस्यानुजः संततमेव भर्तुर्**नारायणः** कार्यपरायणोऽभूत् ।
यश्चोडिभूपस्य रिपूनशेषांश्चकार भृत्यान्नयविक्रमाभ्याम् ॥
यः कृष्णवेणीलवणाब्धिसङ्गे द्वीपं पुरैतद्धनदेन सृष्टम् ।
परैर्दुरापं वसतां मनोज्ञं चकार दुर्गं प्रभुणा नियुक्तः ॥
पूर्णाभ्यर्णतटाकवाःप्लुतलसच्छालीक्षुकेदारकं
नानापुष्पफलाभिशोभितमहारामाभिरामस्थलम् ।

सौधाट्टालकहर्म्यगोपुरबृहत्प्राकारभास्वत्पुरं
द्वीपं भूपनिवासयोग्यमकरोद्यः प्रागसेव्यं नृणाम् ॥
चोडसमुद्रतटाकं **चोडेश्वरधाम** चात्र हि द्वीपे ।
यश्चक्रे पतिनाम्ना **भीमेश्वरमन्दिरं** च पितृनाम्ना ॥
अत्रैव प्रासादान्विष्णोश्च करालभैरवस्यापि ।
यश्चाकरोन्मनोज्ञान्बण्डुलदेव्या महाकाल्याः ॥
अथ **वड्लकुळ्ळ**नामग्रामे यश्चाकरोत्पितुर्नाम्ना ।
भीमसमुद्रतटाकं **भीमेश्वर**नाम रम्यशिवभवनम् ॥
नारायणाय तस्मै पौरुषपरितोषितः पतिः प्रादात् ।
द्वीपस्याधिपतित्वं स्वामित्वं चापि **गोण्डु**पल्लीनाम् ॥
अर्थार्जकमतिशूरं ज्ञात्वा देशाधिकारधौरेयम् ।
चक्रे सेनाधिपमपि **नारायण**मेव चोडिनरनाथः ॥
तस्माज्जाताः ख्यातनारायणाख्यान्**नाराम्बा**यां सूनवो भानुभासः ।
चोडिर्भीमः पिन्नचोडिर्यशस्वी नाम्ना **ब्रम्म**श्चेति चत्वार एते ॥
अपामधीशा इव वाडवाश्रयाः प्रभोरुपाया इव कार्यसाधकाः ।
करा इवाश्लिष्टरमा मुरद्विषो विभान्ति चत्वार इमे भटोत्तमाः ॥
चोडपृथ्वीशभूपस्य च[तु]राशाजयावहाः ।
अभूवन्बाहुवीर्येण चत्वारो भटपुंगवाः ॥
विष्णोः श्रीरिव गीरिवाम्बुजभुवः शंभोरिवाद्रेः सुता
कामस्येव रतिः शचीव सुरपस्योषेव शोचिष्पतेः ।
शीतांशोरिव रोहिणी गुणनिधेः श्री**पिन्न**[चो]डिप्रभो-
र्दामाम्बा कुलपालिका समभवद्धीरार्थिनां कामधुक् ॥
नाराम्बा पेरमाम्बा च सुते जाते तयोरुभे ।
पुत्रास्त्रयोऽभवन्**पृथ्व्रजायनारायणा**ह्वयाः ॥
भ्रातृषु त्रिषु तेष्वेष मध्यमोऽप्युत्तमो गुणैः ।
राजते **जाय**सैन्येशः पाण्डवेष्विव मध्यमः ॥

कालेऽस्मिन्नृपशेखरो **गणपति**क्षोणीपतिर्लीलया
जित्वा चोलकलिङ्गसेवणबृहत्कर्णाटलाटाधिपान् ।
रक्षन्दक्षिणसिन्धुविन्ध्यनगयोर्मध्यक्षमामण्डलं
सद्वीपं **वेलनाण्डु**देशमखिलं स्वायत्तमेवाकरोत् ॥

स्त्रीरत्नपुरत्नगजाश्वरत्ननानाशिलारत्नचयं समन्तात् ।
आहृत्य चास्मद्वेल**नाण्डु**देशात्प्रावेशयत्स्वं पुरमेव भूपः ॥

अथ रूपविलासविभ्रमैरसमाने भुवनत्रयेऽप्यमू ।
गणपत्यवनीपतिर्व्यधाद्दयिते **नारमपेरमाह्वये** ॥

तदनुजमतिसौम्याकारमाकारलक्ष्यैः
सुविनयनयदाक्ष्यस्थैर्यगाम्भीर्यशौर्यैः ।
शिशुमपि गरिमाणं प्रापितं **जायनाख्यं**
नरपतिरभिनन्द्य स्वानुचर्ये न्ययुङ्क्त ॥

ततः प्रसन्नश्चरितैर्मुदास्मै प्रादात्क्षितीशः खलु **जायनाय** ।
आन्दोलिकाछत्रसनाथचिह्नैः सेनाधिपत्यं गजसाधनित्वम् ॥

सुरेश्वरेणेव निजेश्वरेण सेनाधिपत्याधिकृतो विभाति ।
जायः कुमारो विबुधैः परीतः संप्राप्तशक्तिः परवीरहन्ता ॥

यस्यासिधारा प्रबलाहितानां देवाङ्गनासङ्गमनैकदूती ।
यन्नीतिरन्यक्षितिपाललक्ष्मीसंधानदूती निजवल्लभस्य ॥

शत्रूनशेषान्समरेषु शूरान्निगलिष्यतः खड्गमु[ख]स्य यस्य ।
यो **वैरिगोधूमघरट्ट**नाम्ना व्यराजत प्राक्बलः स जातः ॥

क्षीणत्वं प्रतिपक्षमेति नितरामेको द्विजाधीश्वरः
प्रायः क्षीणवसुः प्रयाति वसुमत्पार्श्वे सदैको बुधः ।
मूढः सन्कृतिचिह्नानान्यनुदयो ह्येकः कविर्वर्तते
मद्दानं किमितीव यः श्रुतिगताद्दानस्तवाल्लज्जते ॥

संपदितैर्यथावस्तुतकृतिनिधिवनविवाहसुरगेहैः ।
सतटाकैर्यः सप्तभिरेतैः संतानवान्भवति ॥

सोऽयं जायचमूपतिर्गणपतिक्षोणीशनाम्ना स्वयं
सद्भक्त्या गणपेश्वराह्वयमहादेवस्य लिङ्गाकृतेः।
द्वीपेऽस्मिन्स्वपितामहेन रचिते नारायणेनोन्नतं
प्रासादान्निरमापयद्भुवममुं कैलासशैलोपमम्॥
गुणशरभवमितशाके खरवर्षे माधवे सिते गौर्याः।
तिथ्यां व्यधात्प्रतिष्ठां जायः श्रीगणपतीश्वरस्यास्य॥

दिवि गणपतीश्वरश्रीमहादेवरकु पदिनेनिमिदि विषयमुल उभय नाना देसियु नंगेगडडनिच्चिन आयमु कलमुनं बद्द चिन्नमु॥ गणपतिदेवमहाराजुलकुं बुण्यमुगानु जायपनायकुंड्डु पेट्टिन वृत्तुलु। एनुंब ꣿ तनु पुट्लु ३। पेद्दमद्दालिनि पुट्लु ३। कुꣿद्दालिनि पुट्लु २। अयनंपूण्डिनि पुट्लु २। नेन्तलकोड्डूरनु पुट्लु २। मूनिकोंडनु पुट्लु २। चीकुलपल्लिनि पुट्लु २। कौंडिपꣿतनु पुट्लु २। पंचुंबꣿ पुट्लु २। चेवेंड्डून पुट्लु २। दोनेपूंडिनि पुट्लु ४। कारमूरनु पुट्लु २। ओडपांगुल पेट्टिन पोलमु। कौतेपल्लिनि पुट्लु २। त्रेंकटि पुट्लु २। जायपनायकुण्ड्डु अखण्डदीपमुनकुं वेट्टिन मोदालु २९॥

(एपिग्राफिआ इण्डिका—३।८४–८९)

---

(१४५)

श्रीबेतमहाराजमहिषीगणपाम्बादत्ताग्रहारप्रशस्तिः।

इष्टार्थप्राप्तिसंतुष्टैः प्रणुतं नाकिनां गणैः।
आर्यं विघ्नतमः सूर्यं गणेशं भजतानिशम्॥

---

१. अस्याश्च प्रशस्तेर्लेखः किस्नापरिगणे गन्दूरप्रान्ते येनमदलग्रामे एकस्मिन्स्तम्भे उत्कीर्णोऽस्ति. तत्समयो यद्यपि लेखेनैव स्फुटस्तथापि गणपतिमहाराजसत्ता शक संवत् ११५३ प्रभृति ११७२ पर्यन्तमासीत्, अतश्च तत्संनिधाने एव तत्पुत्र्या गणपाम्बिकाया अपि भवेदित्यनुमीयते, अतोऽयं लेखः खिस्तत्रयोदशशताब्द्यामुत्कीर्णो भवेदिति संभाव्यते. स चायं लेखः पूर्वं Colonel Colin Mackenzie महाशयवरसंग्रहतः Mr. Gordon Mackenzie महाशयवरेण गृहीत्वा म्यान्युअल आफ् दी किस्ना डिष्ट्रिक्ट् नाम्नि पुस्तके मुद्रापितः इति E. Hultzsch, Ph. D. महाशयवराः.

क्रीडाक्रोडाकृतेर्विष्णोर्दंष्ट्रादण्डो जयत्यसौ।
धात्री हेमाद्रिकलशा यत्र च्छत्रानुकारिणी॥
स्वस्ति श्रीकाकतीशानां वंशो जगति विश्रुतः।
यत्र जाता धरित्रीशाः क्षोणीरक्षासु शिक्षिताः॥
तत्रासीत्प्रथितोरुविक्रमचणः **प्रोल**क्षितीशाग्रणीः
क्षात्रैः शत्रुकुलान्तकः परिपरैः सन्नीतिशास्त्रोज्ज्वलः।
यस्याद्यापि विशालविश्रुततरक्रूरप्रतापोज्ज्वल-
ज्योतिःखण्ड इव प्रचण्डकिरणः खेलत्ययं खे रविः॥
जातो **माधव**भूपतिर्गुणगिरिस्तस्मान्महीवल्लभा-
द्यः सुप्त्वा सुमहाहवे गजवधूकुम्भद्वयस्योपरि।
प्रख्याताप्सरसः स्तनद्वयतटे प्राबोधि योधाग्रणी-
र्लोके ख्यातविशालनिर्मलयशा वीरश्रियामाश्रयः॥
संजातस्तस्य पुत्रस्त्रिभुवनतिलको विक्रमाद्वैतवादी
दृप्यद्राजन्यचूडामणिमकुटतटीनर्तिताज्ञाप्रचण्डः।
बुद्धेर्विश्रामभूमिर्**गणपति**नृपतिः पार्वतीशप्रसाद-
प्राप्तप्रख्यातसंपज्जितभुवनरमारक्षिताशेषलोकः॥
यत्कीर्तेः सकला दिशः परिजनाः क्रीडासरांस्यर्णवाः
मेरुः केलिमहीधरः प्रविलसल्लीलावनं नन्दनम्।
तत्तारापतिबिम्बमेव मुकुरं हर्म्यं च रोदोन्तरं
सोऽयं **श्रीगणप**क्षितीशतिलकः क्षोणीभृतामग्रणीः॥
क्षीराम्भोधिनिभात्तस्माद्भूपाद्गाम्भीर्यसंभृतात्।
गणपाम्बा समुद्भूता साक्षाल्लक्ष्मीरिवापरा॥
नीतिः सा विनुता विवेकविभवोद्भूतिः श्रियामुन्नतिः
सत्पूजाभिरतिः समग्रविनयः शंभौ च भक्तिः परा।
एतस्यां गणपाम्बिकानिजतनौ पुण्या वरेण्या गुणाः
सर्वे किं सहजा जयन्ति किमु वा संकेतभाजो भृशम्॥

श्रीधान्याङ्कपुराधीशः केतराज इति श्रुतः।
अखण्डमण्डलाधीशो राजासीद्राजशेखरः॥
कोन्नातवाडीविषयाधिनाथः श्रीकेतराजः क्षपितारिवर्गः।
धर्मं यदीयं प्रथितं त्रिलोक्यामद्यापि सर्वे गणशो गृणन्ति॥
वेर्णायाः दक्षिणे भागे येन धर्मस्वरूपिणा।
महाग्रहारतिलकाः सप्ततिर्विप्रसात्कृताः॥
आसीत्तस्यात्मजो राजा रुद्रराज इति श्रुतः।
यत्कीर्तिकान्ता शुद्धापि चित्रं दिक्पाललालिता॥
तेजोध्वस्ताखिलरिपुतमा रुद्रभूपोदयाद्रे-
रुद्यन्नुच्चैः क्षितिधरलसन्मस्तकन्यस्तपादः।
आशापूरप्रगुणवसुमान्वैबुधैः संस्तुतोऽयं
सार्थैः सम्यग्जयति नितरां बेतभूपालसूर्यः॥
सेयं पुण्यतनुर्विधाय विधिवच्छ्रीमद्विवाहोत्सवं
बेतक्ष्मापतिशेखराय गणपक्षोणीश्वरेणादरात्।
दत्ता श्रीगणपाम्बिका गिरिसुतेवेशाय लक्ष्मीर्यथा
लक्ष्मीशाय विशालविश्रुतगुणैर्गौर्या च लक्ष्म्या समा॥
तया सार्धं महाराज्यं कृत्वा धर्मं च शाश्वतम्।
याते बेतक्ष्मानाथे धन्ये देवेन्द्रसंसदम्॥
श्रीधान्याङ्कपुरेऽमरेश्वरविभोः श्रीमद्विमानोपरि
सौवर्णाः कलशा ययातिमहसः सम्यक्प्रतिष्ठापिताः।
निर्मायात्र पुरेऽपि बेतनृपतेर्नाम्ना विभोर्मन्दिरं
भर्त्तासौ शिवलोकशाश्वतसुखावासोत्सवं प्रापितः॥
भर्त्तुर्बेतमहीभर्त्तुस्तादृक्सुकृतसिद्धये।
शंभोरायतनं कृत्वा प्राकारपरिशोभितम्॥
तस्मिन्नायतने सौम्ये सौवर्णकलशोज्वले।
बेतेश्वरमहादेवप्रतिष्ठा विहिता तया॥

तस्य रङ्गाङ्गभोगार्थं तयासौ दत्त उत्तमः ।
ग्रामः समग्रसस्याढ्यो बेनदेवीति विश्रुतः ॥
श्रीधान्याङ्कपुरे रम्ये महालक्ष्मीस्वरूपया ।
गणपाम्बामहादेव्या अन्यच्च सुकृतं कृतम् ॥
गृहान्द्वादश संपाद्य वृत्तीश्चापि च पुष्कलाः ।
द्वादशादित्यसंकाशा विप्राः संरक्षितास्तया ॥
गणपक्षितिनाथस्य पितुर्नाम्नापि निर्मितम् ।
गणपेश्वरमिति ख्यातं देवतायतनं तया ॥
तस्मै रङ्गाङ्गभोगार्थं गणपेशाय शंभवे ।
ग्रामो दत्तो महादेव्या चिन्तापाड्डरिति श्रुतः ॥
यद्धस्तौ हरपूजनैकनिरतौ यस्याश्च दृष्टिश्रुती
शंभोरन्वहकारितोत्सवलसत्संगीतसक्ते सदा ।
इत्थं या दिवसान्सुखं गमयति प्राज्येऽपि राज्ये स्थिता
तन्नूनं गणपाम्बिका गिरिसुता तस्याः स्तुतौ कः प्रभुः ॥

(एपिग्राफिआ इण्डिका—३।९६-१०१)

---

(१४६)

सायणमाधवाश्रयश्रीबुक्कमहाराजतनयहरिहरमहाराजशासनम्[१] ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे ॥
हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु वः ।
हेमाद्रिकलशा यत्र धात्री च्छत्रश्रियं दधौ ॥

---

१. 'अस्य शासनलेखस्याधारभूतानि त्रीणि ताम्रपत्राणि Sir Walter Elliot महाशयेनानायितानि Dr. Fleet महाशयेन Dr. Hultzsch महाशयसमीपे प्रेषितानि. तेन महाशयेन प्रसिद्ध्यर्थं मह्यं दत्तानि इति प्रकाशकवराः V. Venkayya M. A. महाशयाः.

हेमाम्भोरुह किंजल्कपुञ्जपिञ्जरिताङ्घ्रये ।
विघ्नेश्वराय विघ्नानां निहन्त्रे विदधे नमः ॥

विष्णोरादिवराहस्य मूर्तिर्नित्यं श्रियेऽस्तु वः ।
धात्रीं महति दंष्ट्राग्रे धत्ते यस्तु श्रिया सह ॥

यद्दंष्ट्राङ्कुरगा हि भूरिह सतां कर्माणि वेदार्थिनां
तैर्नन्दन्त्यमरा हरिः कुलगुरुस्तेषां तदीया घनाः ।
ते वर्षन्ति भवन्ति सर्वलतिकासस्यानि वृष्ट्या प्रजा-
स्तैर्नन्दन्ति पितामहप्रणिहितास्तस्मै नमः पोत्रिणे ॥

आसीत्त्रैलोक्यजीवातुरानन्द इव मूर्तिमान् ।
परमेश्वरकोटीरप्रथमाभरणं शशी ॥

तदन्वये महातेजा यदुरासीन्महीपतिः ।
सोमवंश्या यतः श्लाघ्याद्यादवा इति विश्रुताः ॥

तस्मिन्यदुकुले श्लाघ्ये सोऽभूच्छ्रीसंगमेश्वरः ।
येन पूर्वविधानेन पालिताः सकलाः प्रजाः ॥

यद्यशःपुण्डरीकस्य कर्णिका कनकाचलः ।
मकरन्दप्रवाहोऽभून्महामन्दाकिनी नदी ॥

तस्य श्रीसंगमेन्द्रस्य पुत्रोऽभूत्पुण्यवैभवात् ।
वीरश्रीमङ्गलादर्शो वीरश्री[१]बुक्कभूपतिः ॥

[२]सप्तार्चिरलसं लोका अभुजङ्गविभूषणम् ।
वदन्त्यनुग्रनामानं शिवं यं बुक्कभूपतिम् ॥

यत्कीर्तिलक्ष्म्याः क्रीडन्त्या ब्रह्माण्डं रत्नमण्डपः ।
मुक्ताच्छत्रं शशाङ्कस्तु दीपः शुक्रदिवाकरौ ॥

---

१. अन्येषु लेखेषु सायणमाधवरचितग्रन्थेषु च 'बुक्क' इति तृतीयादिरेवोपलभ्यते.
२. सप्तार्चिषा वह्निना लस्यते शिवः, राजा तु क्रोधामयेऽलस आलस्यवान्. सर्पालंकार-शोभितः शिवः, राजा तु न विटसहचारी. शिवस्य तु उग्र इति नाम वर्तते, राज्ञो नाम तु नोग्रम्.

धर्मेण रक्षति क्षोणीं वीरश्रीबुक्कभूपतौ ।
निरातङ्का भयात्तस्मिन्नित्यभोगोत्सवाः प्रजाः ॥
गौरीसहचरात्तस्मात्प्रादुरासीन्महेश्वरात् ।
शक्त्या प्रतीतः स्कन्दांशो राजा **हरिहरेश्वरः** ॥
सर्ववर्णाश्रमाचारप्रतिपालनतत्परे ।
तस्मिंश्चतुःसमुद्रान्ता भूमिः कामदुघाभवत् ॥
सिंहासनजुषस्तस्य कीर्त्या भान्ति दिशो दश ।
उदयाद्रिगतस्येन्दोर्ज्योत्स्नयेव कलानिधेः ॥
तुलापुरुषदानादिमहादानानि षोडश ।
कृतवान्प्रतिराजन्यवज्रपातात्तवैभवः ॥

श्रीमद्राजाधिराजराजपरमेश्वरः, पूर्वदक्षिणपश्चिमोत्तरसमुद्राधीश्वरः, अनिवारितः, दुष्टराजराजन्यभुजङ्गवैनतेयः, शरणागतवज्रपञ्जरः, कलिकालधर्मः, कर्णाटकलक्ष्मीकर्णावतंसः, चतुर्वर्णाश्रमपालकः, कुलगिरितटलिखितघोषणः, रणरङ्गभीषणः, परराजराजीवसुधाकरः, परनारीसहोदरः, पुण्यश्लोकप्रहर्षः, शार्दूलमदभञ्जनः, चेरचोलपाण्ड्यस्थापनाचार्यः, वेदभाष्यप्रकाशकः, वैदिकमार्गस्थापनाचार्यः, कर्मोपेताध्वर्युः, राजकल्याणशेखरः,

सिद्धसारस्वतेत्यादिविरुदावलिभूषितः,
स खलु श्रीवीरप्रतापहरिहरदेवमहारायः

धात्रीनेत्रगुणक्षपेश्वर(१३२१)मिते[1] श्रीशालिवाहे गते
शाके गोत्रधच(?)प्रमादिनि[2] तिथौ(?) मास्यूर्जके नामनि ।
पक्षे तत्र वलक्षके बुधदिने श्रीपौर्णमास्यां तिथौ
काले पुण्यमहत्तरे शुभकरे सोमोपरागे वरे ॥
श्रीतुङ्गभद्रापरिखे नगरे **विजयाह्वये** ।
पम्पायां भास्करक्षेत्रे श्रीविरूपाक्षसंनिधौ ।

---

१. A. D. 1399 बोध्यः. २. 'प्रमाथिनि' स्यात.

चन्द्रगिरिमहाराज्ये प्राज्ये पैयूरिकोट्टके ॥
नलटुरिपाळेंसीमाख्ये मेगुणावलनाडुके ।
तोण्डीरमण्डले ख्याते विद्वद्भिरुपशोभिते ॥
चिरुवापुर्युदग्भागे पनप्पाकस्य दक्षिणे ।
नैर्ऋत्यामरणीनद्यास्तोरनल्लूरिपश्चिमे ॥
स तत्रासीद्ग्रामवरो ग्रामो नल्लूरिसंज्ञितः ।
पार्श्वकेदारजनुषा यो रेजे सस्यसंपदा ॥
उमारमाकलत्राभ्यां सहितौ शिवकेशवौ ।
यळंगोविलूनीलदृषनामानौ यत्र तिष्ठतः ॥
पुरं सावणराजीयं प्रतिनाम्नेति विश्रुतम् ।
वृत्तिद्वादशसंयुक्तं तमिमं ग्राममुत्तमम् ॥
सर्वमान्यं चतुःसीमासंयुतं च समन्ततः ।
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ॥
अक्षिण्यागामिसंयुक्तमष्टभोग्यं सभूरुहम् ।
वापीकूपतटाकैश्च कच्छारामैश्च शोभितम् ॥
पुत्रपौत्रादिभिर्भोग्यं क्रमादाचन्द्रतारकम् ।
दानस्याधमनस्यापि विक्रयस्यापि चोचितम् ॥
अदाद्ग्रामवरं रम्यं श्रीनल्लूरिति संज्ञितम् ।
औमळाध्वरिवर्याय सानुजाय विपश्चिते ॥
श्रीभरद्वाजगोत्रीयवरनारायणात्मजः ।
आर्च औमळयज्वा तु षड्वृत्तिमिह चाश्नुत ॥
तस्यानुजो महातेजा श्रुतिसागरपारगः ।
नृसिंहयज्वा च कृती वृत्तिषट्कमवाप्तवान् ॥
परीतः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधैः श्रौतपथिकैरधिकैर्गिरा ॥

वीरः श्रीवरभुक्कभूपतनयः क्ष्मापालचूडामणिः
प्रेङ्खत्कीर्तिविभूषितत्रिभुवनः स्फूर्जत्प्रतापोदयः ।
आचन्द्रार्कमगारवद्वसुमतीमाचक्रवालाचलं
श्रीमानाहवराघवो **हरिहरः** स्वां पालयत्यन्वहम् ॥
स भूयो याजको धीमान्कोटिशाराध्यनन्दनः ।
शासनश्लोककर्ता वै मल्लनाराध्यवृत्तिकः ॥
तच्छासनमिदं स्वामिशासनेन विलेखितम् ।
शासनाचार्यवर्येण **मुद्दणेन** च शिल्पिना ॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्टायां जायते क्रिमिः ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥
मद्वंशजाः परमहीपतिवंशजा वा
ये वंशजाः सततमुज्वलधर्मचित्ताः ।
मद्धर्ममेव परिपालनमुद्वहन्ति
तत्पादपद्मयुगलं शिरसा वहामि ॥
श्रीविरूपाक्ष ॥

(एपिग्राफिआ इण्डिका—३।१२०–१२४)

---

(१४७)

इन्द्रवर्मणोऽच्युतपुरोपलब्धशासनम्।

ॐ स्वस्ति। सर्वर्तुरमणीयाद्विजयकलिङ्गनगरात्सकलभुवननिर्माणैकसूत्रधारस्य भगवतो गोकर्णस्वामिनश्चरणकमलयुगलप्रणामादपगतकलिकलङ्को विनयनयसंपदामाधारः स्वासिधारापरिस्पन्दाधिगतसकलकलिङ्गाधिराज्यश्चतुरुदधितरङ्गमेखलावनितलप्रवितताामलयशा अनेकसमरसंक्षोभजनितजयशब्दो **गाङ्गामलकुलप्रतिष्ठः** प्रतापातिशयानामितसमस्तसामन्तचूडामणिप्रभामञ्जरीपुञ्जरञ्जितशरणो मातापितृपादानुध्यातः परममाहेश्वरः श्रीमहाराजेन्द्रवर्मा वराहवर्तन्यां सिद्धार्थकग्रामे सर्वसमवेतान्कुटुम्बिनः समाज्ञापति—विदितमस्तु वो यथास्मिन्ग्रामे राजतटाकक्षेत्रे हलस्य भूश्छेदीकृत्य सर्वकरपरिहारेणाचन्द्रार्कप्रतिष्ठं कृत्वा मातापित्रोरात्मनश्च पुण्याभिवृद्धये गौतमसगोत्राय छन्दोगसब्रह्मचारिणे **दुर्गशर्मणे** मातृभट्टारिकापादानां तटाकप्रतिष्ठापनमुदगयन उदकपूर्वमस्माभिः संप्रदत्ता, तद्विदित्वा स्वभूमिमनुपालयतान्न केनचित्परिबाधा कार्या। सीमालिङ्गानि—पूर्वेण राजतटाकपाली, सैव दक्षिणेन, पश्चिमेन परिपाट्या वल्मीकत्रयम्, उत्तरपाल्या कपाटसंध्युपरि पाषाणः, ततः सेष्टकोऽन्यः पाषाणः, ततो धिमारतरुद्वयम्, ततः कारकवृक्षश्चेति। तटाकोदकबन्धमोक्षे न केनचिद्विघातः कार्य इति भविष्यद्राजभिश्चायं दानधर्मोऽनुपाल्यः। तथा च व्यासगीताः श्लोकाः—

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥

---

१. अस्य शासनस्याधारभूतानि ताम्रपत्राणि **गञ्जाम**परिगणे **मुखालिङ्गम्**ग्रामसमीपस्थे **अच्युतपुर**ग्रामे **मल्लप्रगदसूर्यप्रकाश**रावमहाशयस्य गृहे सुरक्षितान्यासन्. तानि च **परलाकिमेदी**ग्रामनिवासि Mr. G. V. Ramamurti महाशयबोधितानि **गञ्जम**परिगणाध्यक्षेणानाय्य मह्यं दत्तानि. अधुना त्वस्मत्प्रार्थनात्ताम्रपत्रस्वामिनैव **मद्राज**नगरप्रदर्शिन्यां स्थापितानि वर्तन्ते—इति प्रकाशकवराः E. Hultzsch, Ph. D. महाशयाः.

षष्टिं वर्षसहस्राणि मोदते दिवि भूमिदः ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥ इति ।

वर्धमानविजयराज्यसंवत्सराः सप्ताशीतिः ८७ चैत्रामावास्याम् । इदं **विनयचन्द्रेण भानुचन्द्रस्य** सूनुना शासनं **राजसिंहस्य** लिखितं स्वमुखाज्ञया ॥

(एपिग्राफिआ इण्डिका—३।१२८-१२९)

---

(१४८)

श्रीगुणार्णवसूनुदेवेन्द्रमहाराजानां चिककोलग्रामोपलब्धं[१] शासनम् ।

ॐ स्वस्ति । सकलवसुमतीतलतिलकायमानात्सर्वर्तुसुखरमणीयाद्विजयवतकलिङ्गनगरान्महेन्द्राचलामलशिखरप्रतिष्ठितस्य चराचरगुरोः सकलभुवननिर्माणैकसूत्रधारस्य भगवतो गोकर्णस्वामिनश्चरणकमलयुगलप्रणामाद्विगलितकलिकलङ्को **गाङ्गा**मलकुलतिलको निजनिस्त्रिंशधारोपार्जितसकलकलिङ्गाधिराज्यः प्रविततचतुरुदधितरङ्गमेखलावनितलामलयशा अनेकाहवसंक्षोभजनितजयशब्दः प्रतापावनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीपुञ्जरञ्जितचरणः परममाहेश्वरो मातापितृपादानुध्यातो नयविनयशौयौंदार्यसत्यत्यागसंपदामाधारभूतः **श्रीगुणार्णव**सूनुर्महाराजः श्रीमान्**देवेन्द्रवर्मा** क्रोष्टुकवर्तन्यां सरउमटम्बे पोप्पङ्गिकग्रामे सर्वसमवेतान्कुटुम्बिनः समाज्ञापयत्यस्ति । विदितमस्तु भवतां यथास्माभिरयं ग्रामः सर्वकरभरैः

---

१. अस्य शासनस्याधारभूतं ताम्रपत्रत्रयं **चिकाकोल**ग्रामे **गञ्जाम**परिगणस्योपकलेक्टरपदवीकस्य महाशयस्य कार्यालये प्राप्तं Mr. C. J. Weir. I. C. S. महाशयेन तत्रत्यकार्यकारिणा मम समीपे प्रेषितम्. अधुना च मद्रासप्रदर्शिन्यां वर्तते—इति शोधकवराः E. Hultzsch, Ph. D. महाशयाः.

परिहृत्याचन्द्रार्कप्रतिष्ठमग्रहारं कृत्वोदकपूर्वं मातापित्रोरात्मनश्च पुण्याभिवृद्धये माघमास्युदगयने शुद्धाष्टम्यां कलिङ्गानगरवास्तव्येभ्यश्छन्दोगसब्रह्मचारिभ्यः कृष्णात्रेयसगोत्रेभ्यो वेदवेदाङ्गपारगेभ्यो च्छरम्पशर्मभवशर्मशिवशर्मविष्णुशर्मसोमशर्मकुमारशर्मभ्यो भ्रातृभ्यः संप्रदत्तः। तदेवं विदित्वा यथोचितभागभोगमुपनयन्तः सुखं प्रतिवसथ इति। अस्य ग्रामस्य सीमाविधयो भवन्ति—पूर्वस्यां दिशि विषयगर्ता गता, दक्षिणस्यां दिश्यपि गर्तैव, पश्चिमस्यां दिशि पोप्पङ्गिकपर्वतोदकं सायदकपर्वतोदकं च यत्रैकीभूय वहति यावद्दक्षिणदिक्स्था गर्तेति, उत्तरस्यां दिशि कोशन्ववृक्षगिणिगिणिवृक्षौ, ततः कुरुडुम्बिग्रामस्य च सीमा, ततस्तिन्दुकवृक्षः, पुनरपि तिन्दुकः, कुब्जजम्बूवृक्षवेणुगुल्मसहितः कदम्बवृक्षः, अतः पुरुषच्छायया यावत्पूर्वदिक्स्था विषयगर्तेति॥ भविष्यतश्च राज्ञः प्रज्ञापयति धर्मक्रमविक्रमाणामन्यतमयोगादवाप्य महीमनुशासद्भिरयं दानधर्मोऽनुपालनीयः। व्यासगीताश्चात्र श्लोका भवन्ति—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम्॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत्॥' इति।
अपूर्वनटवंश्येन मातृचन्द्रस्य सूनुना।
लिखितं पल्लवचन्द्रेण शासनं स्वमुखाज्ञया॥

महत्तरशबरनन्दिप्रत्यक्षमिति। प्रवर्धमानविजयराज्यसंवत्सरशतं त्र्यशीतिः १८३ श्रावणे मासि दिने विंशे, उत्कीर्णं खण्डिचन्द्रभोगिकतनयेन सर्वचन्द्रेणेति॥

(एपिग्राफिआ इण्डिका—३।१३१–१३३)

---

(१४९)

श्रीवेङ्कटपतिदेवमहाराजदत्तकूनियुर्ग्रामशासनम्[1]।

यस्य संपर्कपुण्येन नारीरत्नमभूच्छिला।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम्।
विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये॥
जयति क्षीरजलधेर्जातं सव्येक्षणं हरेः।
आलम्बनं चकोराणाममरायुष्करं महः॥

पौत्रस्तस्य **पुरूरवा** बुधसुतस्तस्यायुरस्यात्मजः
संजज्ञे **नहुषो ययाति**रभवत्तस्माच्च **पूरु**स्ततः।
तद्वंशे **भरतो** बभूव नृपतिस्तत्संततौ **शंतनु**-
स्तत्तुर्यो **विजयोऽभिमन्यु**रुदभूत्तस्मात्**परीक्षि**त्ततः॥
नन्दस्तस्याष्टमोऽभूत्समजनि नवमस्तस्य **राज्ञश्चलिक्क**-
क्ष्मापस्तत्सप्तमः श्रीपतिरुचिरभवद्राजपूर्वो **नरेन्द्रः**।
तस्यासी**द्विज्जलेन्द्रो** दशम इह नृपो **वीरहेमालिराय**-
स्तार्तीयीको मुरारौ कृतनतिरुदभूत्तस्य **मायापुरीशः**॥
तत्तुर्योऽजनि **तातपिन्नम**महीपालो निजालोकन-
त्रस्तामित्रगणस्ततोऽजनि हरन्दुर्गाणि सप्ताहितात्।
अह्नैकेन स **सोमिदेव**नृपतिस्तस्यैव जज्ञे सुतो
वीरो राघवदेवराडिति ततः श्री**पिन्नमो**ऽभून्नृपः॥
आरवीटिनगरी विभोरभूत्तस्य **बुक्क**धरणीपतिः सुतः।
येन **साळुवनृसिंह**राज्यमप्येधमानमहसा स्थिरीकृतम्॥

---

[1] 'अस्य शासनस्याधारभूतानि सप्त ताम्रपत्राणि **तिन्नवेल्ली**परिगणस्य अम्बासमुद्रतालुकायां कूनियुर्ग्रामवास्तव्यब्राह्मणस्य सन्ति, Dr. Hultzsch महाशयपार्श्वे निरीक्षणाय Mr. T. Varada Rao महाशयेनोक्तपरिगणोपाकलेक्टरसंज्ञकेन प्रेषितानि, इति H. Krishna S'âstri महाशयाः प्रकाशकाः. लेखकालस्तु १५५६ शक (1478 A. D.) रूपः स्फुट एव लिखितः.

स्वःकामिनीः स्वतनुकान्तिभिराक्षिपन्तीं
बुक्कावनीपतिलको बुधकल्पशाखी ।
कल्याणिनीं कमलनाभ इवाब्धिकन्यां
बल्लाम्बिकामुदवहद्बहुमान्यशीलाम् ॥

सुतेव कलशाम्बुधेः सुरभिलाशुगं माधवा-
त्कुमारमिव शंकरात्कुलमहीभृतः कन्यकाः ।
जयन्तममरप्रभोरपि शचीव बुक्काधिपा-
च्छ्रुतं जगति वल्लभालभत **रामराजं** सुतम् ॥

श्रीरामराजक्षितिपस्य तस्य चिन्तामणेरर्थिकदम्बकानाम् ।
लक्ष्मीरिवाम्भोरुहलोचनस्य **लक्काम्बिका**मुष्य महिष्यलासीत् ॥

तस्याधिकैः समभवत्तनयस्तपोभिः
श्रीरङ्गराजनृपतिः शशिवंशदीपः ।
आसन्समुल्लसति धामनि यस्य चित्रं
नेत्राणि वैरिसुदृशां च निरञ्जनानि ॥

सतीं **तिरुमलाम्बिकां** चरितलीलयारुन्धती-
प्रथामपि तितिक्षया वसुमतीयशो रुन्धतीम् ।
हिमांशुरिव रोहिणीं हृदयहारिणीं सद्गुणै-
रमोदत सधर्मिणीमयमवाप्य वीराग्रणीः ॥

रचितनयविचारं **रामराजं** च धीरं
वरतिरुमलरायं वेङ्कटाद्रिक्षितीशम् ।
अजनयत स एतानानुपूर्व्यात्कुमारा-
निह **तिरुमलदेव्या**मेव राजा महौजाः ॥

सकलभुवनकण्टकानरातीन्समिति निहत्य स रामराजवीरः ।
भरतमनुभगीरथादिराजप्रथितयशाः प्रशशास चक्रमुर्व्याः ॥

त्रिषु **श्रीरङ्गक्ष्मापरिवृढकुमारे**ष्ववधिरणं
विजित्यारिक्ष्मापां**स्तिरुमलमहाराजनृपतिः** ।

महौजाः साम्राज्ये सुमतिरभिषिक्तो निरुपमे
प्रशास्त्युर्वीं सर्वामपि तिसृषु मूर्तिष्विव हरिः ॥
यशस्विनामग्रसरस्य यस्य पट्टाभिषेके सति पार्थिवेन्दोः।
दानाम्बुपूरैरभिषिच्यमाना देवीपदं भूमिरियं दधाति ॥
सामादयो विधिमुखादिव सत्यवाचः
सामाद्युपायनिवहा इव सांयुगीनात्।
रामादयो दशरथादिव राजमौले-
स्तस्मादमेययशसस्तनया बभूवुः ॥
राजा ततोऽभूद्रघुनाथनामा **श्रीरङ्गरायः** श्रितपारिजातः।
श्रीरामराजः शिशिरांशुरुर्व्यां विख्यातिमान्**वेङ्कटदेवरायः** ॥
श्रीरङ्गरायः सहजेषु तेषु पारंगतो नीतिपयःपयोधेः।
अष्टासु दिक्षु प्रथितस्य लेभे पट्टाभिषेकं **पेनुगोण्डराज्ये** ॥
अथ **श्रीवेङ्कटपतिर्देवरायो** नयोज्ज्वलः।
अवनीमशिषत्कीर्त्या दिशो दश विशोभयन् ॥
तज्ज्यायसः सुरद्रुमलज्जावहचरित**रामराज**विभोः।
जात**स्तिरुमलराजः** ख्यातः **श्रीरङ्गरायो**ऽपि ॥
तयोः **श्रीरङ्गरायस्य** तनया विनयाधिकाः।
अजायन्त दयावन्तः श्रुतवन्तो यशस्विनः ॥
श्रीरङ्गरायनृपतेस्तनयेषु तेषु
पारं गिरामधिगतः कविपुंगवानाम्।
रत्नेषु कौस्तुभ इवाम्बुधिसंभवेषु
श्रीरामरायनृपतिः सुचिरं व्यलासीत् ॥
पूर्वं विश्रुत**रामराजनृ**पतेः श्रीरामभद्राकृतेः
कल्याणोदयशालिनस्तनुभवाः पञ्च प्रपञ्चावने।
दक्षा नीतिपथानुगाः समभवन्क्षीरापगाकामिनो
गीर्वाणालयभूरुहा इव बुधश्रेणीष्टदानोत्सुकाः ॥

आज्ञाविजितसुग्रीवाः प्राज्ञावनकृताग्रहाः।
सर्वे ते विबुधग्राह्या गुणै रुचिरविग्रहाः॥

विख्यातचर्येषु नृपेषु तेषु श्रीरङ्गराजः शिशिरांशुरुर्व्याः।
विश्वत्रये विश्रुतकीर्तिरासीत्सौरेषु शालेष्विव पारिजातः॥

यद्भेरीघनभांकृतिश्रवणतो भीत्या महत्या रण-
प्रत्यर्थिक्षितिपैः पलायनपरैर्मुक्ता लुठन्तः श्रमात्।
कान्ताराभरणीभवन्ति कलशच्छत्रध्वजाङ्काङ्किता-
न्युन्मार्जन्त्यधिभू(?)पदानि तदनुव्रज्याभिया किं हयाः॥

श्रीरङ्गराजस्य तपोविशेषैः संतोषिणः शेषगिरीश्वरस्य।
कारुण्यभूम्ना कमनीयशोभौ पुत्रावभूतां पुरुहूतभोगौ॥

पेदवेङ्कटेन्द्रपिनवेङ्कटाधिराडिति नामकौ प्रकृतिपालनोत्सुकौ।
खरदूषणप्रहतिदक्षिणावुभौ देदतः(?) प्रमोदमिव रामलक्ष्मणौ॥

श्रीशाली पेदवेङ्कटेन्द्रनृपतिर्ज्येष्ठो वयोभिस्तयोः
शौर्यौदार्यगभीरताधृतिकलापूर्वैश्च सर्वैर्गुणैः।
यस्यारातिनृपालभेदनकलायात्रासु सेनारजः-
पूरैर्भूर्जलधिर्भवेदिति हरिश्चित्तेऽस्य धत्ते स्थितिम्॥

शृङ्गारराज्यास्पददिव्यमूर्त्या बङ्गारमाम्बारमया समेतः।
विभात्यसौ वेङ्कटभूमिपालः शच्येव शक्रो रमयेव शौरिः॥

श्रीरङ्गराजेन्द्रकुमारकेऽस्मिन्वीरोत्तमे वेङ्कटदेवराये।
पट्टाभिषिक्ते पेनुगोण्डराज्ये तदाभिषिक्ताः सुधियोऽपि हेम्ना॥

यथा रघुकुलोद्वहः स्वयमरुन्धतीजानिना
स्वगोत्रगुरुणा सुधीतिलकतातयार्येण यः।
यथाविधि यशस्विना विरचिताभिषेकः क्षणा-
द्विभिद्य यवनाशरान्विजयते प्रशासन्महीम्॥

---

१. खरदूषणौ राक्षसौ, खरं दूषणं च. २. 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' इति परिभाषाश्रयणात्परस्मैपदम्.

वाराशिगाम्भीर्यविशेषधुर्यश्चौरासिदुर्गैकविभालवर्यः ।
पराष्टदिग्रायमनःप्रकामभयंकरः शार्ङ्गधरान्तरङ्गः ॥
सारवोररमया समुल्लसन्नारवीटिपुरहारनायकः ।
कुण्डलीश्वरमहाभुजः श्रयन्मण्डलीकधरणीवराहताम् ॥
आत्रेयगोत्रजानामग्रसरो भूभुजामुदारयशाः ।
अतिबिरुदतुरगघट्टो मतिगुरुरारट्टमगधमान्यपदः ॥
सोऽयं नीतिजितादिभूपतिततिः सुत्रामशाखी सुधी-
सार्थानां भुजतेजसा स्ववशयन्कर्णाटसिंहासनम् ।
आ सेतोरपि चाहिमाद्रि विमतान्संहृत्य शासन्मुदा
सर्वोर्वीं प्रचकास्ति वेङ्कटपतिश्रीदेवरायाग्रणीः ॥
ऋतुबाणकळंवेन्दु(१५५६)गणिते शकवत्सरे ।
भावाभिधानके वर्षे मासि वैशाखनामनि ॥
पक्षे वळक्षे पुण्यर्क्षे पौर्णमास्यां महातिथौ ।
श्रीवेङ्कटेशपादाब्जसंनिधौ श्रेयसां निधौ ॥
नानाशाखाभिधागोत्रसूत्रेभ्यः शास्त्रवित्तया ।
विख्यातेभ्यो द्विजेन्द्रेभ्यो वेदविद्भ्यो विशेषतः ॥
श्रीमत्तिर्वडिराज्यस्थं मुळिळ्भाडु इति श्रितम् ।
श्रीमद्वीरवनल्लूरुमाघाणि इति शोभितम् ॥
ताम्रपर्णीमहानद्या दक्षिणस्यां दिशि स्थितम् ।
कारुकुर्चिमहाग्रामात्प्राच्यां दिशि च संस्थितम् ॥
श्रान्तमङ्गलसीमाया दक्षिणाशामुपाश्रितम् ।
श्रीशेखरान्महादेविग्रामात्पश्चिमतः स्थितम् ॥
पर्वतोद्भमहामार्गादुत्तराशामुपाश्रितम् ।
कारुकुर्च्याः पञ्चदशकुल्यायां क्षेत्रयुग्मगम् ॥
ग्रामं च सर्वसस्याढ्यं द्विषष्टिगणसंयुतम् ।
सुद्दुकृष्णापुरमिति प्रतिनाम्ना सुशोभितम् ॥

कूनियूरिति विख्यातं गृहारामोपशोभितम् ।
सर्वमान्यं चतुःसीमासहितं च समन्ततः ॥
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ।
अक्षिण्यागामिसंयुक्तं गणभोज्यं सभूरुहम् ।
पुत्रपौत्रादिभिर्भोज्यं क्रमादाचन्द्रतारकम् ॥

आसीत्काश्यपसंततेर्घनतपःसंतुष्टविश्वेश्वर-
स्वैरानुग्रहभाजनाद्गुणनिधेः श्रीनागपृथ्वीपतेः ।
विद्वन्मण्डलवाञ्छितार्थकृतिमूर्धन्यादवन्यां महा-
वीराणां धुरि **विश्वनाथ**धरणीसंक्रन्दनो मानितः ॥

तस्मादजायत धनेशसमानधर्मा
धर्मानुशासितधरातलजीवलोकः ।
आख्यानुरूपविजितारिनृपालमौलि-
र्विख्यातिमाञ्जगति **कृष्ण**पिनायकेन्द्रः ॥

तस्याजनिष्ट ततकीर्तिमहःसमेतः
श्री**वीरपेन्द्र**धरणीतलशीतभानुः ।
आमोदनं कुवलयस्य तथा बुधाना-
मालम्बनं शिथिलितारिमनोविनोदः ॥

तस्योदभूद्**विश्वप**नायकेन्द्रः प्रतीपभूपालतमःसुधांशुः ।
श्री**मुद्दुकृष्ण**प्रभुरस्य जज्ञे प्रतापवान्मेरुसमानधैर्यः ॥

तस्यास्तां **मुद्दुवीर**प्रभुतिरु**मल**भूपालकौ नन्दनौ द्वौ
मीनाक्षीसुन्दरेशस्थिरतरकरुणापूरधारानिधानौ ।
आकैलासाद्रिसेतुप्रथितनिजयशोभासमानौ यदीया-
प्याज्ञा राज्ञां किरीटस्फुरितमणिमयालंकृतिर्माननीया ॥

अथ **तिरुमल**भूपो मन्त्रिमुख्यैरनेकैः
सकुतुकमभिषिक्तः सर्वराज्याधिपत्ये ।

समधिककृपयासौ सुन्दरेशस्य लब्ध्वा
धरणितलमशेषं राजते भूतलेन्द्रः ॥

एतस्य परदुर्वारभुजविक्रमशालिनः ।
भोगे भूलोकसुत्राम्णस्त्यागे भूकल्पशाखिनः ॥
करीन्द्रारोहमात्रेण गिरीन्द्रारूढविद्विषः ।
लङ्घिते नगरे जेतुं लङ्घितार्णववैरिणः ॥
कन्यान्नस्वर्णभूदानैः कालक्षेपं वितन्वतः ।
जयन्तचन्द्रकन्दर्पजयसौन्दर्यशालिनः ॥
श्रीमत्तिरुमलेन्द्रस्य विज्ञप्तिमनुपालयन् ।
श्रीवीरवेङ्कटपतिर्महारायमहीपतिः ॥
स हिरण्यपयोधारापूर्वकं दत्तवान्मुदा ।
वृत्तिमन्तोऽत्र लिख्यन्ते विप्रा वेदान्तपारगाः ॥
वेङ्कटाद्रीन्द्रतनयो भारद्वाजी च याजुषः ।
क्षेत्रं स लब्धवानेकं रघुनाथाभिधो मखी ॥
लक्ष्मीनृसिंहयज्वेन्द्र(ः) सुतः श्रीवत्सगोत्रजः ।
लक्ष्मीनरहरिर्यज्वा वृत्तिमर्धाधिकामगात् ॥
गोत्रे हरितसे जातः प्रातस्तिम्मरसात्मजः ।
वेङ्कटाद्रिद्विजोऽप्येकां वृत्तिं याजुषिकोत्तमः ॥
आत्रेयगोत्रः संप्राप्तोऽप्याश्वलायनसूत्रवान् ।
सदाशिवसुतः क्षेत्रं त्रिपादं ध्रुवमीश्वरः ॥

श्रीरङ्गराजपुत्रः कनकसभापतिरतीव मेधावी ।
कौशिककुलप्रभूतोऽगृह्णाद्वृत्तिद्वयं यजुर्वेदी ॥

प्रतीतकौशिकान्वयायसिन्धुबन्धुचन्द्रमा-
श्चिरं धरातले ऋचा धुरंधरः स बन्धुमान् ।
अनन्तभट्टनन्दनोऽपि चाय्यभट्टभूसुर-
स्त्रिपादयुक्तवृत्तिपञ्चकं समेत्य शोभते ॥

काश्यपान्वयजः श्रीमानापस्तम्बी च लब्धवान् ।
तिरुमलार्यसुतो मल्लभट्टो वृत्तिं स एकिकाम् ॥
मारुभट्टसुतो भारद्वाजी याजुषिकोत्तमः ।
वेङ्कटाद्रिवरः श्रीमान्वृत्तिमेकां समश्नुते ॥
अरुणाद्रिसुतो भारद्वाजी ऋग्वेदवानयम् ।
यल्लप्पभूसुरः क्षेत्रं प्राप्तवानर्धमत्र तु ॥
काश्यपान्वयजो लब्ध्वा यजुर्वेदी विराजते ।
श्रान्तीश्वरो महान्वृत्तिमर्धामप्पलयात्मभूः ॥
आश्वलायनसूत्रोऽयं भारद्वाजान्वयी सुतः ।
श्रीवेङ्कटपतेरेकां वृत्तिं **नागरसोऽ**श्नुते ॥
भारद्वाजकुलोद्भूतोऽप्यर्धं याजुषिकोत्तमः ।
क्षेत्रं **रघुपतेः** सूनुरळगाद्रिरिहाश्नुते ॥
श्रीवत्सगोत्र**गोविन्द**सुतो **घटलया**भिधः ।
ऋग्वेदवानयं प्राप्य त्रिपादां वृत्तिमेधते ॥
आत्रेयगोत्रजोऽगृह्णात्सामवेदाब्धिपारगः ।
श्रीनिवासात्मजो वृत्तिद्वयं **नरहरि**र्महान् ॥
आत्रेयगोत्रजः **सोमनाथो** याजुषिकोत्तमः ।
नरसंघट्टपुत्रोऽयं क्षेत्रेणार्धेन राजते ॥
अनन्तभट्टपुत्रोऽसौ **श्रीनिवासो**ऽतिधार्मिकः ।
कौशिकान्वयजोऽप्येक (।) क्षेत्रं याजुषिकोऽग्रहीत् ॥
काश्यपान्वयभूषोऽयमापस्तम्बी महायशाः ।
वेङ्कटय्यसुतः क्षेत्रं **सिद्धयो**ऽप्येकम(ा)श्नुते ॥
बसवावधानिनः पुत्रो **नागादीक्षितशेखरः** ।
भारद्वाजी च ऋक्छाखी क्षेत्रमर्धं प्रपेदिवान् ॥
जातो हरितसे वंशे यजुर्वेदी समेयिवान् ।
कालहस्तिसुतः क्षेत्रं त्रिपादं **ध्रुवमङ्गयः** ॥

वत्सगोत्रभवः सत्याषाढसूचोऽपि चैककम् ।
श्रीनल्लपेरुमाळसूनुरारूरः क्षेत्रमश्नुते ॥
संजातः काश्यपे श्रीमान्यजुःशाखी समेयिवान् ।
नरसिंहात्मजः क्षेत्रं पादत्रय**महोबलः** ॥
काश्यपान्वयजो **वृन्दावननाथ**सुतोत्तमः ।
ऋक्छाखी **नइनार्भट्टः** क्षेत्रमर्धं स लब्धवान् ॥
सिङ्गपेरुमाळ्नन्दनोऽयं **वेङ्कडतप्प**भूसुरः ।
क्षेत्रद्वयं च ऋग्वेदी अयत्यात्रेयगोत्रजः ॥
यजुर्वेदविदां श्रेष्ठो भारद्वाजकुलोद्भवः ।
पेद्दिभट्टसुतो नीलकण्ठो वृत्त्यार्धयाञ्चति ॥
श्रीवत्सगोत्रभूः **सोमाभट्ट**जो याजुषोत्तमः ।
श्रीमाँल्लक्ष्मणशास्त्रीन्द्रः क्षेत्रमर्धं समश्नुते ॥
आपस्तम्बी च **गोविन्ददीक्षितः** कौशिकान्वयः ।
कृष्णंभट्टोऽपि केदारमर्धं लब्ध्वा समेधते ॥
पेरुभट्टसुतस्तिम्मावधानी याजुषोत्तमः ।
भारद्वाजकुलोद्भूतो वृत्तिमर्धां समेयिवान् ॥
कौशिकान्वयवाँ**ल्लिङ्गावधानी मल्लुभट्ट**जः ।
आपस्तम्बी च केदारमर्धं प्राप्य विशोभते ॥
पुत्रो **नरहरे**रापस्तम्बी **शेषाद्रि**भूसुरः ।
शालावतसगोत्रोऽयं क्षेत्रद्वयमिहाश्नुते ॥
भारद्वाजान्वये जातो **यल्लुभट्ट**स्य नन्दनः ।
नारसिंहो यजुर्वेदी वृत्तिमेकामिहाश्नुते ॥
श्रीमान् **तिरुमलभट्टो**ऽपि जातो हरितसे कुले ।
नागाभट्टसुतः क्षेत्रमेकं लब्ध्वा विजृम्भते ॥
कौण्डिन्यवंशसंभूतः **कृष्णभागवतो**त्तमः ।
केदारेण त्रिपादेन कुबेर इव राजते ॥

लिङ्गावधानिनः पुत्रो भारद्वाजी च याजुषः ।
रामलिङ्गावधानीन्द्रः क्षेत्रमेकमिहाश्नुते ॥
आत्रेयगोत्रजो **गङ्गाधरयज्वात्मजो**ऽश्नुते ।
यजुर्वेदी **श्रीनिवास**शास्त्री केदारमर्धकम् ॥
शेषाद्रिनन्दनस्तिम्मावधानी याजुषोत्तमः ।
भारद्वाजकुले जातस्त्रिपादां वृत्तिमश्नुते ॥
यल्लयज्वसुतो लक्ष्मीनरसिंहबुधोऽग्रहीत् ।
आपस्तम्बी महानेकं क्षेत्रमात्रेयगोत्रवान् ॥
आत्रेयगोत्रजोऽप्याळ्वार्सुतः **श्रीवेङ्कटेश्वरः** ।
क्षेत्रमेकं त्रिपादं च लब्धवानृग्विभूषणः ॥
आत्रेयगोत्र ऋग्वेदी श्रीमा**नीश्वरनन्दनः** ।
क्षेत्रं **कळप्परान्**पादत्रयं प्राप्य समेधते ॥
विश्वामित्रकुले जात ऋक्शाखी **चाय्यपो** महान् ।
अनन्तकृष्णतनयो वृत्तिमर्धामिहाश्नुते ॥
पेरियतिरुवडिः श्रीमां**श्चोक्कनाथ**मखीन्द्रजः ।
धनंजयान्वयी क्षेत्रद्वयमृग्वेदवानगात् ॥
आत्रेयवंश्य ऋक्शाखी **नारायणवरा**त्मजः ।
श्रीरामभट्टः केदारमेकमासाद्य वर्धते ॥
आपस्तम्बी भरद्वाजवंश्यः **शिङ्गिरिनन्दनः** ।
नारायणोऽप्यर्धवृत्तिं समेत्य धनदायते ॥
गिरियप्पकुमारोऽयं **श्रीवेङ्कटपति**र्महान् ।
श्रीवत्सगोत्री ऋक्शाखी वृत्तिमेकां प्रपेदिवान् ॥
लब्धवारुणगिरेः पुत्रः **सूर्यनारायणो**ऽश्नुति ।
कौण्डिन्यवंशजः क्षेत्रमेकं याजुषिकोत्तमः ॥
तिरुवेङ्कडनाथस्य पुत्रो **वडमलो**ऽश्नुते ।
वत्सगोत्रभवः क्षेत्रमेकं याजुषिकोत्तमः ॥

कौण्डिन्यगोत्रजोऽनन्तनारायणसुतोऽश्नुते ।
रामाभट्टवरः क्षेत्रमेकं याजुषिकोत्तमः ॥
तस्यानुजो **राघवश्च** क्षेत्रमेकं स लब्धवान् ।
यल्लयो रङ्गयश्चैव वेङ्कटाद्रिश्च वेङ्कपः ॥
चत्वारः क्षेत्रमेकं तु वर्धन्ते प्रतिगृह्य ते ।
कौण्डिन्यवंशजः सत्याषाढसूत्रः समेयिवान् ॥
वेङ्कटाद्रिवरः क्षेत्रत्रयं **गणपतेः** सुतः ।
रघुनाथमखी **व्यासराय**भट्टसुतोऽश्नुते ॥
वृत्तिमेकां सामवेदी भारद्वाजकुलोद्भवः ।
नारायणोऽनन्तभट्टसुतः संकृतिगोत्रजः ॥
लब्धवानर्धकेदारं श्रीबोधायनसूत्रवान् ।
धर्मराजो वत्सगोत्री पादक्षेत्रमिहाश्नुते ॥
नारायणो राघवस्य सुतो भार्गवगोत्रजः ।
प्राप्तवानर्धकेदारं धीमाञ्जैमिनिसूत्रवान् ॥
आपस्तम्बी भरद्वाजवंश्यो **भास्करभट्ट**जः ।
सूर्यनारायणः सोऽयं वृत्तिमेकां समश्नुते ॥
शिङ्गिरेर्नन्दनश्शोकावधानी याजुषोत्तमः ।
लोहितान्वयभूरर्धां वृत्तिमासाद्य वर्धते ॥
चिदम्बरावधानी च श्रीमान्**वरदभट्ट**जः ।
कौशिकान्वयवानापस्तम्बी वृत्त्यार्धयाञ्चति ॥
आत्रेयवंशजो **रामावधानी** याजुषोत्तमः ।
जगन्नाथकुमारोऽयमर्धं क्षेत्रमिहाप्तवान् ॥
कौशिकान्वयजो **रामचन्द्रभट्ट**सुतोऽश्नुते ।
श्रीनिवासद्विजोऽप्येकं क्षेत्रं याजुषिकोत्तमः ॥
श्रीमान**गस्त्य**विबुधोऽप्यर्धवृत्तिमिहाश्नुते ।
अर्धवृत्तिं **कोण्डवीटिरामलिङ्ग**बुधोऽग्रहीत् ॥

आत्रेयागोत्रजः **सर्वनाथो** दीक्षितशेखरः ।
अर्धवृत्तिं समासाद्य ऋक्शाखी धनदायते ॥
एते सर्वे द्विजश्रेष्ठाः पूर्वोक्तं ग्राममुत्तमम् ।
श्रीकर्नाटककुल्यायास्तीरस्थतरुशोभितम् ॥
भट्टवृत्तिं विना सर्वदेवदायसमन्वितम् ।
कपटाजोलेसहितं तिरुतुवलयान्वितम् ॥
मटप्परयुतं कीळेक्कळिप्प्यलसमन्वितम् ।
कारुकुर्च्यामर्धयुक्तपञ्चमावुसमन्वितम् ॥
तत्तद्दिक्षु स्थितश्रीमद्ग्रामनाङ्कितसीमकम् ।
स्थितं दक्षिणवाहिन्याः कुल्यायाः पश्चिमे तटे ॥
कारुकुर्च्याः पूर्वनीचवाटिकायास्तु पूर्वतः ।
सर्वमान्यतया लब्ध्वा जयन्त्या चन्द्रतारकम् ॥
ग्रामदेवतकु कोनि विडिचिन क्षेत्रं अर्धम् ।
श्रीवेङ्कटपतिरायक्षितिपतिवर्यस्य कीर्त्तिधुर्यस्य ।
शासनमिदं सुधीजनकुवलयचन्द्रस्य भूमहेन्द्रस्य ॥
वीरवेङ्कटरायोक्त्या प्राह पौत्रः सभापतेः ।
कामकोटिसुतो रामकविः शासनवाङ्मयम् ॥
श्रीवीरणाचार्यवरेण्यपौत्रो वराच्युतार्यो गणपार्यपुत्रः ।
सूक्त्यालिखद्वेङ्कटरायमौलेः पद्यानि हृद्यान्यथ शासनस्य ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्ताद्द्विगुण्यं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

श्रीवेङ्कटेश ॥

(एपिग्राफिआ इण्डिका—३।२४०-२५१)

(१५०)

श्रीमदन्नवेममहाराजदत्तवेमपुराग्रहारशासनम् ।

श्रीमान्वराहवपुरावहतु श्रियं वो
येनाशु कौतुकवतोद्वहता धरित्र्याः ।
दंष्ट्राभिघातपरिकम्पितमेरुशृङ्ग-
निर्मुक्तरत्ननिकरैरुदपादि रेखा ॥

अरविन्दनाभिचरणारविन्दतो जगतां हिताय जनिमाप काचन ।
सुरलोकसिन्धुरिव जातिरुज्ज्वला गुणगौरवेण गणनीयजीवना ॥

अभूत्तस्यां जातौ गुणगणनिधिः **प्रोलनृपतिः**
प्रतापाढ्ये यस्मिन्सुरतरुवितारं वितरति ।
जनाः सर्वे सद्यश्च्युतविविधवृत्तिव्यतिकराः
समं धर्मे कामे मतिमविहतां संन्यधिषत ॥

तस्माज्जज्ञे **वेमभूपः** प्रतापी वीरः साक्षान्मूर्तिशालीव धर्मः ।
दुर्वृत्तानां यो द्विषां निग्रहत्य क्षोणीं कृत्स्नां रामभोजं बुभोज ॥

हेमाद्रिणा संप्रतिपादितानां दानव्रतानां विधिवद्विधाता ।
निस्सीममुर्वीं द्विजसात्स कृत्वा तद्भुक्तशेषां स्वयमन्वभुङ्क्त ॥

मेरुमन्दरकैलासानारुरुक्षुर्महामतिः ।
सोपानपङ्क्तिं श्रीशैले व्यतनोद्वेमभूपतिः ॥

---

१. एतच्छासनपत्रत्रयं E. Hultzsch, Ph. D. महाशयेन Sir Walter Elliot महाशयस्य लेखद्वयात् Dr. Fleet महाशयप्रेषितात् संशोध्य प्रकाशितम्. शासनसमयस्तु शककालः १२९६ (1218 A. D.) मितः स्फुट एव लिखितः.

तस्य शासितुरुभौ बभूवतू रामलक्ष्मणनिभौ तनूभवौ ।
अन्नवोतनृपतिः प्रतापवान**न्नवेम**नृपतिश्च जित्वरः ॥
पितुरनन्तरमग्र्यगुणोऽग्रजः समधिगत्य स राज्यमकण्टकम् ।
वसुमतीमखिलां परिपालयन्सुचरितैः समचेष्ट महद्यशः ॥
येनाग्रहारा बहवो वितीर्णा हेमाद्रिदानानि कृतानि येन ।
तीर्थेषु सत्राणि ततानि येन येन प्रजाः साध्वनुरञ्जिताश्च ॥
तदनन्तर**मन्नवेम**भूपः पितृसिंहासनमुन्नतोऽधिरूढः ।
अखिलानरिभूपतीन्महात्मा सुरसिंहासनमध्यरोहयद्द्राक् ॥
महादानादिदानानां यस्मिन्सम्यग्विधातरि ।
चिराय तत्तद्विधयश्चरितार्थत्वमाययुः ॥
कीर्त्तिं दिगम्बरां दृष्ट्वा यस्य प्रियतमां जनाः ।
एष सर्वस्वमर्थिभ्यो दत्तवानिति मन्वते ॥
सोऽयं वसन्तरायाङ्कः कस्तूरीचन्द्रचन्दनैः ।
न केवलां भुवं द्यां च क्षिप्तैर्गन्धवतीं व्यधात् ॥
यद्वसन्तोत्सवक्षिप्तभूरिकर्पूररेणुभिः ।
यशसा किंतु तस्यासीद्धवलं जगतां त्रयम् ॥
श्रीपल्लवत्रिनेत्राङ्कः श्रीशैलात्पूर्वतः स्थितम् ।
श्रीकोण्डवीटिनगरं सोऽयं शास्ति परंतपः ॥
तस्यान्नवेमचन्द्रस्य लक्ष्मीरिव सहोदरा ।
श्रीनल्लनूङ्कभूपस्य महिषी विष्णुतेजसः ॥
वेमसानीति विख्याता सत्संतानशालिनी ।
नित्यं हेमाद्रिकल्पोक्तदानव्रतविधायिनी ॥
शाकाब्दे रसरत्नभानु(१२९६)गणिते ग्रस्ते विधौ राहुणा
कार्तिक्यां विजयेश्वरस्य पुरतः श्रीगौतमीरोधसि ।
विप्रेभ्यः पर**मन्नवेम**नृपतिः श्री**वेमसान्याः** स्वसुः
पुण्यार्थं नडुपूरसंज्ञमददाद्ग्रामं स कोणस्थले ॥

साष्टैश्वर्यं साष्टभोगं दत्तो विंशतिभागवान् ।
तस्या नाम्नाग्रहारोऽयं भाति वेमपुराह्वयः ॥

अस्य ग्रामस्य प्रतिग्रहीतारः—तल्लाभट्टः, तिप्पयार्यः, दोचयार्यः, एते हरितगोत्राः । देवरभट्टः, शिङ्गयभट्टः, माचयार्यः, एते कौशिकगोत्राः । मुम्मडियार्यः, लक्कनार्यः, एतौ श्रीवत्सगोत्रौ । प्रभाकरभट्टः, नागयभट्टः, वासुदेवार्यः, एते काश्यपगोत्राः । पेरुमाणिभट्टः, लोहितगोत्रः। राघवभट्टः, कोण्डयार्यः, एतौ भारद्वाजगोत्रौ । इम्मडियार्यः, आत्रेयगोत्रः । अय्यदेवरार्यः, मल्लिनाथार्यः, एतौ गार्ग्यगोत्रौ । वल्लभार्यः, नरहरिभट्टः, एतौ कामकायतगोत्रौ । लक्कनार्यः, कौण्डिन्यगोत्रः ॥ अस्य ग्रामस्य सीमानः—तूर्पुनकु मुप्पल्ले पुन्त । आग्नेयानकु । पाञ्चालवरपु मुप्यल्ले रेण्डु पुन्तल कूटमि । दक्षिणानकु । आग्नेयननुण्डि पड्डमꣵ वोयि अन्तनुत्तरं वोयि अनन्तनुण्डि पड्डमꣵ वोयि अन्तट दक्षिणमुखमैन पुट्टलतोडिकण्डु दुꣵ मेट्टु पुन्त । अन्दुण्डिगोदावरिदाङ्कानु सेडकोटि मेडितापुन्त । नैर्ऋत्यानकुन्नु पड्डमटिकिन्नि गोदावरि । वायव्यानकु । गोदावरिनुण्डि तूर्पमुखमै वच्चिन गट्टुन्नु प्रेमलकुण्टानु । उत्तरानकु । मेडितापपुन्तानु । कोम्मेपाडानु । अट्टे नलम्बल्लि पुन्त । ईशान्यानकुन्नु नलम्वल्लि पुन्त ॥

यावन्ति लाङ्गलमुखेन रजांसि भूमे-
र्भासां निधेर्दुहितुरङ्गजरोमकाणि ।
तावन्ति शंकरपुरे स युगानि तिष्ठे-
द्भूमिप्रदानमिह यः कुरुते मनुष्यः ॥

आस्फोटयन्ति पितरो वल्गन्ति च पितामहाः ।
भूमिदोऽस्मत्कुले जातो योऽस्मान्संतारयिष्यति ॥

स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
इत्थं सर्वान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

अनवेमभूपति पाञ्चालवरणुं वोलमन्दु ईवूरि पोलानं गलयनु धार वोसि इच्चिन क्षेत्रं खम् ॥

(एपिग्राफिआ इण्डिका—३।२८८–२९१)

(१५१)

द्वितीयपुलिकेशिन्नपराभिधानश्रीसत्याश्रयमहाराजानां शासनपत्रम् ।[1]

जयति जगतां विधातुस्त्रिविक्रमाक्रान्तसकलभुवनस्य ।
नतन····ण ········णनखांशुजटिलं पदं विष्णोः ॥

मानव्यसगोत्राणां हारितिपुत्राणां **चलुक्यानामन्ववाये** **वाताप्याः** प्रथमविधातुरनेकाध्वरावभृथस्नानसमार्द्रीकृतपुण्यमूर्तेः सर्वमङ्गलायतनस्य **वल्लभनृपतेः** कीर्त्या युक्तस्य **कीर्तिवर्मणः** पुत्रः समनुष्ठितपतिदेवताव्रतं कमलालयाविपुलपयोधरविलुप्तचन्दनालेपः सुरेन्द्रमन्दिरजातकिन्नराङ्गनापतीयमानविमलकीर्तिः खरदनकुलिशविभिन्नरिपुहृदयोद्गतरुधिरधारास्नपितमस्तकमत्तमातङ्गोदयपर्वततरुणरविः निगृहीतदुष्टजनः परिगृहीतविद्वत्सखोऽनुगृहीतभृत्यवर्गः करगतखड्गोत्कृत्तपरनृपदन्तिदन्तोत्थितवह्निशिखोद्दीपितरणभूमिः वरयुवतिनयनसायकैकलक्ष्यो विविधशास्त्रार्थतत्त्वविचारक्षमसूक्ष्मबुद्धिश्चलुक्यकुलतिलकः सर्वसद्गुणाश्रयो रिपुदरिद्रः **श्रीसत्याश्रयोऽ**नामयः

पदं न्यस्य····शत्रूणां शौर्येणोपरि पार्थिवः ।
प्रकृत्या पुंश्चलीं लक्ष्मीं सतीव्रतमकारयत् ॥

---

१. 'अस्य लेखस्याधारभूतं ताम्रपत्रद्वयं पण्डित-भगवानलाल-इन्द्रजि-महाशयेनाहं दर्शितः. तदेव स्वीयव्याख्यापत्रसनाथं 'बॉम्बे-एशियाटिक्-सोसाइटी' मन्त्रिपार्श्वे प्रेषितमासीत्, तत्रत्यपुस्तकालये व्याख्यापत्ररहितं तदुपलभ्य स्वयं व्याख्याय प्रकाशयामि' इति J. F. Fleet महाशयाः.

स महीपतिरखरेतिकाविषयवासिनः समाज्ञापयति—यथायं मम मातुलः समधिगतार्यमार्गोन्मार्गः स्वविक्रमक्रयक्रीतविशालकीर्तिवितानवद्ध-सर्वदिगन्तरः **सेन्द्रकाणां** तिलकभूतः परममाहेश्वरः **श्रीवल्लभसेनानन्द-राजः** । तेन राज्ञा मातापित्रोरात्मनश्च पुण्योपचयार्थं आत्रेयसगोत्राय **वारुवे-कृष्णस्वामिसूनवे महेश्वरायेष्टयज्ञाय आम्रवटवकग्रामः**, तथा **द्वयमे-न्नायामवञ्चपल्यां** विंशतिश्चाटभटदूतराजपुरुषाणामप्रवेशनीयम्—तत्प्रादात् ।

विदिताः सन्तु राजानः सर्वे मद्वंशसंभवाः ।
अन्ये च पृथिवीपालाः सामन्ताश्च महीतले ॥
यः कश्चित्पृथिवीपालो भोगमस्य निवर्तयेत् ।
महतां पातकानां तु कर्तुस्तस्य फलं भवेत् ॥

उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
महीं महीमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स्वविष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
फालकृष्टां महीं दद्यात्सबीजां सस्यमालिनीम् ।
यावत्सूर्यकृतालोकास्तावत्स्वर्गे महीयते ॥

स्वस्त्यस्तु लेखकवाचकश्रोतृभ्यः । ओम् ।

(एपिग्राफिआ इण्डिका—३।५१-५२)

(१९२)

गुर्जरदेशाधिपतिश्रीगोविन्दराजमहाराजानां शासनपत्रम्[1] ।

ओम् । शकनृपकालातीतसंवत्सरशतेषु सप्तसु पञ्चत्रिंशत्यधिकेषु पौष-शुद्धसप्तम्यां अङ्कतोऽपि संवत्सरशतानि ७३९ नन्दनसंवत्सरे पौषशुद्धति-थिः ७ अस्यां संवत्सरमासपक्षदिवसपूर्वायां परमभट्टारकमहाराजेन्द्रराजप-रमेश्वरः शरच्छशाङ्ककिरणनिर्मलयशोंशुकावगुण्ठितमेदिनीयुवतिभोक्ता प्र-भूतवर्षः श्रीवल्लभनरेन्द्रो **गोविन्दराज**नामा

जगत्तुं[2]ङ्गतुङ्गतुरगप्रवृद्धरेणूर्ध्वरुद्धरविकिरणम् ।
ग्रीष्मेऽपि नभो निखिलं प्रावृट्कालायते स्पष्टम् ॥
रक्षता येन निःशेषं चतुरम्बुधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता तुष्टिः परा हृदि ॥
भ्राता तु तस्येन्द्रसमानवीर्यः श्रीमान्भुवि क्ष्मापति**रिन्द्रराजः** ।
शास्ता बभूवाद्भुतकीर्तिसूतिस्तद्दत्त**लाटेश्वरमण्डल**स्य ॥
सूनुर्बभूव खलु तस्य महानुभावः
शास्त्रार्थबोधसुखलालितचित्तवृत्तिः ।
यो गौणनामपरिवारमुवाह पूर्वं
श्री**कर्कराज**सुभगव्यपदेशमुच्चैः ॥
सुवृषस्थोऽनुजस्तस्य सततं सेवितो बुधैः ।
गोविन्दराजो भूपालः साक्षाच्छंभुरिवापरः ॥
फलोन्मुखैरापतितैर्विदूरतः समं समन्ताद्गुणपक्षपातिभिः ।
महाहवे दानविधौ च मार्गणैर्न कुण्ठितं यस्य सदैव मानसम् ॥

---

१. लेखस्यास्याधारभूतं ताम्रपत्रत्रयं खानदेशप्रान्तस्थशाहाडेतालुकायां तोरखेडे-'ग्रामवास्तव्य-देवराव-बिन-बलवन्तराव-कदम्बाण्डे-जाहागीरदार-महाशयात् Mr. C. G. Dodgson I. C. S. (Bombay) महाशयेन प्राप्तं मत्संनिधौ प्रेषितमधुना मया प्रकाश्यते' इति J. F. Fleet. I. C. S. Ph. D. C. I. E. महाशयाः.

२. आर्यानुरोधेन तकारद्वित्वं कविना न कृतमासीत्.

तद्दत्त **सीहरक्खी**द्वादशके प्रभुज्यमाने **सल्लुकिकि**विकलङ्कवंशप्रसूतो मूर्द्धाभिषिक्तो दुर्वारवैरिवनितातुलतापहेतुरनेकदर्पितारातितरुप्रभञ्जनो मातरिश्वा शरच्छशाङ्ककिरणकुन्दकुसुमस्फटिकावदातसमाननिर्मलयशाः श्री**मणिनाग**पौत्रः श्री**राजादित्य**सुतः परमब्रह्मण्यः समधिगताशेषमहाशब्दमहासामन्तः । सोऽयं श्री**बुद्धवर्षः** सर्वानेव भाविभूमिपालाननुबोधयति—

अस्तु वः संविदितम्—यथा मया मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये ऐहिकामुष्मिकफलावाप्त्यर्थं बलिचरुवैश्वदेवाग्निहोत्रक्रतुक्रियाद्युत्सर्पणार्थं **बदरसिद्धि**चातुर्विद्यसामान्यवाजसनेयमाध्यंदिनब्रह्मचारित्रिप्रवरलावायनसगोत्रब्राह्मण**सोमाय सर्वदेव**पुत्राय, तथा ब्राह्मण**नाहर**गोत्तमसगोत्र**महेश्वर**पुत्रः, तथा **द्रोण**वार्ष्णेयसगोत्र**शर्म**पुत्रः, तथा **सोम**कात्यायनसगोत्र**वप्पुक**सुतः, तथा **लकुटिः** आग्नेयसमानसगोत्रः **सर्वदेव**सुतः, तथा **सर्वदेव**सुद्गलसगोत्रः, तथा **नेवः**, तथा तत्सुतो **गोवः**, तथा **भौल्लः** वत्ससगोत्रः, तथा **द्रोण**शर्मः, तथा **अणहादित्यः**, तथा **नासेणः**, तथा **गोवः** गोतमसगोत्रो **द्रोण**सुतः, तथा **आदित्यः** पाराशरसगोत्रः तथा **लिम्बादित्यः** आग्नेयसमानसगोत्रः, तथा **योगः** शाण्डिल्यसगोत्रः, तथा **अग्नि**शर्मः, तथा **नेवारेवः** मुद्गलसगोत्रः, तथा **नागः** माधरसगोत्रः, तथा **नाणसरः**, तथा **रेवासमः**, तथा **भौल्लः** यौगनसगोत्रः, तथा **नेवादित्यः** भरद्वाजसगोत्रः, तथा **ईश्वरः** कौषसगोत्रः, तथा **वप्प**स्वामी, तथा **गोव**शर्मः वार्ष्णेयसगोत्रः, तथा **शिवादित्यः**, तथा **देवहटः**, तथा **सीहः** लावायनसगोत्रः, तथा **नन्हः** कात्यायनसगोत्रः, तथा **मातुशूरः**, तथा **महेश्वरः** आग्नेयसमानसगोत्रः, तेन आत्मांशो **नैन**दौहित्राय दत्तः, तथा **लल्लः** भरद्वाजसगोत्रः, तथा तस्यैव भ्राता **जज्जुकः**, तथा **दत्तः** शौण्डानसगोत्रः, तथा **अग्नि**शर्मा आग्नेयसमानसगोत्रः, तथा **नेवादित्यः**, तथा **सम्बौरः** कौशसगोत्रः, तथा **जज्जुकः** वार्ष्णेयसगोत्रः, तथा **आदित्यः** गोतमसगोत्रः, तथा **आदित्यचीहल्लकः** सोमसुतः, तथाग्निशर्मा मुद्गलसगोत्रः, तथा **रेव** आग्नेयसमानसगोत्रः,

सीहरक्खीद्वादशान्तर्गत**गोवट्टना**भिधानो ग्रामः सहिरण्यादानसदण्ड-दासापराधः ससीमापर्यन्तः सतीर्थः, मेलुवल्लीकप्रावेशुकः समस्तराजकी-यानामहस्तप्रक्षेपणीयो भूमिच्छिद्रन्यायेनाद्य विजयसप्तम्यामुदकातिसर्गेण प्रतिपादितः। यतस्ततोऽस्य न कैश्चिद्व्यासेधे प्रवर्तितव्यम्। आगामिभद्रनृ-पतिभिरप्यनित्यान्यैश्वर्याणि, अस्थिरं मानुष्यम्, सामान्यं च भूमिदानफ-लम्, तदपहरणपापं च, अवगच्छद्भिरयमसद्दायोऽनुमन्तव्यः परिपालनी-यश्च। उक्तं च महर्षिभिः—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥' इति।

ओम्। लिखितं मया लेखककृष्णेन नन्नपुत्रेण॥

(एपिग्राफिआ इण्डिका—३।५४–५७)

---

(१५३)

अल्लयडोड्डराज्ञस्ताम्रपत्रम्।[1]

लक्ष्मीं पक्ष्मलितां तनोतु भवतां लक्ष्मीपतिः संततं
केलीकोलतनुः समस्तजगतां रक्षाविधौ दक्षिणः।
स्नेहार्द्रां धरणीं निजैकरमणीं कर्तुं रसादुद्वहं-
स्तत्संश्लेषकुतूहलात्पुलकितो यः स्तब्धरोमाभवत्॥
अस्तु महो हस्तिमुखं स्वस्तिकरं वः समस्तजनिहेतुः।
यत्कटरटदलिमाला विलसति हरिनीलहारसमलक्ष्मीः॥

---

१. इदं ताम्रपत्रं **गोदावरी**प्रान्ते **रामचन्द्रपुर**ग्रामतः ५ मीलदूरे **कौंकगुड**ग्रामे इष्टिकागर्ते आसीत्. तत्पत्रम् Mr. S. H. Wynne महाशयैः Dr. Hultzsch महाशयद्वारा मद्राससंग्रहालये प्रेषितम्. तदादाय G. V. Ramamurti, B. A, महाशयवराः प्रकाशितवन्तः. समयश्चास्य A. D. 1431 इति.

कलापतेस्तां कलयामि बालां कलां कलङ्केन विभिन्नरूपाम् ।
यदन्तरस्यन्दिसुधार्द्रमौलिर्मृत्युंजयः पीतविषः शिवोऽभूत् ॥

अस्ति प्रशस्तमहिमा पुरुषः प्रमाण-
स्तस्य क्रमान्मुखभुजोरुपदादभूवन् ।
वर्णा द्विजप्रभृतयः पदपद्मजानां
वंशेष्वभूज्जगति पण्टकुलं प्रतीतम् ॥

तत्रासीन्महितो महीपतिलको मान्यः सतामुन्नत-
स्त्यागी **दोड्ड**महीपतिः सुकृतवान्पोल्वोलगोत्राग्रणीः ।
दानैर्यस्य विनिर्जितो मतियुतैः साम्याय कल्पद्रुमो
मौनी वल्कलसंवृतः सुरगणं भक्त्या भजत्यादरात् ॥

श्रीयन्नबोलप्रभुकोटयाल्लभूमीश्वरास्तस्य सुताः प्रसूताः ।
सत्येन सत्वेन जयेन धर्मतनूजभीमार्जुनतुल्यरूपाः ॥

तेषां कनिष्ठोऽपि च जन्मनाभूज्ज्येष्ठो गुणैरल्लधरानरेन्द्रः ।
चन्द्रोऽप्यदोषाकरतामुपेतः सौम्योऽपि भूनन्दनतां प्रयातः ॥

प्रतापभानौ प्रकटं यदीये विजृम्भिते वैरिविलासिनीनाम् ।
मुखाम्बुजातानि मुहुः स्वकीयां विकासलीलां विसृजन्ति चित्रम् ॥

शचीव शक्रस्य शिवेव शंभोः पद्मेव सा पद्मविलोचनस्य ।
वेमाम्बिका चोडकुलेन्दुभीमभूपात्मजाभून्महितास्य जाया ॥

श्रीवेमभूमीश्वर**वीरभद्र**भूनाथ**दोड्ड**क्षितिपान्नभूपाः ।
अल्लाडभूपस्य सुता अभूवन्गुणैर्यथा पङ्क्तिरथस्य पुत्राः ॥

गुणैः स तेषां निजजन्मना च ज्यायानभूदल्लयवेमभूपः ।
रामो यथा रम्यगुणाभिरामः स्वसोदराणां निजभक्तिभाजाम् ॥

वेमप्रभो राजमहेन्द्रनामा रामाभिरामाजनि राजधानी ।
अनेकमातङ्गतुरङ्गपूर्णा शशाङ्कसंकाशविराजिसौधा ॥

धर्मानुन्नमयन्रिपून्विनमयन्राज्यश्रियं वर्धय-
न्पापं संशमयन्प्रजाश्च रमयन्विद्वज्जनान्स्थापयन् ।

कीर्तिं संरचयन्दिशासु निखिलक्षोणीभृतामाश्रयो
राजा राजमहेन्द्रनामनगरे **वेमेश्वरो** जृम्भते ॥
तस्यानुजो राजमहेन्द्रराज्यपट्टाभिषिक्तो विलसत्प्रतापः ।
त्यागश्रिया संभृतवीरभद्रः श्री**वीरभद्र**क्षितिपो विभाति ॥
अल्लनृपवीरभद्रं विभवसमुद्रं वितीर्णतरुभद्रम् ।
पूजामोदितरुद्रं बलजितबलभद्रमाहुरतिभद्रम् ॥
आकारजितजयन्तौ जगति जयन्तौ द्विषोश्वरेवन्तौ ।
अमितदयागुणदान्तौ **वेमेश्वरवीरभद्र**भूकान्तौ ॥
राज्ञोस्तयो रम्यगुणोऽनुजातः श्री**दोड्ड**भूपो विजितारिभूपः ।
विभाति कर्पूरवसन्तरायः संग्रामभीमो जगनीब्बगण्डः ॥
आनम्रक्षितिपालकम्रमुकुटप्रप्रोतनानामणि-
च्छायाबालरविप्रभापटलिकादीव्यत्पदाम्भोरुहः ।
दिक्कान्ताकुचचन्दनायितयशःसंपूर्णरोदोऽन्तभू-
रल्लादक्षितिपात्मजो विजयते **दोड्ड**क्षमानायकः ॥
धारामण्डलभञ्जनीमुरडिकाख्यातेऽत्र **दोड्ड**प्रभौ
वाहं लङ्घयति द्विधा त्रिगुणिताष्टारत्निमात्रां भुवम् ।
चित्रं किं नु तदीयकीर्तिरबलारोहत्यहो दिग्गजा-
न्सूर्याश्वान्विषमानुपर्युपरि च प्रक्रीडति प्रत्यहम् ॥
भुवनत्रितये धवले विशदैर्यत्कीर्तिपूरकर्पूरैः ।
चित्रं चकोरयूनां दिवापि संभवति चन्द्रिकामोदः ॥
धाटीघोटिखुराग्रखण्डितमहीधूलीकरालीकृत-
प्रान्तभ्रान्तनतारिवीरपटले श्रीदोड्डभूमीश्वरे ।
चित्रं शत्रुनृपा निमज्य विमले तत्खड्गधाराजले
प्रोन्मज्जन्त्यमराङ्गनाकुचतटीसंघट्टिगङ्गाजले ॥
कदाचिदर्धोदयपुण्यकाले दोड्डक्षितीशोऽर्चितपार्वतीशः ।
दानानि रम्याणि विधाय गङ्गातटेऽग्रहारानपि दातुमैच्छत् ॥

श्रीशाके करबाणविश्वगणिते साधारणे वत्सरे
पौषेऽर्धोदयनाम्नि पुण्यसमये कौन्तेयगङ्गातटे।
ग्रामं गुम्पिणिनामकं सहलिकं सैश्वर्यभोगाष्टकं
विप्रेभ्योल्लपदोड्डभूपतिरदादाचन्द्रमातारकम्॥

अनवरतक्रतुरचनासंमोदितभूमिदेवदेवेन्द्रम्।
तं ग्रामं निजनाम्ना कृतवानल्लाडरेड्डिदोड्डवरम्॥

वृत्तिमन्तो द्विजवरा लिख्यन्ते सांप्रतं क्रमात्।
अत्राग्रहारतिलके सर्वेऽप्येकैकभागिनः॥

ब्रह्मा यजुषि शास्त्राणां व्याख्याता नृपपूजितः।
गौतमः श्रीशिङ्गयज्वपेरुमाडिमखी सुखी॥

षड्दर्शनीव्याक्रियाभिर्जिह्वा यस्य विजृम्भते।
पन्नालकोम्मयप्राज्ञः कौण्डिन्यो यजुरुज्ज्वलः॥

श्रीशिङ्गमद्वेदिपौत्रो मीमांसाशब्दतर्कभूः।
साहित्यसीमा हरितः शिङ्गयार्यो महोदयः॥

षड्दर्शन्यादिविद्यानां यस्य जिह्वा विहारभूः।
मल्लावमाधवसुधीः कौण्डिन्यो यजुषा पटुः॥

मीमांसामांसलः शब्दपटुतर्केऽपि कर्कशः।
आत्रेयो यजुषि प्रौढः श्रीक····भरतः सुधीः॥

षड्दर्शनी नर्तकीवजिह्वाग्रे यस्य नृत्यति।
इङ्कुवुश्रीमल्लुभट्टः शौनको यजुषां निधिः॥

व्याख्याताखिलशास्त्राणामन्नदो राजपूजितः।
हरितो गुडिमेट्टश्रीसर्वदेवमखीश्वरः॥

असोर्यामक्रतुः पुत्रः कोत्तुरप्ययज्वनः।
विद्यान्वितः श्रीर्हरितः श्रीमामिडिमखी सुखी॥

वेदशास्त्रपुराणेषु वेदव्यास इवापरः।
वैष्णवः काश्यपो वल्लभार्यनारायणः सुधीः॥

विद्योतन्ते मुखे यस्य विद्याः सर्वा विजृम्भिताः।
सरस्वतीमोल्लुभट्टः कौण्डिन्यो राजपूजितः॥
साङ्गाग्रवेदनिशितः शास्त्रकाव्यादिभव्यधीः।
चरित्रेण च गोत्रेण वसिष्ठो रामयः सुधीः॥
भारद्वाजोऽग्रवेदाग्र्यः क्रमधाडीगुणार्णवः।
श्रीमानन्नमयज्वेन्द्र शिङ्गयार्यः स दीक्षितः॥
यजुर्जटादेशचर्चाद्यवधानप्रचण्डधीः।
श्रीये....यावधानीन्द्रः कौण्डिन्योऽप्ययवर्यभूः॥
चित्रावधानी यजुषि शौनको विस्सयार्यभूः।
इङ्कुवुश्रीमञ्चनावधानीन्द्रो मखदीक्षितः॥
यजुःसामार्णवौ येन निपीतौ कपिगोत्रभूः।
गुण्टूरिनागयद्वेदी साध्वरौद्गात्रभाग्यवान्॥
गोलपल्यप्पयार्याब्धिचन्द्रः श्रीवत्सगोत्रजः।
अनन्तार्यः साङ्गयजुष्यापस्तम्ब इवापरः॥
पोनुङ्गोटिपोतिभट्टो यजुःक्रमविशारदः।
आत्रेयः सुयशा मानी पोतयार्यतनूभवः॥
कौशिकः श्रीयाद्वनिनरहर्यार्यगोपयः।
अग्रवेदक्रमावृत्तिभाग्यवानाश्वलायनः॥
वेल्धेवि श्रीकेशवार्यः काश्यपः शिङ्गयात्मजः।
श्रीमान्साङ्गयजुर्ब्रह्मा गुणी सर्वोपकारकः॥
श्रीवत्सः श्रीकन्दुगुलमाधवार्यसुतोऽप्पयः।
यजुःक्रमप्रौढियुक्तो दाता श्रीमान्गुणप्रियः॥
कौण्डिन्यः श्रीवोनगिरिमाधवार्याब्धिचन्द्रमाः।
नृसिंहशिष्टः सुजनो यजुर्वेदचतुर्मुखः॥
श्रीयाकुनूरिनागार्यशिष्टो विष्णुतनूभवः।
यजुरस्खलिता वृत्तिः कौशिको विनयोन्नतः॥

पामलपाटिनरहरिर्धीरः श्रीरामयार्यतनुजातः।
कौशिकगोत्रो गुणवान्यजुरावृत्त्या समस्तबुधनन्द्यः॥

हरितः कलुवकश्रीवल्लभद्वेदिशेखरः।
प्रतापवानृग्यजुषोः पूर्तकृन्मल्लयात्मजः॥
श्रीयंपदौभलद्वेदी हरितो गङ्गयार्यजः।
ऋग्यजुःश्रौतशास्त्रज्ञः सलक्षणजटापटुः॥
भारद्वाजो देवरपुनरहर्यार्यनन्दनः।
शूराध्येता यजुर्वेदे श्रीमान्गणपतिः सुधीः॥
सुन्दिलकृष्णभट्टस्य सुतो नरहरिः सुधीः।
भारद्वाजो यजुर्वेदपटुराचार्यकीर्तिमान्॥
भारद्वाजः पेद्दयार्यः कोल्लूरंनमभट्टजः।
रम्याग्रवेदनिपुणो दयावान्दीक्षितो महान्॥
काश्यपः श्रीशिङ्गरेमीय....यार्यतनूभवः।
पोतयार्यो यजुर्वेदमहावृत्तिमतां वरः॥
श्रीकोगण्टिकोटार्यपुत्रः शाण्डिल्यगोत्रजः।
माचनार्यो यजुर्वेदजटावल्लभनामवान्॥
श्रीकोण्डयपेद्दार्यसत्पुत्रो हरितान्वयः।
श्रीयल्लाडार्यविप्रेन्द्रो यजुर्वेदविदां वरः॥
आदित्यार्यसुतः शुङ्गभारद्वाजो यजुःपटुः।
श्रीमान्बोन्दिलपाटिश्रीपेद्दयार्यो महायशाः॥
श्रीमानपूरिदेचार्यपुत्रो गङ्गयकोविदः।
आत्रेयो यजुरावृत्तिविख्यातो विप्रनन्दितः॥
कोन्दादिपोचनार्यस्य सूनुरात्रेयगोत्रजः।
श्रीपोतनार्यो गुणवानद्वितीयो यजुःक्रमे॥
गौतमश्रीकामयार्यतनयो नयभूषणः।
श्रीतम्मयार्यो मतिमान्यजुरध्यापकोत्तमः॥

राम्पल्लिकूचनार्यस्य सूनुः श्रीवत्सगोत्रजः ।
तिप्पयार्यो यजुःप्रौढः शब्दकाव्यादिभव्यधीः ॥
शाण्डिल्यो जल्लिपल्लिश्री**शिङ्गयार्य**सुतः कृती ।
स्वप्नेऽप्यभङ्गाध्ययनः **प्रोलयार्यो** यजुःक्रमे ॥
रम्योदयो **राजुकोण्डपेद्दिभट्टो** यजुःकृती ।
यास्कान्वयो गौतमार्यजातः सर्वज्ञतान्वितः ॥
वसिष्ठश्चोटिपेद्दिश्रीमल्लयार्यतनूभवः ।
जल्लिपल्लिनृसिंहार्यो यजुःश्रुतिविशारदः ॥
ऋग्वेदाध्ययने दक्षो **वल्लूरिमञ्चनात्मजः** ।
भारद्वाजः **शिङ्गयार्यः** संपदुन्नतकीर्तिमान् ॥
वड्डकुण्टलकामार्यगर्भपुण्योदयः सुखी ।
भारद्वाजो वल्लभार्यश्रौती यजुषि शातधीः ॥
नर्ल्लूरिश्रीमल्लयार्यो मल्लयार्यतनूभवः ।
वाधूलो ब्राह्मणवृत्तियुक्त ऋग्वेदपारगः ॥
श्रीयर्तङ्कुरिकामार्यो भारद्वाजः सुलक्षणः ।
यजुर्वेदालयः पुत्रो वल्लभार्यस्य वल्लभः ॥
उण्डूकोण्डलपेद्दार्यकुमारो गौतमान्वयः ।
श्रीयन्नमार्यो विनयी यजुःश्रुतिविशारदः ॥
कौण्डिन्यः कञ्चरे पल्लिनारायणतनूभवः ।
यजुरावृत्तिसिंहः **श्रीनरसिंहसुधीः** सुधीः ॥
हरितो मारटूरिश्रीकृष्णमार्यशुभोदयः ।
अध्वर्यु[ः] श्रुतिविख्यात**स्तिप्पनार्यो** दयापरः ॥
भारद्वाजः सुब्रुवीटियल्लयार्यप्रियात्मजः ।
श्रीमाचनार्यो यजुषि क्रमावृत्तिविचिन्नधीः ॥
काश्यपो विश्रुतोऽध्वर्युः श्रुतौ **मल्लेलगङ्गनः** ।
श्रीमल्लयार्यसंजातो धैर्यगाम्भीर्यभूषितः ॥

श्रीकोण्डश्रीनृसिंहार्यतनयः श्रीदयान्वितः ।
चिट्टनार्यः कण्वगोत्रो यजुर्वेदधुरंधरः ॥
श्रीमण्डवेल्लिनागार्यतनयः **केशवः** सुधीः ।
काश्यपो निशितः शुक्लयजुर्वेदे गुणोन्नतः ॥
काश्यपो मण्डवेल्लिश्रीवल्लभार्यसुतः कृती ।
विद्वाञ्शतपथी **कामयार्यः** शुक्लयजुःपटुः ॥
गुडिवाडांनमार्यस्य कुमारः कौशिकान्वयः ।
पोतार्यः शुक्लयजुषा कान्तः शान्तो गुणप्रियः ॥
नून्तकिश्रीगङ्गनार्यगर्भरत्नमुदारधीः ।
कौण्डिन्यः **सूरयबुधः** सशुक्लयजुरञ्चितः ॥
गुणी कलंम····ख्यातकोम्मयामात्यनन्दनः ।
कौण्डिन्यो **माचमन्त्री**शो राजकार्यधुरंधरः ॥
वल्लूरय्यलुमन्त्रीशो गुणवान्कीर्तिभूषणः ।
आपस्तम्बो राजमान्यः कौण्डिन्यः शिवभक्तिमान् ॥
मुडियश्रीशिङ्गनार्यः कौण्डिन्यो यजुषा पटुः ।
विद्वान्संगीतसाहित्यशास्त्रमार्गविचक्षणः ॥
श्रीवोन्ताप्पयविप्रेन्द्रः कौण्डिन्यो राजवल्लभः ।
प्रियवादी यशोहारी सुखवान्सुजनप्रियः ॥
मौनभार्गवगोत्रः श्रीकेसपार्यतनूभवः ।
येఱवश्रीगोपणार्यो गुणवान(ा)श्वलायनः ॥
चेఱवुश्रीयप्पयार्यतनयो **विस्सयाह्वयः** ।
काश्यपान्वयसंजातो यजुर्वेदी महामतिः ॥
प्रसन्नवल्लभहरेर्ब्रह्मनागेश्वरस्य च ।
अत्राग्रहारे ललिते दत्तं वृत्तिद्वयं द्वयोः ॥
अग्रहारवरस्यास्य ग्रामग्रासार्थमुत्सुकः ।
प्रादादन्नवरग्रामं कृत्स्नं श्रीदोड्डभूपतिः ॥

औभळामात्यतनयं नारनाख्यस्य मन्त्रिणः ।
खण्डिकान्नवरेऽत्रास्ति सार्धखारिचतुष्टयम् ॥
अस्य ग्रामस्य सीमानो दिक्षु पूर्वादिषु क्रमात् ।
सर्वेषां सुप्रबोधाय लिख्यन्ते देशभाषया ॥

"अल्लाडरेडिडदोड्डवरपु सीमानिर्णयमु । ईशान्यादि कौन्तेयमध्यमादि दक्षिणमुखमै धरिमीद पुन्तदण्डनु पलवेलपोलसंधि नन्दिकम्बाननुण्डि कोन्तमेर वच्चि मेडितापवंक दक्षिणमुखमै कोन्तमेर वच्चिमाఱ్ఱियु मे-डितापवङ्कनु पश्चिममुखमै कोन्तमेर वच्चि राप्पटि दक्षिणमुखमै नावु-लकु वच्चि आपुन्ते पट्टि वखङ्कलदाङ्का वच्चि माఱ్ఱ पडुमఱ్ఱ मुखमै ताळ्ळकु वच्चि कोटिकि वेळ्ळि आनडुस पट्टुकोनि आग्नेयमुखमै को-न्तमेर वच्चि तूఱ్ఱुपु मुखमै रावुल पुन्तने कलसि चक्का दक्षिणमुखमै ऊ-रिवाकिटि तूఱ్ఱुपु पडुमटिलं गलसि तूఱ్ఱुपुमुखमै कोन्तमेर वच्चि दक्षिणमुखमै रेण्डु पेद्दतुम्मल नडुमङ्गानु रेण्डूळ्ळ नडुमु वाङ्कु वट्टु कोनि चिन्तलतूఱ్ఱ पुनङ्गा देवरपल्लि ऊरि मुंदटि वयटिकि वेळ्ळि पुट्टचायकु वच्चेनु तूर्पुसीमकु अन्तनुण्डि दक्षिणसीमकु पश्चिममुखमै ऊरि दक्षिणपु पुन्तनडुमु वट्टुङ्कोनि वखङ्कल पुट्टकु—" [इत्यादि देशभाषया ।]

आरामैरभिरामैर्भूदेवैः संपन्मनोहरैः ।
आदिकुन्तातटे भाति ग्रामो **दोड्डवरो** महान् ॥
अल्लाडभूमीश्वर**दोड्डभूपो** भविष्यतः प्रार्थयते नृपालान् ।
ममैष धर्मः परिपालनीयः सौजन्यतो वा सुकृतेच्छया वा ॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥

एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोग्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
गामेकां रत्निकामेकां भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वे पुत्रपौत्रकम् ॥

(एपिग्राफिआ इण्डिका—५ । ५७-६६)

---

(१५४)

वीरचोडमहीपतेस्ताम्रपत्रम्[1] ।

श्रीमाञ्जगत्रयमिदं हरिरादिदेवः
स्रष्टुं विरञ्चिमसृजन्निजनाभिपद्मात् ।
तस्मादभूत्किल महामुनिरत्रिरत्रेः
सोमो महेश्वरशिखान्तकृतप्रतिष्ठः ॥

तस्माद्बुधस्ततश्चक्रवर्ती पुरूरवास्तस्मादायुस्ततो नहुषस्ततो ययातिस्ततः पूरुस्ततो जनमेजयस्ततः प्राचीशस्ततः सैन्ययातिस्ततो हयपतिस्ततः सार्वभौमस्ततो जयसेनस्ततो महाभौमस्तस्मादैशानकस्ततः क्रौधाननस्ततो देवकिस्तस्मादभुकस्तस्माद्दक्षकस्ततो मतिवरस्ततः कात्यायनस्ततो नीलस्ततो दुष्यन्तस्ततो भरतस्ततो भूमन्युस्ततो हस्ती ततो विरोचनस्तस्मादजमीलस्ततः संवरणस्ततः सुधन्वा ततः परिक्षित्ततो भीमसेनस्ततः प्रदीपनस्ततः शंतनुस्ततो विचित्रवीर्यस्ततः पाण्डुराजस्ततः पाण्डवास्तेषु वंशकरादर्जुनादभिमन्युस्ततः परिक्षित्ततो जनमेजयस्ततः क्षेमुकस्ततो नरवाहनस्ततः शतानीकस्तस्मादुदयनस्ततः

---

१. एतदाधारभूतं ताम्रपत्रं **मद्रासप्रदर्शिन्या** Dr. Hultzsch महाशयसमीपे प्रेषितम्, तदेव च पिथुपुरंराजेन Mr. D. F. Carmichael चीफ्सेक्टरमहाशयोपान्ते प्रहितम्. तेन च तत्परीक्षायै Dr. Burnell महाशयवरनिकटे प्रेषितम्. तदेवादाय H. Krishna Shashtri B. A. महाशयेन प्रकाशितम्. समयश्चास्य शकसंवत् १००१ (A. D. 1079) स्फुट एव.

प्रभृत्यवच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्तिषु गतेषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत् । तस्मिन्संकुले पुरोहितेन वृद्धामात्यैश्च सार्धमन्तर्वत्नी तस्य महादेवी **मुडिवेमु**नामाग्रहारमुपगम्य तद्वास्तव्येन **विष्णुभट्ट**सोमयाजिना दुहितृनिर्विशेषमभिरक्षिता सती **विष्णुवर्धनं** नन्दनमसूत । सा च तस्य कुमारकस्य कुलक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत् । स च मात्रा विदितवृत्तान्तो निर्गत्य चलुक्यगिरौ नन्दाभगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहशब्दादीनि कुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडम्बगङ्गादिभूमिपान्निर्जित्य सेतुनर्मदामध्यं दक्षिणापथं पालयामास ।

तस्यासीद्विजयादित्यो विष्णुवर्धनभूपतेः ।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः ।

तत्सुतः **पुलकेशिवल्लभः** । तत्पुत्रः **कीर्तिवर्मा** तस्य तनयः श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः **सत्याश्रयवल्लभेन्द्रस्य** भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादश वर्षाणि वेङ्गिदेशमपालयत् । तत्सुतो **जयसिंहवल्लभ**स्त्रयस्त्रिंशतम् । तदनु **इन्द्रभट्टारकः** सप्त दिनानि, तत्सुतो **विष्णुवर्धनो** नव वर्षाणि, तत्सूनुर्**मङ्गियुवराजः** पञ्चविंशतिम्, तत्पुत्रो **जयसिंह**स्त्रयोदश, तदवरजः **कोक्किलिः** षण्मासान्, तस्य भ्राता **विष्णुवर्धन**स्तमुच्चाट्य सप्तत्रिंशतं वर्षाणि, तत्पुत्रो **विजयादित्यो**ऽष्टादश, तत्तनयो विष्णुवर्धनः षट्त्रिंशतम्, तत्सुतो नरेन्द्रमृगराजोऽष्टाचत्वारिंशतम्, तत्सुतो **विष्णुवर्धनः** षट्त्रिंशतम्, तत्सुतो **नरेन्द्रमृगराजो**ऽष्टाचत्वारिंशतम्, तत्सुतः **कलिविष्णुवर्धनो**ऽध्यर्धवर्षम्, तत्सुतो **गुणगविजयादित्य**श्चत्वारिंशतं वर्षाणि, तद्भ्रातुर्**विक्रमादित्यस्य** तनयश्**चालुक्यभीम**स्त्रिंशतम्, तत्सुतः **कोल्लभिगण्डविजयादित्यः** षण्मासान्, तत्सुतो**ऽम्मराजः** सप्त वर्षाणि, तत्तनयं बालमुच्चाट्य **ताडपो** मासमेकम्, तं जित्वा **विक्रमादित्य** एकादश मासान्, तत्ताडपराजसुतो **युद्धमल्लः**

सप्त, तमुच्चाट्य देशादम्मराजानुजो **राजभीमो** द्वादशम्, तत्सूनुर**म्मराजः** पञ्चविंशतिम्, तस्य द्वैमातुरो **दाननृप**स्त्रीणि, ततः सप्तविंशति वर्षाणि दैवदूरीहया वेङ्गिमहिरनायकाभवत्। ततो दानार्णवसुतः **शक्तिवर्मनृपो** द्वादशवर्षाणि भुवमपालयत्।

ततस्तदनुजः सप्त वत्सरान्भूतवत्सलः।
विमलादित्यभूपालः पालयामास मेदिनीम्॥

तत्तनयो नयशाली जयलक्ष्मीधाम **राजराजनरेन्द्रः**।
चत्वारिंशतमब्दानेकं च पुनर्महीमपालयदखिलाम्॥

यो रूपेण मनोभवं विशदया कान्त्या कलानां निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम्।
भीमं भीमभुजाबलेन विहसन्भाति स्म भास्वद्यशाः
श्रीमत्सोमकुलैकभूषणमणिर्दीनैकचिन्तामणिः॥

राजासावनुरूपरूपविभवामम्मङ्गनाम्ना भुवि
प्रख्यातामुपयच्छत स विधिवद्देवीं जगत्पावनीम्।
या जह्नोरिव जाह्नवीं हिमवतो गौरिव लक्ष्मीरिव
क्षीरोदादिवसेशवंशतिलकाद्राजेन्द्रचोडादभूत्॥

पुत्रस्तयोरभवदप्रतिघातशक्ति-
निःशेषितारिनिवहो महनीयकीर्तिः।
गङ्गाधराद्रिसुतयोरिव कार्तिकेयो
राजेन्द्रचोड इति राजकुलप्रदीपः॥

भासामुन्नतिहेतुं प्रथमं वेङ्गीश्वरत्वमध्यास्य।
यस्तेजसा दिगन्तानाक्रमति सहस्रभानुरुदयमिव॥

उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा
सर्वान्केरलपाण्ड्यकुन्तलमुखान्निर्जित्य देशान्बलात्।
आज्ञां मौलिषु भूभृतां भयरुजा चित्तेषु दुर्मेधसां
प्रीतिः सत्सु दिशासु कीर्तिरतुला येनार्पितो जृम्भते॥

भोगीशाभीलभोगप्रतिमनिजभुजा भर्त्सितात्यन्तबिभ्य-
न्नानाभूपाललोकप्रहितबहुविधानर्घरत्नाभिरामम्।
धत्ते मौलिं परार्घ्यो महति नृपकुले यः कुलोत्तुङ्गदेवो
देवेन्द्रत्वादनूने सुरपतिमहिमा चोडराज्येऽभिषिक्तः॥
हस्तभ्राजितशङ्खचक्रजलजं यं राजनारायणं
लोकः स्तौति स सूर्यवंशतिलकाद्राजेन्द्रदेवार्णवात्।
संभूतां मधुरान्तकीर्तिविदितां नाम्नापरेण स्वयं
लक्ष्मीमुद्वपति स लोकमहितां देवीं जगत्पावनीम्॥
गाङ्गौघा इव निर्मलाः कृततमोध्वंसा दिनेशा इव
क्षोणीन्ध्रा इव भूभरश्रमसहाजातास्तयोः सूनवः।
तन्मध्ये नयविक्रमैकनिलयं श्रीराजराजं प्रति
प्रीत्या वाचमिमामवोचत पिता सर्वोर्वराधीश्वरः॥
वत्स वेङ्गीमहीराज्यं मया दिग्विजयैषिणा।
मत्पितृव्ये पुरा न्यस्तं विजयादित्यभूभुजि॥
स च पञ्चदशाब्दानि पञ्चाननपराक्रम।
महीं रक्षन्महीनाथो दिवं देवोपमो गतः॥
कुलक्रमगता धीर धुरं वेङ्गीभुवो वह।
बाला अपि स्वकार्येषु क्षमास्तेजस्विनः खलु॥
इत्युक्त्वा तां धुरं दत्तां गुरुणा चक्रवर्तिना।
प्रसह्य तद्वियोगोऽपि विनयाद्वहति स सः॥
श्रीपादसेवासुखतो गुरूणां न जातु राज्यं सुखमित्यवेक्ष्य।
संरक्ष्य वेङ्गीभुवमेकमब्दं भूयः स पित्रोरगमत्समीपम्॥
तदनुजमथ धीरं वीरचोडं कुमारं
गुणमिव तनुबद्धं विक्रमं चक्रवर्ती।
उदयमिव रविस्त्वं प्राप्य वेङ्गीश्वरत्वं
वितनु शिरसि पादं भूभृतामित्यवोचत्॥

इत्याशिषं समुपगम्य नृपादवन्ध्या
मातुस्तदग्रजनृपद्वितयात्क्रमेण।
आनम्य तामवरजैः प्रणतः कुमारः
सृष्टः स्वदेशगमनाय स तैः कथंचित्॥

शत्रुध्वान्तमपास्य राजनिकरानाच्छाद्य धाम्ना परा-
न्दुर्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथा नन्दिनीम्।
प्रारूढो जननाथनामनगरी हर्म्योदयाद्रिर्विभु-
र्वेङ्गीभूतलभूषणं नृपसुतो बालार्कबिम्बद्युतिः॥

शाकाब्दे शशिखाम्बरेन्दुगणिते सिंहाधिरूढे रवौ
चन्द्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्वृश्चिके।
लग्नेऽथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदे
लोकस्योद्वहति स पट्टमनघः **श्रीवीरचोडो** नृपः॥

यो दीनकोटिमभिवाञ्छितवस्तुदानैर्भीतानुपाश्रितभयापनुदा भुजेन।
रक्षन्समस्तभुवनाश्रयनामसार्धं धत्ते प्रजाश्च निजधर्मपरिग्रहेण॥

भूलोकादुदिता महोन्नतिमती दिङ्मण्डलव्यापिनी
संक्रान्ताखिलसत्पथा परिगता लोकानथोर्ध्वानपि।
सन्मार्गाच्चलितां भुवीह पतितां पश्चादधोगामिनीं
गङ्गां कीर्तिरमङ्गलप्रमथिनी यस्यातिशेतेतराम्॥

त्यक्त्वा भूभारखेदं फणिपतिरचलं पाति पाताललोकं
सर्वा निर्व्याकुलासीत्परकुपतिपरित्यागिनी मेदिनी च।
लक्ष्मीभाजां द्विजानामपि मखनिवहैर्नन्दितं देववृन्दै-
रित्थं त्रैलोक्यमेतद्भुवमतिमुदितं यत्र भूभारभाजि॥

अक्षतां यो महीं रक्षन्गुरुणा चक्रवर्तिना।
आहुतो यौवनोद्दामदेहालक्ष्मीदिदृक्षया॥

कान्तिं नवामनुदिनं नयनाभिरामां
पुष्णन्तमिन्दुमिव यं तरुणं नृपेन्द्रः।

पश्यन्नतृप्तनयनोऽप्यथ पञ्चमाब्दे
　　प्रास्थापयत्पुनरुदीच्यजयाय सूनुम् ॥

स सर्वलोकाश्रयः श्रीविष्णुवर्धनमहाराजाधिराजो राजपरमेश्वरः परमभट्टारकः परमब्रह्मण्यः **श्रीवीरचोडोदेवः** प्रोलुनाण्ड्डविषयनिवासिनो राष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्वान्समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकसमक्षमित्थमाज्ञापयति । यथा—

वेदानां परिरक्षणे कृतमतिर्देवादिदेवस्तप-
　　स्तप्त्वा संजनयांबभूव भगवान्.........ब्राह्मणान् ।
यैराश्चर्यमहानुभावभवनैरग्नौ यथा चोदितं
　　सायं प्रातरिहार्पितेन हविषा जीवन्ति देवा दिवि ॥

दुष्टो जात्या प्रकृत्या कलुषितहृदयः क्रूरकर्मापि येषा-
　　मेकं विप्रं प्रसाद्य प्रशमितदुरितः स्वर्गमागात्त्रिशङ्कुः ।
राज्ञां वंशे विराजन्बहुसुकृतबलाद्देवराज्येऽभिषिक्तो
　　येषामेकस्य कोपात्प्रभुरपि नहुषः पातितो नाकलोकात् ॥

आज्ञाविधेयानि भवन्ति यस्य जगन्ति सर्वाणि स चन्द्रमौलिः ।
विधाय येषां विधिवत्सपर्यां त्रिलोकनाथस्त्रिपुरं विजिग्ये ॥

येषां प्रभावेण सहस्रधामा रक्षांसि संध्याद्वितये विधूय ।
विभाति निर्विघ्नवियत्प्रचारो जगन्ति रक्षञ्जगदेकचक्षुः ॥

वंशेषु तेषामृषिपुंगवानां विख्यातभूदेवकुलोत्तमेषु ।
प्रशस्तवाक्याः शुभलक्षणाङ्गा ये भान्ति वेदा इव मूर्तिमन्तः ॥

ये वाङ्मयाम्भोनिधिसारतत्त्वज्ञानोज्ज्वलत्कौस्तुभरत्नभासा ।
कृतप्रकाशं हृदयं दधाना विभान्ति विष्णोरिव मूर्तिवेदाः ॥

ते नामतो गोत्रतश्च निरूप्यन्ते—तत्र तावद्भिराममूर्त्तिराचारनिधिरसत्पुरोहितो भागद्वयवान् चोडभट्टः, श्रीकृष्णभट्टः, श्रीधरभट्टः, आचभडारभट्टः, श्रीकृष्णभट्टः, सर्वदेवभट्टसोमयाजी, केशवभट्टः, तिरुवरङ्गमुडयान्भट्टः, यज्ञात्मभट्टः, नारसिंहभट्टः, तिरुवरङ्गमुडयान्भट्टः, तिरु-

मलमुडयान्भट्टः, सज्जनभट्टः, श्रीधरभट्टः, माधवभट्टः, श्रीरामभट्टः, कडलुसि····कालभट्टः, केशवभट्टः, नारसिंहभट्टः, केशवभट्टः, वेन्नकूतभट्टः, वामनभट्टः, सर्वदेवभट्टः, श्रीरङ्गशायिभट्टः, गोविन्दभट्टः, वेन्नयषडङ्गवित्, नन्दिकुमारभट्टः, तिरुमलमुडयान्भट्टः, श्रीवासुदेवभट्टः, सोमदेवभट्टः, दामोदरभट्टः, जान्नियत्रिवेदी, नित्यानन्दत्रिवेदी, नारायणषडङ्गवित्, कामियषडङ्गवित्, आरुलालदशपुरिभट्टः, गङ्गाधरभट्टः, आरुलालभट्टः, श्रीकृष्णभट्टः, माधवभट्टः, तिरुमलमुडयान्भट्टः, वामनभट्टः, माधवभट्टः, नारायणषडङ्गवित्, श्रीरङ्गनाथभट्टः, तिल्लनायकभट्टः, विष्णुभट्टः, तिरुवरङ्गसहस्रः, विष्णुभट्टः, नारायणभट्टः, पार्थसारथिः, नारायणभट्टः, वेन्नकूतभट्टः, कुमारस्वामिभट्टः, नागदत्तभट्टः, कुप्ययभट्टः, नगदोनयभट्टः, अम्बलताडिभट्टः, चेन्दामरकण्णभट्टः, श्रीकृष्णभट्टः, तिरुवेङ्गसहस्रः, नारायणभट्टः, त्रिविक्रमभट्टः, गोविदभट्टः, पोतियभट्टः, जातवेदियभट्टः, श्रीकृष्णभट्टः; श्रीरामसहस्रः, सिंहपिरान्सहस्रः, कुमारस्वामिभट्टः, गुण्डदेवभट्टः, दोनयभट्टः, श्रीनारसिंहभट्टः, वामनभट्टः, वेन्नकूतसहस्रः, नारायणसहस्रः, पोनयसहस्रः, श्रीरामभट्टः, केशवभट्टः, कामयसहस्रः, दोनयभट्टः, श्रीरामभट्टः, दक्षिणामूर्तिभट्टः, लक्ष्मीधरभट्टः, नारायणभट्टः, सोमदेवभट्टः, नारायणभट्टः, केशवभट्टः, नारायणभट्टः, तिरुवरङ्गनारायणसहस्रः, दामोदरभट्टः, मावयभट्टः, वामयभट्टः, तिरुमलमुडयान्भट्टः, गङ्गाधरभट्टः, श्रीगरुडभट्टः, माधवभट्टः, तिरुमलमुडयान्भट्टः, आलसहस्रः, विष्णुभट्टः, नागदेवसहस्रः, पोन्नयसहस्रः, श्रीधरभट्टः, तणियपेरुमान्सहस्रः, श्रीकैलाशमुडयान्सहस्रः, आलवन्दान्भट्टः, पिट्टयभट्टः, घृताशिभट्टः, आरामुदुभट्टः, श्रीकृष्णभट्टः, गङ्गाधरभट्टः, गोविन्दसहस्रः, नारायणभट्टः, श्रीधरभट्टः, नारायणभट्टः, नारायणभट्टः, इत्येकोनविंशत्युत्तरशतसंख्या भारद्वाजगोत्रजाः । गोविन्दभट्टः, कुमारस्वामिभट्टः, यज्ञात्मभट्टसोमयाजी, ताडिकुमारभट्टः, विष्णुभट्टः, दोनयभट्टः, करियकोसहस्रः, नारायणभट्टः, दोनयभट्टः, इति संकृतिगोत्रजा नव । श्रीकृष्णभट्टः, दोड्डियभट्टः, तिरुवरङ्गमुडयान्भट्टः, दोनयभट्टः, त्रिविक्रमभट्टः, वेन्नकूत-

भट्टः, गङ्गाधरभट्टः, दामयषडङ्गवित्, गोविन्दभट्टः, उलहमुण्डान्भट्टः, श्रीरङ्गनाथभट्टः, कुमारस्वामिभट्टः, नारायणभट्टः, माधवभट्टः, तिरुमलमुडयान्भट्टः, विष्णुभट्टः, मावनभट्टः, चोडियषडङ्गवित्, दोनयभट्टः, नारायणभट्टः, कोलवामनभट्टः, अत्ताडिभट्टः, अत्तामभट्टः, दामोदरभट्टः, सीरलङ्गोभट्टः, अडहियमणवालुभट्टः, आदित्यभट्टः, दोनियसहस्रः, कुमारपेरुमान्भट्टः, तिरुप्यनङ्गाडभट्टः, शिवदेवभट्टः, भीमनाथभट्टः, गोविन्दभट्टः, यज्ञदोणभट्टः, उत्तरीश्वरषडङ्गवित्, अत्ताडिभट्टः, शंकरनारायणभट्टः, विष्णुसहस्रः, श्रीरामभट्टः, वासुदेवभट्टः, चेलव्वसहस्रः, मधुसूदनभट्टः, नारायणभट्टः, श्रीरामभट्टः, माधवभट्टः, इति पञ्चोत्तरचत्वारिंशत्काश्यपगोत्रजाः। शंभुभट्टः, कुमारस्वामिभट्टः, विष्णुभट्टः, माधवभट्टः, देवकुमारभट्टः, विद्वयषडङ्गवित्, मलहिनियनिण्ड्रान्भट्टः, श्रीकृष्णभट्टः, अरुलारभट्टः, यज्ञमूर्तिभट्टः, दोनियत्रिवेदिभट्टः, रेमनषडङ्गवित्, श्रीधरषडङ्गवित्, माधवभट्टः, कामयत्रिवेदी, कुमारस्वामिभट्टः, श्रीकुमारभट्टः, शंकरषडङ्गवित्, अय्यपिरान्सहस्रः, नामयभट्टः, वेण्णकूतभट्टः, ईश्वरभट्टः, दोनयषडङ्गवित्, शंकरनारायणभट्टः, तिरुमलमुडयान्भट्टः, हृषीकेशभट्टः, श्रीधरभट्टः, आकोण्डविलभट्टः, केशवभट्टः, अरुलारसहस्रः, तिरुनीलकण्ठभट्टः, तिरुवाक्कुलमुडयान्सहस्रः, यज्ञदोणभट्टः, सिग्गपिरान्भट्टः, तिण्डयसहस्रः, कोलवामनसहस्रः, सुन्दरतोलुडयान्सहस्रः, नारायणभट्टः, वेण्णकूतसहस्रः, चन्द्रशेखरभट्टः, नम्बियाण्डानुभट्टः, कामयभट्टः, श्रीधरसहस्रः, विद्वयभट्टः, मावियषडङ्गवित्, दामोदरसहस्रः, सीरलङ्गोभट्टः, चेल्वयभट्टः, कन्दयसहस्रः, रुद्रसहस्रः, चि····पाण्डान्भट्टः, सोमयाजी, पेरियाण्डान्भट्टसोमयाजी, श्रीरामभट्टः, पेरियानम्बिभट्टः, इति हरितगोत्रजाः पञ्चोत्तरपञ्चाशत्। नारायणभट्टः, गङ्गाधरभट्टः, नारायणभट्टः, श्रीरामदशपुरिभट्टः, सीरलङ्गोभट्टः, सर्वदेवभट्टः, श्रीवासुदेवभट्टः, मेडयभट्टः, पोतियषडङ्गवित्, मनत्तुक्किनियान्भट्टः, भास्करभट्टः, ए····सेवकभट्टः, मेडयषडङ्गवित्, नीलकण्ठभट्टः, तिरिवलमुडयान्भट्टः, माधवभट्टः, उलहमुण्डान्भट्टः, जन्नयसहस्रः, श्रीहनुमत्सहस्रः, अप्पयभट्टः,

वेन्नयभट्टः, तेवडिसहस्रः, शंकरसहस्रः, तिरुमलमुडयान्भट्टः, पेरियाण्डा-न्भट्टः, श्रीधरभट्टः, श्रीरामभट्टः, शिवदेभट्टः, आदित्यषडङ्गवित्, दामोदरभट्टः, वासुदेवभट्टः, जातवेदिभट्टः, माधवषडङ्गवित्, अत्तियषडङ्गवित्, नन्दिकुमारभट्टः, केशवभट्टः, वीट्टिरिन्दान्भट्टः, आयिरञ्जोतिसहस्रः, भट्ट-देवभट्टः, वामनभट्टः, दामोदरभट्टः, पेरियाण्डान्भट्टः, कुमारस्वामिभट्टः, दामंयसहस्रः, अडिहनम्बिचतुर्वेदिभट्टः, श्रीवेदव्यासभट्टः, इति कौशिक-गोत्रजा अष्टोत्तरचत्वारिंशत् । श्रीगरुडदशपुरीयभट्टः, वेण्णकूतभट्टः, इति द्वौ गर्गगोत्रजौ । रेमयभट्टः, अरुलारदशपुरीयभट्टः, चन्द्रशेखर-भट्टः, भीमनाथभट्टः, आरामदुभट्टः, श्रीकृष्णदशपुरीयभट्टः, तिरुवरङ्ग-मुडयान्भट्टः, आदित्यभट्टः, इत्यष्टौ वाधूलगोत्रजाः । श्रीकृष्णभट्टः, श्री-कृष्णभट्टः, इति द्वौ कपिगोत्रजौ । यज्ञमूर्तिभट्टः, दारयषडङ्गवित्, दोन-यत्रिवेदी, भीमयभट्टः, इति चत्वारः कुत्सगोत्रजाः । श्रीकृष्णभट्टः, ना-रायणभट्टः, यज्ञकेशवभट्टः, केशवभट्टः, श्रीकुमारभट्टः, सूर्यदेवभट्टः, श्रीकृष्णभट्टः, वासुदेवभट्टः, इत्यष्टौ बादरायणगोत्रजाः । तिरुवरङ्गदेवभट्टः, सर्वदेवभट्टः, श्रीरामभट्टः, सर्वदेवभट्टः, वेण्णकूतभट्टः, श्रीधरभट्टः, श्री-कृष्णसहस्रः, कामियषडङ्गवित् वीट्टीरिन्दान्भट्टः, कोवाण्डान्भट्टः, मन-त्तिकिनियान्सहस्रः, इत्येकादश लोहितगोत्रजाः । श्रीकृष्णभट्टः, श्रीकृ-ष्णभट्टः, नारायणभट्टः, इति त्रयः कामकायनगोत्रजाः । श्रीरामभट्टः, श्रीकृष्णभट्टः, परमेश्वरभट्टः, यज्ञस्कन्दभट्टः, देवदेवेशभट्टः, मधुसूदनभट्टः, माधवभट्टः, श्रीरामभट्टः, वासुदेवभट्टः, विष्णुभट्टः, रुद्रभट्टः, दोनयभट्टः, दक्षिणामूर्तिभट्टः, यज्ञात्मभट्टः, कुमारस्वामिभट्टः, श्रीरामभट्टः, शीरल-ङ्गोभट्टः, शंकरनारायणभट्टः, यज्ञमूर्तिभट्टसोमयाजी, दामोदरभट्टः, श्री-वासुदेवभट्टः, नारायणभट्टः, भीमेश्वरभट्टः, दोनयभट्टः, सुब्रह्मण्यभट्टः, अरुलारभट्टः, तिरिमलमुडयान्भट्टः, वासुदेवभट्टः, दामोदरभट्टः, श्रीकृ-ष्णभट्टः, सूर्यदेवभट्टः, वासुदेवभट्टः, माधवभट्टः, सिङ्गपिरान्सहस्रः, वे-ण्णकूतसहस्रः, अरुलारसहस्रः, पद्मनाभभट्टः, दक्षिणामूर्तिभट्टः, श्रीरामदेव-भट्टः, सिङ्गपिरान्भट्टः, श्रीकृष्णसहस्रः, ईश्वरभट्टः, माधवसहस्रः, अरस-

ब्रह्मा, जनार्दनभट्टः, माधवभट्टः, दारयभट्टः, अरुलारसहस्रः, तिरवरङ्ग-मुडयान्सहस्रः, तिरिवायिक्कुलमुडयान्सहस्रः, नारायणभट्टः, पुरुषोत्तम-भट्टः, पोन्नयसहस्रः, नारायणभट्टः, नित्यानन्दभट्टः, सोमदेवभट्टः, पार्थ-सारथिभट्टसोमयाजी, विदयभट्टः, सीरलङ्गोवभट्टः, निरवद्यभट्टः, वाजपे-ययाजी भागद्वयवान्, इति षष्टिः कुण्डिनगोत्रजाः । दत्तत्रिवेदिभट्टः, केशवभट्टः, तिरुवेङ्कडभट्टः, रमण्डयभट्टः, ईश्वरभट्टः, वेमनभट्टः, अत्ति-यारालिभट्टः, वेन्नयभट्टः, वेण्णकूतभट्टः, षष्ठिरुद्रभट्टः, केशवभट्टः, मणि-नागभट्टः, श्रीकृष्णभट्टः, विष्णुदोनयभट्टः, कुमारस्वामिसहस्रः, दक्षिणा-मूर्तिभट्टः, दामोदरभट्टः, कामकोटसहस्रः, तेरुपोलियनिङ्गान्सहस्रः, श्री-वासुदेवसहस्रः, श्रीरामभट्टः, माधवभट्टः, शंकरनारायणसहस्रः, सिङ्गपि-रान्सहस्रः, रच्चेनषडङ्गवित्, आरामदुभट्टः, दोनयसहस्रदक्षिणामूर्तिभट्टः, सोमयभट्टः, इत्यात्रेयगोत्रजास्त्रिंशत् । पेरुबु····क्कडलभट्टः सोमयाजी, आरामदुभट्टः, केशवभट्टः, गोविन्दभट्टः, इति चत्वारो रथितरगोत्रजाः । श्रीधरभट्टः, शंकरनारायणभट्टः, लालकोण्डवेलिभट्टः, नारायणभट्टसोम-याजी, तिरुकु····गुडिभट्टः, तिरुवरङ्गनारायणभट्टः, तिरिवायिक्कुलमुडया-न्भट्टः, माधवभट्टः, पल्लिगोण्डान्भट्टः, यज्ञमूर्तिभट्टः, नारायणभट्टसोम-याजी, शेखरभट्टः, श्रीरामभट्टः, तिरिवाक्कुलमुडयान्भट्टः, गङ्गाधरभट्टः, श्रीरङ्गनाथभट्टः, रुद्रकुमारभट्टः, श्रीरामभट्टः, पोतयषडङ्गवित्, वेण्णकू-तभट्टः, नारायणभट्टः, वेमयषडङ्गवित्, अप्पयषडङ्गवित्, माधवभट्टः, श्रीरामभट्टः, श्रीरामभट्टः, सुब्रह्मण्यभट्टः, श्रीरामभट्टः, केशवभट्टः, पुरुषो-त्तमभट्टः, नारायणसहस्रः, दक्षिणामूर्तिभट्टः, वेण्णकूतभट्टः, सोमनाथ-भट्टः, तिरिवायिक्कुलमुडयान्भट्टः, सिङ्गपिरान्भट्टः, ईश्वरसहस्रः, नाराय-णसहस्रः, श्रीभरतसहस्रः, श्रीकृष्णभट्टः, दक्षिणामूर्तिभट्टः, केशवसहस्रः, तिरुवरङ्गमुडयान्भट्टः, तिरुप्यनङ्गाङ्कुसहस्रः, सीरलङ्गोसहस्रः, दक्षिणामू-र्तिभट्टः, गोविन्दभट्टः, केशवभट्टः, त्रिविक्रमभट्टः, रा····यपोतषडङ्गवित्, श्रीधरभट्टः, शंकरनारायणभट्टः, आदित्यदेवभट्टः, नारायणभट्टः, श्रीधरभट्टः, दोनयभट्टः, भीमायभट्टः, केशवभट्टः, पद्मनाभभट्टः, गङ्गाधरभट्टः, इत्ये-

कोत्तरषष्ठिर्वत्सगोत्रजाः । मण्डयभट्टः, त्रिविक्रमभट्टः, रुद्रकुमारभट्टः, सिङ्गपिरान्भट्टः, आलिदेवयभट्टः, पद्मनाभभट्टः, नारायणभट्टः, तिरुवरङ्गमुडयान्भट्टः, श्रीधरभट्टः, मणिनागभट्टः, विष्णुभट्टः, श्रीरामभट्टः, नारायणभट्टः, तिरिप्पोरिभट्टः, तिरिमलुडयान्सहस्रः, वामनभट्टः, कोण्डयसहस्रः, आदित्यदेवसहस्रः, इत्यष्टादश गौतमगोत्रजाः । अडशियमणवालभट्टः, तिरुपनङ्कडभट्टः, माधवभट्टः, दोनयसहस्रः, वामनभट्टः, केशवसहस्रः, गोविन्दसहस्रः, कुमारस्वामिभट्टः, अरुलारभट्टः, इति वसिष्ठगोत्रजा नव । कुमारस्वामिभट्टः, श्रीधरभट्टः, श्रीभरतभट्टः, दामोदरभट्टः, कुमारस्वामिभट्टः, आण्डमणिभट्टः, दामोदरभट्टः, भागद्वयवान् करिमाक्यभट्टः, इति अष्ट नितुन्दिगोत्रजाः । दोनयषडङ्गवित्, कोण्डयषडङ्गवित्, जन्नयभट्टः, जन्नयषडङ्गवित्, दोनयभट्टः, जनार्दनषडङ्गवित्, इति शालावतगोत्रजाः षट् । यज्ञात्मभट्टसोमयाजी, श्रीकृष्णभट्टः, गोविन्दभट्टः, श्रीभरतभट्टः, इति चत्वारो विश्वामित्रगोत्रजाः । सूर्यदेवसहस्रः, अप्ययभट्टः, केशवभट्टः, कुलोत्तुङ्गचोडब्रह्ममहाराजः, सेनापती राजराजब्रह्मराजो भागचतुष्टयवान्, कुमारनारायणब्रह्मराजो भागद्वयवान्, दिवाकरभट्टः, नडविरुकुङ्कालकालभट्टः, केशवभट्टः, इति मुद्गलगोत्रजा नव, नारायणसहस्रः, प्रबोधशिवपण्डितो भागद्वयवान्, इति द्वौ वालखिल्यगोत्रजौ । दामोदरभट्टसोमयाजी, दुग्गयभट्टः, तिरुनाण्डुडयान्भट्टः, आण्डमाणिभट्टः, इति चत्वारः शटगोत्रजाः । वासुदेवभट्टः, वेण्णकूतसहस्रः, नारायणभट्टः, इति शाण्डिल्यगोत्रजास्त्रयः । निम्बदेवभट्टः, इत्येको विष्णुवृद्धः । नारायणभट्टः, गोविन्दभट्टः, श्रीकृष्णभट्टः, इति त्रयः पाराशर्यगोत्रजाः । इति षट्त्रिंशदुत्तरपञ्चशतसंख्येभ्यः षट्कर्मनिरतेभ्यो न्यूनाधिकभावेन चतुश्चत्वारिंशदधिकपञ्चशतसंख्यान्भागान्परिकल्प्य भवद्विषये द्वादशपूण्डिसहितमालवेह्लिनामग्रामः पोन्नतो''''नामग्रामश्च उत्तरवरुसविषये आलमिनामग्रामश्चेति ग्रामत्रयमेकीकृत्य श्रीवीरचोडचतुर्वेदिमङ्गलनाम्ना सुप्रतिष्ठाग्रहारीकृत्य प्रतिसंवत्सरमत्र प्रतिभागं सार्धं निष्कं करं परिकल्प्य यदतोऽन्यत्सिद्धाया वेण्डायाभिनवादिकं यच्च कोड-

....शुल्कनामकं यच्च वणिग्भ्यः पूर्णोपजीविभ्यश्च राजग्राह्यं तत्सर्वं परिहृत्य सर्वकरपरिहारेण धारापूर्वकमस्माभिराचन्द्रार्कमुत्तरायणनिमित्ते दत्तमिति विदितमस्तु वः । अस्य ग्रामसीमानः—दक्षिणतः पोन्नवाड्यु मल्लम्रोल्लनु सीमा, पश्चिमतः कोल्लिप्रोल्लनु चेम्ब्रोल्लनु सीमा, उत्तरतः पोलकुम्ब....नु डक्कलपूण्डिनि बेण्डपूण्डिनि सीमानः क्षेत्रसीमानः, पूर्वतः समुद्रः, आग्नेयां दिशि पोन्नवाड पोलमुनीपूरि पोलमुं गूडिन चोटि मोवलि तोडि इसुकमेट्टयुदीनि पड्डमटि रिट्टग्रानि तोडि ताड्डनु सीमा । (इत्यग्रे देशभाषा ।) अत्र व्याकरणं व्याचक्षाणस्य वृत्त्यर्थं भाग एकः, मीमांसाव्याख्यात्रे द्वौ, वेदान्तं व्याख्यातुरेकः, ऋग्वेदमध्यापयितुरेकः, यजुर्वेदमध्यापयितुरेकः, सामानि गापयितुरेकः, रूपावतारं व्याचक्षाणस्यैकः, पुराणं वाचयितुरेकः, वैद्यस्यैकः, अम्बष्ठस्यैकः, विषवादिन एकः, ज्योतिर्विद एकः, इति गुणवृत्तिभागा द्वादश, ग्राममध्यमधिवसते **विष्णुभट्टारकाय** भागौ द्वौ, पश्चिमं दिग्भागमधिवसते च द्वौ, **श्रीकैलासदेवाय** द्वौ, इतराभ्यो **वासुदेवताभ्यः** एकः, इति सप्तदेवभागाः । अस्योपरि न केनचिद्बाधा कर्तव्या । यः करोति स पञ्चभिर्महापातकैर्युक्तो भवति । तथा चोक्तं भगवता व्यासेन—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रुमिः ॥
गामेकां स्वर्णमेकं वा भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

श्रीविजयराज्यसंवत्सरे त्र्युत्तरविंशतिसंवत्सरे दत्तस्यास्य शासनस्याज्ञप्तिः पञ्चप्रधानाः । काव्यकर्ता विद्यभट्टः । लेखकः पेन्नाचार्यः ।

(एपिग्राफिआ इण्डिका—५ । ७४-९४)

---

(१५५)

श्रीमज्जायमहाराजानां शिलालेखः ।

स्वस्ति श्रीः ।

जयति हरिवराहः प्रेमसंभ्रान्तपृथ्वी-
स्तनभरपरिरम्भारम्भदृप्तस्य यस्य ।
पुलकचुलुकिताम्भःसंचयस्तोयराशिः
पुनरविरलनिर्यत्स्वेदपूरैरपूरि ॥

हेरम्बस्य विकल्पदन्तमुकुलं गौरीहरस्योत्सव-
प्रत्यासन्नविलासदीपकलिका गङ्गामृणालाङ्कुरः ।
देवस्य त्रिपुरद्रुहो विजयिना पुष्पेषुणा मस्तके
विन्यस्ताङ्कुशविभ्रमा विजयते चूडासुधांशोः कला ॥

पायाद्वः परिवर्तमानलहरीप्राग्भारमास्फालय-
न्सायंकालतरंगकेलिषु करास्कन्देन मन्दाकिनी ।
देवस्यारभटीपरिभ्रमकलासंरम्भसंभाविनः
शंभोरम्बुमृदङ्गवाद्यरचनारम्भाय लम्बोदरः ॥

हंसाः पद्मासनारूढा यदन्तः समुपासते ।
परामृतरसस्यन्दि स्रोतः सारस्वतं स्तुमः ॥

प्राचीवधूमुखविशेषकपद्मरागः
प्रख्यायते हि भगवानरविन्दबन्धुः ।
यत्र श्रुतिप्रणयधामनि संनिधत्ते
देवो हिरण्मयवपुः पुरुषः पुराणः ॥

मनुरंशुमतोऽस्य सूनुरासीद्यत एवाभ्युदिताः स्वभाववशुद्धाः ।
निगमादिव सर्वधर्मचर्यास्तुहिनाद्रेरिव राजहंसवंशाः ॥

---

१. 'अयं हि शिलालेखः **कृष्णा**परिगणान्तर्गत**बापट्ला**तालुके **चेम्ब्रोलू**ग्रामीय**नागेश्वर**मन्दिरगोपुरस्थस्तम्भयोर्दक्षिणस्तम्भस्य परित उत्कीर्णो वर्तते,' इति E. Hultzsch. Ph. D. महाशयाः प्रकाशकाः. अस्य शकसंवत् ११३५ (1213 A.D.)

तस्मादिक्ष्वाकुरासीत्तदुपरि **सगर**स्ततपरस्तात्**ककुत्स्थ**-
स्तस्मादूर्ध्वं **दिलीप**स्तमनु **दशरथ**स्तत्सुतो **रामचन्द्रः** ।
यद्वीरश्रीविलासा बिससमतुलितोदग्रकैलासजाग्र-
द्दोःक्रीडातुङ्गलङ्कासुभटविघटनास्ते दिगन्ते प्रथन्ते ॥
एषां वंशे **रघूणां** क्षितिपतिरभवद्**दुर्जयः** शौर्यकेलि-
स्फूर्जद्भूमा ततोऽभूत्प्रतिकरटिघटाशातनो **वेतराजः** ।
चक्रे विक्रान्तबाहुस्तदनु वसुमतीपालनं **प्रोल**भूप-
स्तत्पुत्रो **रुद्र**देवस्तदुपरि च नृपोत्तंसरत्नं बभूव ॥
ततस्तत्सोदर्यः स्वभुजधृतसाम्राज्यमहिमा
महादेवक्षोणीरमण इति गीतस्त्रिभुवने ।
अभूत्सेवानम्रक्षितिपतिशिरोमण्डनमणि-
प्रभाभिर्यत्पादाम्बुरुहमकरन्दव्यतिकरः ॥
अथ **गणपति**देवः प्रादुरासीदमुष्मा-
त्सुरतरुरिव सिन्धोः श्लाघ्यविश्राणनश्रीः ।
विहरति फणिभर्तुः श्वासखेदादपेता
सुरभिमलयजार्द्रे यद्भुजे भूतधात्री ॥
यस्य प्रस्थानभेरीमुखरितहिमवद्गह्वरं सैन्यघोषं
श्रुत्वा प्रत्यर्थिकान्ताः प्रशिथिलकबरीभारबद्धाः समन्तात् ।
झञ्झावातावधूतध्वनितजलधरव्यूहसंक्षोभरिङ्ख-
न्निर्घाताघातभीतप्रसृमरचमरीविभ्रमा विभ्रमन्ति ॥
मा त्वं मर्दय **मद्रनाथ** पुरतः **पाञ्चाल** मुञ्चान्तरं
मार्गं देहि **विदेह**भूप पदवी **हम्मीर** किं वार्यते ।
हूण क्षीणगतिं जहीहि गमने **काशीन्द्र** का सान्द्रता
यस्य द्वारि विजृम्भते चिरमिति क्ष्मापालकोलाहलः ॥
वर्धते खलु वसुंधरापतेस्तस्य सिन्धुरचमूधुरंधरः ।
जायनः सकलनाट्यवैदिकग्रामणीः कविसभाशिखामणिः ॥

यत्कीर्तिगीतचतुरास्त्रिदशेन्द्रकन्याः
शुद्धान्तसौधशिखरेषु पुलोमजायाः ।
तामिस्रपक्षरजनीष्वपि चन्द्रिकाभिः
क्रीडाचकोरमिथुनानि विलोभयन्ते ॥

यत्त्यागाद्भुतनिर्जितैरिव पयःसर्वस्वमुन्मुच्य तै-
र्यत्र क्वापि पलायितेऽपि शरदारम्भे महाम्भोधरैः ।
यत्सेनाकरिमल्लगल्लफलकश्रेणीषु लब्धास्पदा
वृष्टिर्यत्प्रतिपक्षपक्ष्मलदृशां नेत्रारविन्देषु च ॥

एतैः पुरा नः क्षितिपालपुत्राः संरक्षिताः संयति दन्तदष्टैः ।
इतीव यद्वैरिविलासहर्म्यैस्तृणप्ररोहाः शिरसा ध्रियन्ते ॥

सुतनु वदनकान्तिं वाससः पल्लवेन
स्थगय सलिलपूरैर्दुर्गमं वर्त्म मा भूत् ।
इति गिरिमधिगच्छन्यस्य शत्रुक्षितीशः
कथयति निजकान्तां चन्द्रकान्तस्थलीषु ॥

मन्त्री कार्यनिरूपणे प्रियसुहृद्विश्रम्भसंभाषणे
काव्यारम्भविधौ कविः सहचरः संगीतसंपादने ।
कर्ता शिल्पकलाकलापविषये संप्रेषणे किंकरो
युद्धे यश्छलमत्तिगण्डनृपतेरग्रेसरो वर्तते ॥

अथैकदा दक्षिणदिक्क्षितीशान्विजित्य वीरो विनिवर्तमानः ।
मध्येपथं **ताम्रपुरी**मयासीच्चञ्चत्पताकां **छलमत्तिगण्डः** ॥

पञ्चत्रिंशदुपेतरुद्रशत(११३५)संख्याते शकाब्दे मधौ
मासि श्रीमुखवत्सरे स नृपतिः श्रीजायसेनाभृते[1] ।
पूर्वं तावकमातृमातुलभुजासंरक्षितां षाण्मुखी-
मद्यारभ्य मदाज्ञया पुरमिमां त्वं पालयस्वेत्यदात् ॥

अथ स सकलप्रासादानां प्रणष्टशिलेष्टका-[2]
प्रभृति सकलद्रव्यं नव्यं विधाय समन्ततः ।

---

१. A. D. 1213. २. 'नशेः षान्तस्य' (८।४।३६) इति पाणिनिसूत्रेण णत्वनिषेधादत्र 'प्रनष्ट' इति बोध्यम्.

यश इव सुधालेपं तत्र प्रकाश्य ततः परं
कनककलशव्यूहं स्वस्य प्रतापमिव न्यधात् ॥
स खलु सकलाङ्गभाजं कनकमयीमकृत तारकारातेः।
प्रतिकृतिमसुररणाङ्गणविहरणयोग्यं तनुत्रमिव ॥
सर्वोपचारसिध्यर्थमस्य यत्रापरिच्छदम्।
सौवर्णं राजतं ताम्रं कांस्यं च बहुधा व्यधात् ॥
महाय लोहप्रतिमां महीयसीं स तस्य देव्यौ च विधाय तादृशौ।
प्राकारमुच्चं शनिर्मण्टपं[1] महत्त्रिभूमिकं गोपुरमप्यकल्पयत् ॥
अथैतस्याकार्षीत्प्रतिमकरसंक्रान्तिदिवसं
महाखेटक्रीडाश्रमविधुतये मण्डपमसौ।
यदालेख्ये लेखैरवसरसमेतैः सपुलकं
विभाव्यन्ते देवासुरसमरसंरम्भरचनाः ॥
मूलस्थानस्य लिङ्गस्य **काडुविट्टेश्वर**स्य च।
नवप्रतिष्ठामकरोद्दस्युभिः परिभूतयोः ॥
दुर्गं च **ताम्रनगरी**मभितो व्यधत्त
प्राकारमुन्नतमुदञ्चितगोपुरं सः।
आभाति येन हरसूनुविनिर्जितेन
क्रौञ्चेन सा शिखरिणा परिसेवितेव ॥
गामेकां रत्निकामेकां भूमेरप्येकमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥
स्वसुकृतपरिपालनात्प्रभूणां परकृतपालनमेव धर्महेतुः।
हरिरपि कमलासनस्य सृष्टिं सततमवञ्जगतामभूदुपास्यः ॥

---

१. 'मण्डपं' इति स्यात्.

इदं रक्षिष्यतां राज्ञां यशश्चन्द्रिकया सह ।
चिरं जायचमूपस्य धर्मचन्द्रः प्रवर्धते ॥

(एपिग्राफिआ इण्डिका—५।१४३-१४८)

---

(१५६)

तृतीयकृष्णमहाराजानां दानपत्रम् ।

ॐ

स जयति जगदुत्सवप्रवेशप्रथनपरः करपल्लवो मुरारेः ।
लसदमृतपयःकणाङ्कलक्ष्मीस्तनकलशाननलब्धसंनिवेशः ॥
जयति च गिरिजाकपोलबिम्बादधिगतपत्रविचित्रतांसभित्तिः ।
त्रिपुरविजयिनः प्रियोपरोधाद्धृतमदनाभयदानशासनेव ॥
श्रीमानस्ति नभस्तलैकतिलकस्त्रैलोक्यनेत्रोत्सवो
देवो मन्मथबान्धवः कुमुदिनीनाथः सुधादीधितिः ।
निःशेषामरतर्पणार्पिततनुप्रक्षीणतालंकृते-
र्यस्यांशः शिरसा गुणप्रियतया नूनं धृतः शंभुना ॥
तस्माद्विकासनपरः कुमुदावलीनां दोषान्धकारदलनः परिपूरिताशः ।
ज्योत्स्नाप्रवाह इव दर्शितशुद्धपक्षः प्रावर्तत क्षितितले क्षितिपालवंशः ॥
अभवदतुलकान्तिस्तत्र मुक्तामणीनां
गण इव यदुवंशो दुग्धसिन्धूयमाने ।
अधिगतहरिनीलप्रोल्लसन्नायकश्री-
रशिथिलगुणसङ्गो भूषणं यो भुवोऽभूत् ॥
उद्धृत्तदैत्यकुलकन्दलशान्तिहेतु-
स्तत्रावतारमकरोत्पुरुषः पुराणः ।

---

१. इदं दानपत्रं नागपुरसमीपवर्ति'वर्धा'नगराद्दशमीलदूरे नैर्ऋत्यकोणीयदेवलीग्रामस्थकूपे समुपलब्धम्, इति R. G. Bhândârkar, M. A., Ph. D., C. I. E. महाशयवराः प्रकाशितवन्तः. शकसंवत् ८६२ (A. D. 940-41)

तद्वंशजा जगति सात्यकिवर्गभाज-
स्तुङ्गा इति क्षितिभुजः प्रथिता बभूवुः ॥
क्षितितलतिलकस्तदन्वये च क्षतरिपुदन्तिघटोऽजनिष्ट रट्टः ।
तमनु च सुतराष्ट्रकूटनाम्ना भुवि विदितोऽजनि राष्ट्रकूटवंशः ॥
तस्मादरातिवनिताकुचचारुहार-
नीहारभानुरुदगादिह **दन्तिदुर्गः** ।
एकं चकार चतुरब्ध्युपकण्ठसीम-
क्षेत्रं य एतदसिलाङ्गलभिन्नदुर्गः ॥
तस्मादपालयदिमां वसुधां पितृव्यः
श्रीकृष्णराजनृपतिः शरदभ्रशुभ्रैः ।
यत्कारितेश्वरगृहैर्वसुमत्यनेक-
कैलासशैलनिचितेव चिरं विभाति ॥
गोविन्दराज इति तस्य बभूव नाम्ना
सूनुः स भोगभरभङ्गुरराज्यचिन्तः
आत्मानुजे निरुपमे विनिवेश्य सम्य-
क्साम्राज्यमीश्वरपदं शिथिलीचकार ॥
श्वेतातपत्रत्रितयेन्दुबिम्बलीलोदयाद्रेः **कलिवल्लभाख्यात्** ।
ततः कृतारातिमदेभभङ्गो जातो **जगत्तुङ्गमृगाधिराजः** ॥
तत्सूनुरानतनृपो **नृपतुङ्गदेवः**
सोऽभूत्स्वसैन्यभरभङ्गुरिताहिराजः ।
यो मान्यखेटममरेन्द्रपुरोपहासि
गीर्वाणगर्वमिव खर्वयितुं व्यधत्त ॥
तस्योत्तर्जितगूर्जरो हृतहटल्लासोद्भटश्रीमदो
गौडानां विनयव्रतार्पणगुरुः सामुद्रनिद्राहरः ।
द्वारस्थाङ्गकलिङ्गगाङ्गमगधैरभ्यर्चिताज्ञश्चिरं
सूनुः सूनृतवाग्भुवः परिवृढः **श्रीकृष्णराजो**ऽभवत् ॥

अभूज्जगत्तुङ्ग इति प्रसिद्धस्तदङ्गजः स्त्रीनयनामृतांशुः।
अलब्धराज्यः स दिवं विनिन्ये दिव्याङ्गनाप्रार्थनयेव धात्रा॥

तन्नन्दनः क्षितिमपालयदिन्द्रराजो
यद्रूपसंभवपराभवभीरुणेव।
मानात्पुरैव मदनेन पिनाकपाणि-
कोपाग्निना निजतनुः क्रियते स्म भस्म॥

तस्मा**दमोघवर्षो** रौद्रधनुर्भङ्गजनितबलमहिमा।
राम इव रामणीयकमहानिधिर्दशरथाज्जातः॥

क्षिप्रं दिवं पितुरिव प्रणयाद्गतस्य
तस्यानुजो मनुजलोकललामभूतः।
राज्यं दधे मदनसौख्यविलासकन्दो
गोविन्दराज इति विश्रुतनामधेयः॥

सोऽप्यङ्गनानयनपाशनिरुद्धबुद्धि-
रुन्मार्गसङ्गविमुखीकृतसर्वसत्त्वः।
दोषप्रकोपविषमप्रकृतिश्लथाङ्गः
प्रापत्क्षयं सहजतेजसि जातजाड्ये॥

सामन्तैरथ रट्टराज्यमहिमालम्बार्थमभ्यर्थितो
देवेनापि पिनाकिना हरिकुलोल्लासैषिणा प्रेरितः।
अध्यास्त प्रथमो विवेकिषु **जगत्तुङ्गा**त्मजोऽमोघवा-
क्पेयूषाब्धि**रमोघवर्ष**नृपतिः श्रीवीरसिंहासनम्॥

श्री**कृष्णराजदेव**स्तस्मात्परमेश्वरादजनि सूनुः।
यः शक्तिधरः स्वामी कुमारभावेऽप्यभूद्भुवने॥

श्रीरट्टराज्यपुरवररक्षापरिखां मदेन यस्याज्ञाम्।
विपुलां विलङ्घयन्तः स्वयमलपन्द्रोहिणोऽधस्तात्॥

येन मधुकैटभाविव पुनरुन्मग्नौ जनोपमर्दाय।
श्रीवल्लभेन निहतौ भुवि दन्तिगवप्पुकौ दुष्टौ॥

रथ्यामल्लविषद्रुममुदस्य निहतेन योऽकृत सनाथाम्।
भूतार्थपुण्यतरुणा वाटीमिव गाङ्गपाटीं च॥
परिमलिताणिणगपल्लवविपत्तिरासीन्न विस्मयस्थानम्।
विस्फुरति यत्प्रतापे शोषितविद्वेषिगाङ्गौघे॥
यस्य परुषेक्षिताखिलदक्षिणदिग्दुर्गविजयमाकर्ण्य।
गलिता गूर्जरहृदयात्कालंजरचित्रकूटाशा॥
अनमन्नापूर्वापरजलनिधिहिमशैलसिंहलद्वीपात्।
यं जनकाज्ञावशमपि मण्डलिनश्चण्डदण्डभयात्॥
स्निग्धश्यामरुचा प्रलम्बभुजया पीनायतोरस्कया
मूर्त्या कीर्तिलताहितामृतजलैर्वृत्तैश्च सत्त्वोद्भवैः।
ज्ञात्वा यं पुरुषोत्तमं भरसहं विश्वंभराभ्युद्धृतौ
शान्ते धाम्नि लयं गतः प्रशमिनामाद्य कृतार्थः पिता॥
वृत्ते नृत्तसुराङ्गने[१] सरभसं दिव्यर्षिदत्ताशिषि
श्रीकान्तस्य नितान्ततोषितहरे राज्याभिषेकोत्सवे।
यस्याबद्धकरग्रहोद्यमभवत्कम्पानुरागोदया-
द्दिक्कन्याः स्वसमर्पणार्थमभवल्लमानुकूल्यप्रियाः॥

स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमद**मोघवर्ष**देवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमद**कालवर्षपृथ्वीवल्लभ**श्रीमद्**वल्लभनरेन्द्रदेवः** कुशली सर्वानेव स्वजानपदान्समाज्ञापयति—अस्तु वः संविदितम्—यथा श्रीमान्यखेटराजधानीस्थितेन शकनृपकालातीतसंवत्सरशतेष्वष्टासु द्विषष्ट्यधिकेषु ८६२ शार्वरीसंवत्सरान्तर्गतवैशाखबहुलपञ्चम्यां मम प्राणेभ्योऽपि प्रियतमस्य कनीयसो भ्रातुः श्रीम**ज्जगत्तुङ्ग**देवस्य पुण्ययशोभिवृद्धये। अपि च।

ज्येष्ठे भ्रातरि कुर्वता निरुपमां भक्तिं जितो लक्ष्मणः
सौन्दर्येण मनोभवः सुचरिते रामस्य धर्मात्मजाः।

---

१. 'णे' इति भवितव्यम्.

कान्त्या शीतिरुचिश्च येन सततं शौर्येण सिंहो जग-
त्तुङ्गस्योस्त्वभिवाञ्छितप्रदमिदं तस्येति दानं भुवः ॥

अनेनाभिसंधिना मया नन्दिवर्धनविनिर्गतभारद्वाजसगोत्रवाजिकाण्वशाखासब्रह्मचारि भाइल्लसुतवेदवेदां पारगरिषियप्याय नागपुरनन्दिवर्धनान्तर्गततालपुरुषकनामा ग्रामः सोद्रङ्गः सपरिकरः सधान्यहिरण्यादेयः सदण्डदोषदशापराधः सर्वोत्पत्तिसहितः पूर्वप्रसिद्धचतुःसीमपर्यन्तः ब्रह्मदायन्यायेनाचन्द्रार्कं नमस्यो दत्तः । यस्य पूर्वतः मादाटढिंढरनामा ग्रामः, दक्षिणतः कह्ननानदी, पश्चिमतः मोहमग्रामः, उत्तरतः बध्रीरग्रामः, एवं चतुराघाटविशुद्धं तालापुरुषकं रिषियपप्यस्य कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्याघातः कार्यः। यश्च व्याघातं करोति स पञ्चभिरपि महापातकैः संयुक्तः स्यात् । अन्यच्च ।

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥

चेवानन्वेरस्य भ्रात्रा योग्राष्ठचेन लिखितमिति ॥

(एपिग्राफिआ इण्डिका—५।१९२-१९६)

---

(१५७)

अमरनाथमन्दिरस्तम्भोत्कीर्णशासनद्वयम्[1] ।

अस्ति श्रीधान्यकटकं पुरं सुरपुराद्वरम् ।
यत्रामरेश्वरः शंभुरमरेश्वरपूजितः ॥
बुद्धो देवः सुसान्निध्यो यत्र धात्रा प्रपूजितः ।
चैत्यमत्युन्नतं यत्र नानाचित्रसुचित्रितम् ॥

---

१. इदं लेखद्वयं कृष्णाप्रान्ते सट्टनपल्लीताल्लुकायाममरावतीनगर्याममरेश्वरमन्दिरमध्यभागस्य दक्षिणद्वारस्थितस्तम्भपार्श्वचतुष्के समुल्लिखितं समुपलभ्यते.

अस्ति तत्र स्थिरैश्वर्यं राज्ञामाज्ञावतां कुलम् ।
अमरेश्वरदेवेन रक्षितं रक्षकं नृणाम् ॥
जातं सुरेन्द्रदैत्येन्द्रमुनीन्द्रगणवन्दितात् ।
श्रेयसां भूयसां दातुर्धातुर्यच्चरणद्वयात् ॥
क्षोणीक्षेमंकरा भूपा यत्र शत्रुभयंकराः ।
शंकराः साधुवृत्तानां शंकरस्य तु किंकराः ॥
तत्रामरेशसंकाशो भीमो नाम नृपोऽभवत् ।
विश्वे विश्वंभराधीशा यत्पादाम्बुजषट्पदाः ॥
उर्वीपतिषु सर्वेषु सदृक्षो यस्य नेक्षितः ।
प्रजानां पालने सम्यग्द्विषामुन्मूलने तथा ॥
चक्रे पवित्रचारित्रो भक्त्या शक्त्या च भव्यया ।
यः सुरेशान्नरेशांश्च वरदान्करदानपि ॥
यो भूरिभक्तिसुप्रीतः शर्वः सर्वमनोरथान् ।
कृतवान्मित्रसंघस्य कृतवाञ्छत्रुसंहतेः ॥
विस्मापितजना यस्य विस्मारितरणान्तराः ।
वीरपूरितजम्भारिपुरा रणपरम्परा ॥
यस्य क्ष्माचक्रशक्रस्य चक्रिचक्रसमौजसा ।
चक्रेण विक्रम्य दिशां चक्रं चक्रे भृशं वशम् ॥
क्षिप्रं विपक्षवक्षांसि पाटयन्तोऽतिपाटवात् ।
नृसिंहनखरेभ्योऽपि प्रखरा यच्छरा बभुः ॥
कान्त्या पूर्णा रणे तूर्णं यद्धनुःप्रेरितैः शितैः ।
अर्धचन्द्रैर्व्यलक्ष्यन्त वक्रचन्द्रा विरोधिनाम् ॥
महामहीध्रानारोहन्यद्रणे विद्रुता द्विषः ।
तीक्ष्णैः क्षुण्णाः पुनः शस्त्रैर्वा भयातिशयादिव ॥
यद्भटोद्भटदोर्दण्डचण्डायुधविखण्डिताः ।
अखण्डविक्रमाः शाक्रमाक्रामन्नरयः पुरम् ॥

पांसुव्राते समुद्भूते यद्धयैः समरोद्धतैः।
व्योमव्यापिनि सक्लेशं सस्रुः सप्ताश्वसप्तयः॥
नमयन्तो भुवं भीमाः पदन्यासेन यद्गजाः।
द्विड्गजानां रणे चक्रुर्दिग्गजानां च पीडनम्॥
चलयद्भी रणारम्भेष्वचलामचलैः सह।
यद्बलैः शत्रुशौर्याणां चालनं लीलया कृतम्॥
प्राकारैः पातितैः सम्यक्परिखाः परिपूर्य यः।
प्रध्वंसं रिपुदुर्गाणां प्रागभावसमं व्यधात्॥
दूरस्था अपि वीरस्य यस्य भ्राजिष्णुतेजसः।
आज्ञां कुर्वन्ति सर्वे स्म भूभृतः प्राभृतप्रदाः॥
येन धर्मप्रधानेन कारुण्योपेतचेतसा।
पुत्रा इव परित्राताः शत्रवः शरणागताः॥
चरित्रेण पवित्रेण विद्यया निरवद्यया।
भूषितास्तोषिता येन भूसुरा भासुरान्वयाः॥
विवेकेनारिषड्वर्गमरिवर्गं भुजौजसा।
जित्वार्जितचतुर्वर्गो नृपवर्गे रराज यः॥
तस्य प्रशस्यचारित्रख्यातः केतनृपः सुतः।
पटुर्दीनार्तिहरणे रणे वितरणे च यः॥
युद्धे यद्धेतिभिन्नारिकिरीटमणिभिः श्रिता।
घनाहतोत्तप्तलोहस्फुलिङ्गैरिव भूरभात्॥
बहुशोऽभिमुखप्राप्तं स्फुटाभ्यागमपर्वसु।
राजमण्डलमग्रासि सम्यग्यद्बाहुराहुणा॥
सर्वसर्वंसहाधीशगर्वपर्वतपाटने।
पटुः प्रथीयान्प्रथितो यत्प्रतापपविर्भुवि॥
तस्यासीद्भीमभूर्भर्तुस्तनयो विनयोन्नतः।
यः शोभाः शत्रुभूपानां भानां भानुरिवाहरत्॥

दूरपाता दृढाघाता भीषणा रुक्मभूषणाः ।
अमोघा यस्य बाणौघा रेजिरे समराजिरे ॥
विक्रमादक्रियन्तौच्चैर्येन नानाधराधराः ।
त्रस्तशत्रुधरत्रीशकुलाकुलगुहागृहाः ॥
कृता पुण्यवता येन सर्वसंपत्समन्विताः ।
विबुधा भूमिविबुधा विबुधा इव विष्णुना ॥
तद्भार्या **सब्बमा**देवी ख्याताभूद्भुवि वीरसूः ।
वंश्याः शौर्योन्नता यस्याः पित्रोः श्वशुरयोरपि ॥
तस्मात्ताभ्यां समुद्भूतः केशभूपः प्रतापवान् ।
सद्गुणैरुपमानानां योऽकार्षीदुपमेयताम् ॥
नेता सम्यक्प्रजानां यो जेता युद्धेषु विद्विषाम् ।
दातार्थिभ्योऽर्थितार्थानां त्राता च शरणार्थिनाम् ॥
यः प्रह्वीकृतभूपालो भूपालनयपण्डितः ।
पण्डितस्तुतसद्वृत्तः सद्वृत्तजनवत्सलः ॥
येन ध्वस्तविभूतीनामरातीनामभून्मुखम् ।
अन्तः संतापसप्तार्चिर्धूमेनेव मलीमसम् ॥
बाणैः किरणदेशीयैर्ध्वान्तदेश्यान्रिपुद्विपान् ।
तिग्मांशुकल्पा भिन्दन्ति यद्भटाः समरोद्भटाः ॥
चित्तस्थशिवमौलीन्दुसुधार्द्रा इव यद्गिरः ।
मधुरा नित्यमानन्दममन्दं तन्वते सताम् ॥
प्रतिग्रामं प्रतिपुरं प्रत्योकः प्रतिचत्वरम् ।
प्रतितीर्थं प्रतिसभं यस्यौदार्यं प्रशस्यते ॥
चित्रैः सत्रालयैर्यस्य पृथिव्यां प्रथितं यशः ।
बुभुक्षुभिक्षुसंघातप्रभूतप्रीतिहेतुभिः ॥
अनन्तप्राणिसुप्रीतिकारिभिर्भूरिवारिभिः ।
तडागैः सागराभोगैर्यो विभूषितभूतलः ॥

आरामान्योऽतनोत्सारान्सरोभिः शोभितान्तरान्।
उत्फुल्लकंजकिंजल्कपुञ्जपिञ्जरितान्तरैः ॥
देवालयैः सुधाशुभ्रैः सुवर्णकलशाङ्कितैः।
पताकाचुम्बिताम्भोदैर्यद्धर्मो नीत उन्नतिम् ॥
शाकाब्दे युगखेन्दुरूपगणिते माघे दशम्यां तिथौ
शुक्लायां गुरुवासरे गुणनिधिः संप्राप्तराज्योन्नतिः।
श्रीमत्केतनृपः समस्तगुरवे ग्रामान्वरेण्यान्बहू-
न्संप्रादात्सुगतेश्वराय विपुलश्रीधर्मसंवृद्धये ॥

स्वस्ति चतुःसमुद्रमुद्रितनिखिलवसुंधरापरिपालक-श्रीमत्त्रिण(न)यनपल्लव-प्रसादासादितकृष्णवेण्णानदीदक्षिणषट्सहस्रावनीवल्लभ-भयलोभदुर्लभ-चोडचालुक्यसामन्तमदानेकपमृगेन्द्र-विभवामरेन्द्र श्रीमदमरेश्वरदेवदिव्यश्रीपादपद्माराधक-परबलसाधक-श्रीधान्यकटकपुरवराधीश्वर-प्रतापलङ्केश्वर-कलिगळमोगदकै वेड्डरिगोवकै गण्डरगण्ड गण्डभरेण्डु जगमेच्चुगण्ड नन्निमार्तण्ड नामादिसमस्तप्रशस्तिसहितं श्रीमन्महामण्डलेश्वर-कोटकेतुराजलु शकवर्षमुलु ११०४ गुनेंटि माघ शुद्ध १० गुरुवारमुन श्रीमद्बुद्धदेवरकु सुंकमुलोनुगा सर्वायमुलतोनाचन्द्रार्क मुगानिच्चिन ऊड्लु कंडूवाडिलोनि मेड्डकोण्डूरनु डोकिपनु ॥ ई धर्मम नडपनिवारु पञ्चमहापातकमुलु सेसिनवारु वारणासि व्रच्चिनवारु तम पेद्द कोड्डकु कपालमुनं गुडिच्चिनवारु ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
वेदाशेन्दुमिते शाके माघे शुक्ले गुरोर्दिने।
दशम्यां केतभूपालो दीपौ बुद्धाय दत्तवान् ॥

स्वस्ति समस्तप्रशस्तिसहितं श्रीमन्महामण्डलेश्वरकोटकेतराजलु शकवर्षमुलु ११०४ गुनेंटि माघ शुद्ध १० गुरुवारमुनं दमकु धर्माथमुगा श्रीमद्बुद्धदेवरकुनखण्डवर्त्तिदीपमुलु रेंटिकिनै इच्चिन इन्वण्डलु ११०।

वीनिलोन दामकअमरेवोयुंडु रोंभदेनु गोळियलं जेकोनि आचन्द्रार्कमुगां दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयंगलवांडु ॥ ऊट्टकूरि केतेवोयुंडु रोंभदेनु गोळियलं जेकोनि आचन्द्रार्कमुगां दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयंगलवांडु ॥ भोगस्त्रीललोनं गसविसूरमदेवुलु दनकु धर्मार्थमुगा श्रीमद्बुद्धदेवरकुनखण्डवर्त्तिदीपमुनकिच्चिन इन्पेण्टलु ९९। वीनिं जेकोनि सब्बकमारेवोयुंडु आचन्द्रार्कमुगां दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयंगलवांडु ॥ भंडार्वु प्रोलमदेवुलु दनकु धर्मार्थमुगा श्रीमद्बुद्धदेवरकुनखण्डवर्त्तिदीपमुनकिच्चिन इन्पेण्टलु ९९। वीनिं जेकोनि चेबळि कोम्मनवोनि कोड्कु माचेनवोयुंडु आचन्द्रार्कमुगां दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयंगलवांडु ॥ श्री श्री श्री ।

शाकाब्दे वार्धितारापथशशिवसुधासंमिते माघमासे
　शुक्ले पक्षे दशम्यां त्रिदिवपरिवृढाचार्यवारे वरेण्ये ।
सोऽयं संप्राप्तराज्यः सकलगुणनिधिः केतविश्वंभरेशो
　ग्रामान्विज्ञातसीमान्प्रथितपृथुगुणान्प्राददाद्ब्राह्मणेभ्यः ॥

ग्रामं कोकल्लुनामानं प्रशस्यं सस्यसंपदा ।
विद्वद्भ्यो द्विजवर्येभ्यो जनन्याः श्रेयसेऽददात् ॥
गिंजिपाडुं चल्लगरां ताडिवायं च शोभनान् ।
ग्रामान्द्विजत्रा कृतवान्भूयसे श्रेयसे पितुः ॥
सम्यगम्मलपूंडिं च ग्रामं भूमिगुणान्वितम् ।
विप्रसात्कृतवान्भ्रातुर्ज्यायसे(सः) श्रेयसे मुदा ॥

सत्तेनपल्लिं प्रादिशदुप्पुलपाडुं च चिन्तपल्लिं च तथा ।
ओंकदोनकुंटिमद्दी धर्मार्थं स्वस्य स द्विजेभ्यो ग्रामान् ॥

व्रीहिव्रातैः सुजातैरलघुफलभरैः शालिसस्यैः प्रशस्यै-
　रुद्गाढैः सुप्ररूढैस्तिलयवचणकैर्मुद्गमाषैः सयोषैः ।
धान्यैश्चान्यैः समृद्धा दिशि दिशि लसिताः शोभनैः शाकवाटैः
　शोभन्तां श्रीसमेताः सकलजनदृशामुत्सवाः शश्वदेते ॥

स्वस्ति समस्तप्रशस्तिसहितं श्रीमन्महामण्डलेश्वरकोटकेतराजुल्लतम तल्लि सब्बमदेवुलकुं गोंडनातवाडिलोनिच्चिन यूरु कोकल्लु दीनि पेरु सर्वाम्बिकापुरमु । तम तंडि भीमराजुनकु धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुलकुं गोंडनातवाडिलोनिच्चिन यूरु कोकल्लु दीनि पेरु सब्बाम्बिकापुरमु । तम तंड्रि भीम राजुनकु धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुलकुं गोंडनातवाडिलोनिच्चिन युड्लु गिंजिपाड्डु चल्लगरा ताडिवाय इवि भीमावुरमुल्लु । तमन्न चोडेराजुनकुं धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुलकुं गोंड्डुनातवाडिलोनिच्चिन यूरु अम्मलपूंडि दीनि पेरु चोडावुरमु । तनकु धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुलकुं गोंडनातवाडिलोनिच्चिन यूड्लु कुंटिमद्दि उप्पलपाड्डु कोंडपड्डुमटिलो सत्तेनपल्लि चित्तपल्ली केतपल्लि ए ౮ౢ गुंटलु दोड्डिकंडूवाडि अंदु ओंकदोन इवि जगमेच्चुगंडपुरमुल्लु ईयग्रहारमुल्लु सर्वकरपरिहारमुगा मुन्नि चितिमि ॥

(एपिग्राफिआ इण्डिका—६ । १४८-१५५)

---

(१५८)

काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखः[1] ।

गुञ्जापुञ्जाभरणनिचयं चन्द्रकान्तिं किरीटे
गात्रे चक्रं करकमलयोर्युञ्जितं चित्रवस्त्रम् ।
मध्ये पीतं वसनमपरं किङ्किणीवस्त्रवेणीं
नासां मुक्तां विदधति मुदे तेऽस्तु गोवर्धनेन्द्रः ॥
आदौ जलमयं विश्वं तत्र नारायणः स्थितः ।
हिरण्यहारी तन्नाभौ पद्मकोष इहाभवत् ॥
ब्रह्मा चतुर्मुखस्तस्य मरीचिः कश्यपोऽस्य तु ।
सुतो विवस्वांस्तस्यासीन्मनुरिक्ष्वाकुरस्य सः ॥

---

१. अयं लेखो मेवाडप्रान्ते राजनगरनिटके काङ्करोलीग्रामे राजसागरनामकतडागस्योपर्युत्कीर्णो वर्तते, इति भावनगरप्राचीनशोधसंग्रहितारः. A. D. 1676. वि० सं० १७३२.

विकुक्षिः स शशादान्यनामा तस्य पुरंजयः ।
ककुत्थापरनामा यमस्यानेनास्ततः पृथुः ॥
ततोऽभूद्विश्वरन्धिस्तु ततश्चन्द्रस्ततोऽभवत् ।
युवनाश्वोऽस्य शावस्तो बृहदश्वोऽस्य चात्मजः ॥
ततः कुवलयाश्वोऽभूद्धुधुमारापराभिधः ।
दृढाश्वोऽस्यास्य हर्यश्वो निकुम्भस्तस्य वा ततः ॥
बर्हणाश्वः कृशाश्वोऽस्य सेनजित्तस्य वा ततः ।
युवनाश्वोऽस्य मान्धाता त्रसदस्युपराभिधः ॥
चक्रवर्त्यस्य तनयः पुरुकुत्सोऽस्य वा सुतः ।
त्रसदस्युर्द्वितीयोऽस्मादनरण्यस्ततोऽभवत् ॥
हर्यश्वोऽस्यारुणस्तस्य त्रिबन्धननृपस्ततः ।
सत्यव्रतस्त्रिशङ्कुस्तु तस्य नामान्तरं ततः ॥
हरिश्चन्द्रो रोहितोऽस्य तस्य वा हरितस्ततः ।
वपस्तस्य सुदेवोऽस्माद्विजयो भरुकोऽस्य वा ॥
तस्माद्वृको बाहुकोऽस्य तत्पुत्रः सगरः स च ।
चक्रवर्ती सुमत्यां तु पत्न्यां तस्याभवन्सुताः ॥
श्रेष्ठाः षष्टिसहस्रोत्तरसंख्याः सागरकारकाः ।
सगरस्यान्यपत्न्यां तु केशिन्यामसमञ्जसः ॥
ततोंऽशुमान्दिलीपोऽस्मात्तस्माज्जातो भगीरथः ।
ततः श्रुतस्ततो नाभः सिन्धुद्वीपोऽस्य तत्सुतः ॥
अयुतायुस्तस्य जात ऋतुपर्णस्तु तत्सुतः ।
सर्वकामः सुदासोऽस्य तस्मान्मित्रसहः पतिः ॥
यदपत्यः सकल्माषपादान्याख्योऽस्य चाश्मकः ।
मूलकोऽस्माद्दशरथस्तत एडविडस्ततः ॥
जातो विश्वसहस्तस्मात्खट्वाङ्गश्चक्रवर्त्यतः ।
दीर्घबाहुर्दिलीपोऽस्य रघुरस्याज इत्यतः ॥

जातो दशरथस्तस्य कौशल्यायां सुतोऽभवत् ।
श्रीरामचन्द्रः कैकेय्यां भरतो रामभक्तिमान् ॥
सुमित्रायां लक्ष्मणश्च शत्रुघ्नश्चेति रामतः ।
श्रीसीतायां कुशो जातो लवश्चेति कुशादभूत् ॥
कुमुद्वत्यामतिथिको निषधोऽस्य ततो नलः ।
नभोऽस्य पुण्डरीकोऽस्य क्षेमधन्वा ततोऽभवत् ॥
देवानीकस्ततोऽहीनः पारियात्रोऽस्य तत्सुतः ।
वलस्तस्य स्थलस्तस्माद्वज्रनाभस्ततोऽभवत् ॥
सगणस्तस्य विधृतिः पुत्रस्तस्य सुतोऽभवत् ।
हिरण्यनाभः पुष्योऽस्माद्ध्रुवसिद्धिस्ततोऽभवत् ॥
सुदर्शनोऽस्याग्निवर्णस्तस्य शीघ्रस्ततोऽभवत् ।
ततः प्रसुः श्रुतस्तस्मात्संधिस्तस्मात्तु मर्षणः ॥
ततो महास्वांस्तस्याभूद्विश्वसाह्वः प्रसेनजित् ।
ततस्ततस्तक्षकोऽस्माद्बृहद्बल इति त्वयम् ॥
महाभारतसंग्रामे निहतस्त्वभिमन्युना ।
एते व्यतीता व्यासेन संप्रोक्ता भारते नृपाः ॥
अनागताञ्जगादैवं व्यासस्तत्र वदामि तान् ।
बृहद्बलाद्बृहद्रणस्तस्योरुक्रिय इत्यतः ॥
वत्सवृद्धः प्रतिव्योमस्तस्यास्माद्भानुरस्य वा ।
दिवाकस्तस्य पदवी वाहिनीपतिरित्यभूत् ॥
तस्यासीत्सहदेवोऽस्य बृहदश्वस्ततोऽभवत् ।
भानुमान्वा प्रत्यकाश्वोऽस्य तस्मात्सुप्रतीकक ॥
ततोऽभून्मरुदेवोऽस्मात्सुनक्षत्रोऽस्य पुष्करः ।
ततोऽन्तरीक्षः सुतपास्तस्मान्मित्रजिदस्य तु ॥
बृहद्राजस्ततो बर्हिस्तस्मात्तस्य कृतञ्जयः ।
तस्माद्रणंजयस्तस्य संजयः शाक्य इत्यतः ॥

शुद्धोदोऽस्माल्लाङ्गलोऽस्य प्रसेनजिदयस्ततः ।
क्षुद्रकस्तस्य रुणकस्तस्यासीत्सुरथस्ततः ॥
सुमित्रस्तु सुमित्रान्त इक्ष्वाकोरन्वयोऽभवत् ।
उक्ता भागवतस्कन्धे नवमे ते मयोदिताः ॥
द्वाविंशत्यभ्रशतकमेषां संख्या कृता बदे ।
प्रसिद्धात्सूर्यवंशस्याद्वज्रनाभोऽभवत्ततः ॥
महारथीति राजेन्द्रस्तस्माद**तिरथी** नृपः ।
तस्माद**चलसेन**स्तु सेनास्य त्वप्रहारणे ॥
तस्मात्**कनकसेनो**ऽस्य **महासेनो**ऽङ्ग इत्यतः ।
तस्माद्**विजयसेनो**ऽस्या**जयसेन**स्ततोऽभवत् ॥
अभङ्गसेनस्तस्मात्तु **मदसेन**स्ततोऽभवत् ।
भूपः **सिंहरथ**स्त्वेते अयोध्यावासिनो नृपाः ॥
तस्माद्**विजयभूपो**ऽथ **मुक्त्वायोध्यां** रणागतान् ।
जित्वा नृपान्दक्षिणस्थानवसद्दक्षिणक्षितौ ॥
तत्रास्याकाशवाण्यासीन्मुक्त्वा राजाभिधामपि ।
आदित्याख्या तु धर्तव्या भवता भवदालये ॥
जाता **विजयभूपा**न्ता राजानो **मनु**पूर्वकाः ।
वीराः संख्ये जितं तेषां पञ्चत्रिंशयुतं शतम् ॥

आसीदित्यादि द्वितीयः सर्गः । संवत् १७१८ वर्षे माघमासे कृष्णपक्षे सप्तम्यां तिथौ रायसमुद्र मुहरत राणे राजसिंह कीधो संवत् १७३२ वर्षे माघमासे शुक्लपक्षे १५ तिथौ राजसमुद्रप्रतिष्ठा कारापिता गजधरमुख्यः । राम । श्रीकल्याणमस्तु ॥

(भावनगरप्राचीनलेखसंग्रहः—१ । ७५-७८)

---

(१५९)

काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखश्चतुर्थः।

उल्लोलीभवदुन्नताच्छसुरभीपुच्छच्छटाचामरः
सद्गोवर्धनधन्यगोत्रविलसच्छत्रो जितेन्द्रो बली।
गोपालैः कलितश्च गोपतनयैर्गोपीप्रियः प्रेमवा-
न्पायाद्गोधनभक्तरक्षणपरः सच्चक्रवर्ती हरिः॥

ततो **विजयभूपस्य पद्मादित्यो**ऽभवत्सुतः।
शिवादित्योऽस्य पुत्रोऽभूद्**धरदत्तो**ऽस्य वा सुतः॥
सुजसादित्यनामास्मात्**सुमुखादित्य**कस्ततः।
सोमदत्तस्तस्य पुत्रः **शिलादित्यो**ऽस्य चात्मजः॥
केशवादित्य एतस्मान्**नागादित्यो**ऽस्य चात्मजः।
भोगादित्योऽस्य पुत्रोऽभू**द्देवादित्य**स्ततोऽभवत्॥
आशादित्यः कालभोजादित्योऽस्मात्तनयोऽस्य तु।
गुहादित्य इहादित्याश्चतुर्दशमितास्ततः॥
गुहादित्यसुताः सर्वे **गहिलोता**भिधा युताः।
जाता युक्तं तेषु पुत्रो ज्येष्ठो **बप्पा**भिधोऽभवत्॥
यं दृष्ट्वा नन्दिनं गौरी दृशो **बाष्पं** पुरासृजत्।
नन्दीगणोऽसौ **बाष्पो**ऽपि प्रियादृग्बाष्पदोऽभवत्॥
हारीतराशिः स मुनिश्च**ण्डः** शंभोर्गणोऽभवत्।
तस्य शिष्योऽभवद्बाष्पस्तस्याज्ञातः प्रसादतः॥
नागह्रदपुरे तिष्ठन्नेकलिङ्गशिवप्रभोः।
चक्रे **बाष्पो**ऽर्चनं चास्मै वरान्रुद्रो ददौ ततः॥
चित्रकूटपतिस्त्वं स्यास्त्वद्वंश्यचरणाद्ध्रुवम्।
मा गच्छताच्चित्रकूटः संततिः स्यादखण्डिता॥
प्राप्येत्यादिवरान्**बाष्प** एकस्मिन्शतके गते।
एकाग्रनवतिसृष्टे माघे पक्षवलक्षके॥

सप्तमीदिवसे बाष्पः स पञ्चदशवत्सरः ।
एकलिङ्गेशहारीतप्रसादाद्भाग्यवानभूत् ॥

नागह्रदाख्ये नगरे विराजी नरेश्वरः खड्गधरेषु धन्यः ।
बलेन देहेन च भोजनेन भीमो रणो भीमसमो रिपूणाम् ॥
पञ्चाधिकत्रिंशदमन्दहस्तप्रमाणयुक्पट्टपटं दधानः ।
बभौ निचोलं किल षोडशोद्यत्करप्रमाणं विमलं वसानः ॥
श्री एकलिङ्गेन मुदा प्रदत्तं हारीतनाम्ने मुनयेऽथ तेन ।
दत्तं दधानः कटकं च हैमं पञ्चाशदुद्यत्पलमानमास्ते ॥
द्वात्रिंशदुद्यत्तमढब्बुकाद्यैः प्रस्थाभिधैः शेरवरैः कृतस्य ।
मणस्य चैकस्य भरं हि चत्वारिंशन्मितैर्बिभ्रदसिं दधानः ॥
एकप्रहारान्म····षौ महासेर्दुर्गार्चनायां जवतो विनिघ्नन् ।
भुञ्जन्महाच्छागचतुष्टयं स अगस्त्यशस्त्यः प्रबभूव **बाष्पः** ॥
ततः स निर्जित्य नृपं तु **मोरी**जातीयभूपं **मनुराज**संज्ञम् ।
गृहीतवांश्चित्रित**चित्रकूटं** चक्रेऽत्र राज्यं नृपचक्रवर्ती ॥
राज्यातिपूर्णत्ववरत्वलक्ष्मीमयत्वशब्दादिमवर्णयुक्ताम् ।
तां **रावला**ख्यां पदवीं दधानो **बाष्पा**भिधानः स रराज राजा ॥
ततः **खुमाणा**भिधरावलोऽस्माद्**गोविन्द**नामाथ **महेन्द्र**नामा ।
आलूनृपोऽस्मादथ **सिंहवर्मा** तस्यात्मजः **शक्तिकुमार**नामा ॥
जातस्ततो रावल**शालिवाहन**स्तस्यात्मजोऽभून्**नरवाहन**स्ततः ।
अम्बाप्रसादोऽस्य च **कीर्त्ति**वर्मकस्तत्पुत्र आसीन्**नरवर्म**नामकः ॥
ततो नृपालो **नरपत्य**भिख्यस्त्वथोत्तमोऽस्मान्**नृपभैरवो**ऽस्मात् ।
श्री**पुञ्जराजो**ऽभवदस्य **कर्णादित्यः** सुतोऽस्यापि च **भावसिंहः** ॥
श्री**गात्रसिंहो**ऽथ स **हंसराजः** सुतोऽस्य सूनुः **शुभयोगराजः** ।
सवैरडाख्योऽथ **सवैरिसिंह**स्ततोऽस्य वा रावल**तेजसिंहः** ॥

ततः **समरसिंहा**ख्यः **पृथ्वीराज**स्य भूपतेः ।
पृथाख्याया भगिन्यास्तु पतिरित्यतिहार्दतः ॥

गोरीसाहिबदीनेन गज्जनीशेन संगरम् ।
कुर्वतोऽखर्वगर्वस्य महासामन्तशोभिनः ॥
दिल्लीश्वरस्य **चोहाननाथ**स्यास्य सहायकृत् ।
स द्वादशसहस्रैः स्ववीराणां सहितो रणे ॥
बद्ध्वा **गोरिपतिं** दैवात्स्वर्यातः सूर्यबिम्बभित् ।
भीखारासापुस्तकेऽस्य युद्धस्योक्तोऽस्ति विस्तरः ॥

तस्यात्मजोऽभून्नृप**कर्ण**रावलः प्रोक्तास्तु षड्विंशतिरावला इमे ।
कर्णात्मजो माहयरावलोऽभवत्स **डूंगरा**द्ये तु **पुरे** नृपो बभौ ॥
कर्णस्य जातस्तनयो द्वितीयः श्री**राहपः** कर्णनृपाज्ञयोग्रः ।
वाक्येन वा शाकुनिकस्य गत्वा **मंडोवरे मोकलसीं** स जित्वा ॥
तातान्तिके त्वानयति स भद्रं **कर्णो**ऽस्य **राणा**बिरुदं गृहीत्वा ।
मुमोच तं चारु ददौ तदीयं **राणा**भिधानं प्रिय**राहपा**य ॥
भव्याशिषा ब्राह्मण**पल्लिवाल**ज्ञातीयविप्रच्छ**रशल्य**नाम्नः ।
श्री**चित्रकूटे** वललब्धराज्यं चक्रे ततो **राहप** एष वीरः ॥

ततो बभौ **चित्रकूटे राहपो** वाहपोषकः ।
पूर्वं **शिशोदनगरे** वासाच्छी**शोदिया** स्मृतः ॥
राणाबिरुदलाभेन **राणे**त्युक्तोऽखिलैर्बभौ ।
वंशेऽस्याग्रे भविष्यन्ति **राणा**बिरुदिनो नृपाः ॥
राजेन्द्रराजीपूज्योऽयं नारायणपरायणः ।
विशेषणादिवर्णाद्यां वीरो **राणा**भिधां दधौ ॥

आसीद्**भास्कर**तस्तु **माधवबुधो**ऽस्माद्**रामचन्द्र**स्ततः
सत्**सर्वेश्वरकः कठोडिकुलजो लक्ष्म्यादिनाच**स्ततः ।
तैलङ्गोऽस्य तु **रामचन्द्र** इति वा **कल्पो**ऽस्य वा **माधवः**
पुत्रोऽभून्**मधुसूदन**स्त्रय इमे ब्रह्मेशविष्णूपमाः ॥
यस्याभून्**मधुसूदन**स्तु जनको **वेणी** च **गोस्वामीजा-**
भून्माता **रणछोड** एष कृतवान्**राजप्रशस्त्या**ह्वयम् ।

काव्यं सान्वयराजसिंहसुगुणश्रीवर्णनाढ्यं मह-
द्धीराङ्कं समभूत्तृतीय इह तत्सर्गः सुसर्गः स्फुटम् ॥

इति श्रीतैलङ्गज्ञातीयकठोडीपतिपण्डितोपनाममधुसूदनभट्टपुत्ररणछोडकृते राजप्रशस्त्याह्वये महाकाव्ये तृतीयः सर्गः ॥ संवत् १७२२ वर्षे माघशुक्ला १९ रायसमुद्रप्रशस्तिः ॥

---

(१६०)

आदिनाथजैनमन्दिरस्थस्तम्भशिलालेखः।

श्रीयशोभद्रसूरिगुरुपादुकाभ्यां नमः।

संवत् १९९७ वर्षे वैशाखमासे शुक्लपक्षे षष्ठयां तिथौ शुक्रवासरे पुनर्वसुऋक्षप्राप्तचन्द्रयोगे श्रीसंडेरगच्छे कलिकालगौतमावतार—समस्तभविकजनमनोम्बुजविबोधनैकदिनकर—सकललब्धिविश्रामयुगप्रधान—जितानेकवादीश्वरवृन्द—प्रणतानेकनरनायकमुकुटकोटिघृष्टपादारविन्द—श्रीसूर्य इव महाप्रसाद—चतुःषष्टिसुरेन्द्रसंगीयमानसाधुवाद—श्रीषण्डेरकीयगणबुधावतंस—सुभद्राकुक्षिसरोवरराजहंस—यशोवीरसाधुकुलाम्बरनभोमणिसकलचारित्रिचक्रवर्तिवक्तृचूडामणि भ० प्रभुश्रीयशोभद्रसूरयस्तत्पट्टे श्रीचाहुमानवंशशृङ्गार—लब्धसमस्तनिरवद्यविद्याजलधिपार—श्रीबदरादेवीदत्तगुरुपदप्रसाद—स्वविमलकुलप्रबोधनैकप्राप्तपरमयशोवाद भ० श्रीशालिसूरिस्त० श्रीसुमतिसूरिस्त० श्रीशान्तिसूरिस्त० श्रीईश्वरसूरिः, एवं यथाक्रममनेकगुणमणिगणरोहणगिरीणां महासूरीणां वंशे पुनः श्रीशालिसूरिस्त० श्रीसुमतिसूरिस्तत्पट्टालंकारहार भ० श्रीशान्तिसूरिवराणां सपरिकराणां विजयराज्ये, अथेह श्रीमेदपाटदेशे श्रीसूर्यवंशीयमहाराजाधिराजश्रीशिलादित्यवंशे श्रीगुहिदत्त—राउलश्रीबप्पाक—श्रीखुमाणादिमहाराजान्वये राणाहमीर—श्रीखेतसिंह—श्रीलखमसिंहपुत्र—श्रीमोकलमृगाङ्कवंशोद्द्योतकारप्रतापमार्तण्डावतार—आसमुद्रमहीमण्डलाखण्डल—अतुलम-

हाबल-**राणाश्रीकुम्भकर्ण**पुत्र-**राणाश्रीरायमल्ल**विजयमानप्राज्यराज्ये तत्पुत्रमहाकुंवरश्री**पृथ्वीराजा**नुशासनाच्छ्रीउकेशवंशे **रायजडारी**गोत्रे **राउलश्रीलाखण**पुत्र मं० **दूद**वंशे मं० **मयूर**सुत मं० **सादूल**स्तत्पुत्राभ्यां मं० सीहासमदाभ्यां सद्बान्धव मं० **कर्मसीधारालाखा**दिसुकुटुम्बयुताभ्यां **श्रीनन्दकुलवत्यां** पुर्यां सं० ९६४ **श्रीयशोभद्रसूरि**मन्त्रशक्तिसमानीतायां त० सायरकारितदेवकुलिकाद्युद्धारित-सायरनाम-श्रीजिनवत्यां श्रीआदीश्वरस्य स्थापना कारिता कृता श्री**शान्तिसूरि**पट्टे **देवसुन्दर**त्यपशिष्यनामभिः आ० श्रीई**श्वरसूरि**भिरिति लघुप्रशस्तिरियं लि० आचार्य श्रीईश्वरसूरिणा उत्कीर्णा सूत्रधार **सोमाकेन** शुभम् ॥

(भावनगरप्राचीनशोधसंग्रहः—१। ९४-९६)

---

(१६१)

निकुम्भवंशीयश्रीमद्गोवनमहीपालानां दानपत्रम्।

आधारो धरणी सुधांशुतरणी ह्लादप्रकाशप्रदा-
वाकाशस्त्ववकाशदोऽथ जगतः पाकप्रदः पावकः।
प्राणो वायुरथायुरम्बु हविषामाप्यायको दायको
यन्मूर्त्यष्टकभावितं जगदिदं पायात्स वः शंकरः॥

अस्तु स्वस्ति समस्तभास्करमहावंशाय यत्राभव-
द्भूभृच्छ्रेष्ठ**निकुम्भ**नामनृपतिर्यस्यान्वये विश्रुतः।
[मान्धा]ता सगरो भगीरथमुखाः किं वर्ण्यमस्मात्परं
यत्र त्रातुमिदं जगज्जगदिनो रामोऽवतीर्णः स्वयम्॥

वंशे तत्र **निकुम्भ**नामनृपतेः **श्रीकृष्णराजो**ऽभव-
द्विख्यातक्षितिपालमौक्तिकमणिश्रेण्यां श्रितः श्रेष्ठताम्।

---

१. इदं दानपत्रं Fleet and Burgess's Pâlî, Sanskrit and old Canarese Inscriptions नामकपुस्तकात्संगृह्य G. Bühler महाशयवरैः प्राकाश्यं नीतम्. शकसंवत् १०७५ (A. D. 1153-54)

जातस्तत्तनयोऽवनेरवनतो यो **गोवनः** कीर्त्यते
तत्पुत्रो नृपदर्पसर्पगरुडो **गोविन्दराजो**ऽजनि ॥
गोविन्दादपि गोवनः पुनरभूद्भूपालचूडामणिः
पुत्रस्तस्य **निकुम्भवंशतिलकः श्रीकृष्णराजो**ऽभवत् ।
यत्सत्कीर्तिसुधां विधूतशिरसः साकूणिताक्षा रसा-
दद्यापीह पिबन्ति कर्णपुटकैर्दिक्षु क्षितौ क्ष्माभृतः ॥
पूर्वं योऽवततार भारमवनेर्हर्तुं सुराराजितं
श्रीवासो वसुदेवदेवकसुताहर्म्ये सुरम्ये हरिः ।
भूयो **गोवन**भूपभव्यभवने भूत्वाथ जित्वा रिपू-
न्कृत्वा पालक**मिन्द्रराज**मवनेः स्वर्गं जगाम स्वयम् ॥

उत्कीर्णचन्द्रफलकस्वगुणप्रशस्तेः
किं वर्ण्यतेऽत्र भुवि **कृष्णनृ**पस्य तस्य ।
किं स्वामिदेवगुरुभक्तिरुदारकीर्ति-
रत्यन्तसत्यमुत शौर्यमथार्यता वा ॥

कृष्ण ब्रूहि यम त्वया यदनिशं दत्तं द्विजेभ्यो धनं
गृह्णीष्व त्वमिदं न देव किमिति प्रत्तं कथं गृह्यते ।
क्रीडायामपि यत्तु दत्तमहरन्नाहं न मद्वंशजा
इत्यार्यत्वसुतोषितो दिवि चकारास्मै स तुङ्गं पदम् ॥

अहितविहितघातः **कृष्णराजा**त्प्रजातः
प्रचुरसुकृतभाजः कीर्तिमा**निन्द्रराज**ः ।
परिवृढदृढभक्तिः संगरेऽचिन्त्यशक्तिः
सुजनकमलभानुर्दुष्टकक्षे कृशानुः ॥

दोर्दर्पोद्धुरकन्धरारिसुमहासामन्तसीमन्तिनी-
नेत्रप्रच्युतवारिपूरविलसद्वंशायते यद्यशः ।
नासीन्नोऽत भविष्यति क्षितिपतिर्दृष्टः श्रुतो वा क्वचि-
त्त्यागे सत्यगुणे रणे सुचरणे यः **श्रीन्द्रराजो**पमः ॥

शत्रुर्मित्रायते कल्पवृक्षायन्ते च दुर्जनाः ।
राज्ये यस्येन्द्रराजस्य कलिः कृतयुगायते ॥

श्रीदेवी **सगरा**न्वयातिदयिता यत्पट्टराज्ञी सती
या राज्ञी वनिताजनस्य निधिनामौदार्यदीक्षागुरुः ।
किं कीर्तिः किमु सुन्दरत्वमथ किं सौभाग्यभाग्योदयः
किं दानं प्रतिपन्नपालनगुणस्तस्यास्तु किं वर्ण्यते ॥

....**कृष्ण**समो रणेऽ**र्जुन**समस्त्यागे स **नागार्जुनो**
देवब्राह्मणसाधुवृन्दकुमुदाह्लादाय चन्द्रोदयः ।
यत्सूनुर्ननु **गोवनो** रणपटुः खड्गस्तु यस्यासक्त-
दृप्तारिद्विपकुम्भपीठलुठनप्रोत्कण्ठकण्ठीरवः ॥

यन्मन्त्री नृपनीतिवित्तविलसल्लक्ष्मीलताकन्दकः
........रासु भासुररणे निर्व्याजशूरो द्विजः ।
विद्वान्सज्जनरञ्जनोऽतिचतुरः श्री**चङ्गदेवा**ह्वयो
येन स्वीयधियेन्द्रराजचरणाक्रान्ताः कृताः शत्रवः ॥

राष्ट्रस्य पुष्टिः सुजनस्य तुष्टिर्धर्मस्य वृद्धिः सकलार्थसिद्धिः ।
नन्दन्ति सन्तः प्रसरन्ति लक्ष्म्यः श्री**चङ्गदेवे** सति सत्प्रधाने ॥

वाचस्पतिः किमुशना नरवेषपट्टः
किं वा निधिर्नृपतिसद्मनि पद्मनामा ।
चिन्तामणिर्नु सुकृतादवतीर्ण इत्वं
यं तर्कयन्ति सुजनाः प्रचुरप्रभावम् ॥

वर्षाणां पञ्चसप्तत्या सहस्रे(१०७५) स्वविके गते ।
शकभूपालकालस्य तथा श्रीमुखवत्सरे ॥

अतिसुरसमसारासारसंसारतुङ्ग-
क्षितिह फलमवाप्तं पुण्यरूपं तदेदम् ।
मदनदहनहर्म्यं कारयामास तुङ्गं
स गुणगणनिधानश्रीन्द्रराजाभिधानः ॥

हे भूपा भुवि भाविनोऽञ्जलिपुटं बद्धेन्द्रराजो भृशं
याचे किंचिदहं नृजीवितमरे कल्लोललोलं यतः ।
राज्यं तन्नलिनीदलाम्बुतरलं तस्मात्स्वधर्मं ध्रुवं
सत्यं न त्यजत स्वदत्तमपरैर्दत्तं च तत्पाल्यताम् ॥
देवसंगमनामानं ग्रामं देवाय **गोवनः** ।
श्रीदेव्यनुमते प्रादात्प्रतिष्ठामकरोद्यदा ॥

(इण्डियन् आण्टिक्केरी—८ । ३९–४१)

---

(१६२)

प्रशान्तरागापरनामधेयश्रीमद्दमहाराजानां तृतीयं दानपत्रम्[१] ।

(A. D. 479)

ॐ स्वस्ति विजयविक्षेपाद्भरुकच्छप्रद्वारावासकात्सकलघनपटलविनिर्गतरजनिकरकरावबोधितकुमुदधवलयशःप्रतापस्थगितनभोमण्डलोऽनेकसमरसंकटप्रमुखागतनिहतशत्रुसामन्तकुलवधूप्रभातसमयरुदितफलोद्गीयमानविमलनिस्त्रिंशप्रतापः, देवद्विजातिगुरुचरणकमलप्रणामोद्घृष्टवज्रमणिकोटिरुचिरदीधितिविराजितमुकुटोद्भासितशिराः, दिनानाथातुराभ्यागतार्थिजनक्लिष्टपरिपूरितविभवमनोरथोपचीयमानत्रिविष्टपैकसहायधर्मसंचयः, प्रणयपरिकुपितमानिनीजनप्रणामपूर्वमधुरवचनोपपादितप्रसादप्रकाशीकृतविदग्धनागरकस्वभावः, विमलगुणपञ्जरक्षिप्तबहलकलितिमिरनिचय**श्रीमद्दः**, तस्य सूनुः समदप्रतिद्वन्द्विगजघटाभेदिनिस्त्रिंशविक्रमप्रकटितमृगपतिकिशोरवीर्यावलेपः, पयोनिधीकृतोभयतटप्ररूढवनलेखविहतनिरङ्कुशदानप्रवाहप्रवृत्तदिग्दन्तिविभ्रमसमूहः, स्फटिककर्पूरपिण्डपाण्डुरयशश्चन्दनचर्चिताङ्गसमुन्नतगगनलक्ष्मीपयोधरोत्सङ्गः, **श्रीजयभट्टः**, तस्यात्मजः प्रतिहतसकल-

---

१. इदं च दानपत्रं Indian Antiquary Vol. V. P. 110त उद्धृत्य G. Bühler पण्डितवरेण प्राकाश्यं नीतम्.

जगद्व्यापिदोषाधिकारविजृम्भितसंततलमोवृद्धिः, अधिकगुरुस्नेहसंपत्कविमल-दिशोद्भासितजीवलोकः, परमबोधसमनुगतः विपुलगुर्जरनृपान्वयप्रदीपतामुपगतः, समधिगतपञ्चमहाशब्दमहाराजाधिराजश्रीमद्दद्दः कुशली सर्वानेव राष्ट्रपतिविषयपतिग्रामकूटायुक्तकनियुक्तकाधिकमहत्तरादीन्समाज्ञापयति—अस्तु वो विदितं यथा मया मातापित्रोरात्मनश्चैवामुष्मिकपुण्ययशोभिवृद्धये **कान्यकुब्ज**वास्तव्यतच्चातुर्विद्यसामान्यवशिष्ठसगोत्रबह्वृचसब्रह्मचारि**भट्टमहीधर**स्तस्य सूनु**र्भट्टमाधवाय** बलिचरुवैश्वदेवाग्निहोत्रपञ्चमहायज्ञादिक्रियोत्सर्पणार्थं **कमनीयषोडशशतमुक्त**यन्तःपाति**निगुड**ग्रामः। अस्याघाटस्थानानि—पूर्वस्यां दिशि **वघौरि**ग्रामः, दक्षिणस्यां दिशि **फलहवद्र**हग्रामः, प्रतीच्यां दिशि **विह्राण**ग्रामः, उत्तरस्यां दिशि **दहिथलि**ग्रामः, एवमयं स्वचतुराघाटनविशुद्धो ग्रामः सोद्रङ्गः सपरिकरः सधान्यहिरण्यादेयः सोत्पद्यमानविष्टिकः समस्तराजकीयानामप्रवेश्यः आचन्द्रार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यः पूर्वप्रत्तदेवब्रह्मदायवर्जमाभ्यन्तरसिद्ध्या शकनृपकालातीतसंवत्सरशतचतुष्टये (४००=A. D. 479) वैशाखपौर्णमास्यामुदकातिसर्गेण प्रतिपादितः यतोऽस्योचितया ब्रह्मदायस्थित्या कृषतः कर्षयतो भुञ्जतो भोजयतः प्रतिदिशतो वा नव्यासेधः प्रवर्तितव्यस्तथागामिभिरपि नृपतिभिरस्मद्वंश्यैरन्यैर्वा सामान्यभूमिदानफलमवेत्य बिन्दूल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलय्य स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः पालयितव्यश्च ॥

तथा चोक्तम्—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यश्चाज्ञानतिमिरवृत्तमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिर्महापातकैश्चोपपातकैश्च संयुक्तः स्यादिति । उक्तं च भगवता वेदव्यासेन व्यासेन—

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

यानीह दत्तानि पुरातनानि दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥

लिखितं चैतत्पादानुजीविश्रीबलाधिकृतगिलकसूनुना माधवभट्टेन । स्वहस्तोऽयं मम श्रीवीतरागसूनोः श्रीप्रशान्तरागस्य ॥

(इण्डियन् आण्टिक्केरी—७ । ६३–६४)

---

(१६३)

वलभीप्रभोर्महाराजगुहसेनस्य दानपत्रम्[१] ।

(A. D. 559)

प्रसभप्रणतामित्राणां मैत्राणामतुलबलसंपन्नमण्डलाभोगसंसक्तसंप्रहारशतलब्धप्रतापः प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतमित्रश्रेणीबलावाप्तराज्यश्रीः परममाहेश्वरः श्रीसेनापतिभट्टार्कस्तस्य सुतस्तत्पादरजोरुणावनतपवित्रीकृतशिराः शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिर्दीनानाथकृपणजनोपजीव्यमानविभवः परममाहेश्वरः श्रीसेनापतिधरसेनस्तस्यानुजस्तत्पादाभिप्रणामप्रशस्ततरविमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विहितविनयव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगैकस्वामिना परमस्वामिना स्वयमुपहितराज्याभिषेकः परममाहेश्वरः श्रीमहाराजद्रोणसिंहः सिंह इव तस्यानुजस्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणेषिणामशरणमवबोद्धा शास्त्रार्थतत्त्वानां कल्पतरुरिव सुहृदयप्रणयिनां यथाभिलषितकामफलोपभोगदः परमभट्टारकपादानुध्यातः परमभागवतः श्रीमहाराजध्रुवसेनस्तत्पादाभिप्रणामप्रभविप्रक्षालिताशेषकृष्णः कृष्ण इव निरस्तारातिसेनासंगरः सागर इव विशुद्धाद्रणमहार्हरत्नपूरणः पूर्णचन्द्र इव सर्वजनतादर्शनाभिरामः परममाहेश्वरः श्रीमहाराजगुहसेनः । कुशली सर्वानेक..........................

---

१. इदं च दानपत्रमेकस्मात्पण्डितवरादुपलब्धमिति G. Bühler महाशयवराः

..................................राजस्थानीयामात्ययुक्तकविनियुक्त-द्राङ्गिकचाटभट..........................दीनन्यांश्च यथा संबध्यमानः..........
.................वलभीपुरे पूज्यदुड्डाकारितविहारस्य....क.........................
....प्रत्यायः सर्वहिरण्यादेयः सदशापराधः सह..............र.....श्च.....
..............चरो वर्तेषु चतुर्षु मातापित्रोः पुण्याप्यायननिमित्तमात्मनश्चैहिकामुष्मिकफलावाप्तये..
....तस्य गन्धपुष्पधूपदीपतैलादिक्रियोत्सर्पणार्थं सद्धर्मस्य पुस्तकोपक....
..............नादेशसमत्वागताष्टानिकायाभ्यन्तरार्यभिक्षुसंघस्य चीविरपिण्डपात....................भ....जायविहारस्य च खण्डस्फुटितविशीर्णप्रतिसंस्कारणार्थमाचन्द्रार्कार्णवक्षितिस्थितिसरित्पर्वतसमकालीनः, भूमिच्छिद्रन्यायेन सोदकेन कमण्डलुना विसृष्टो यतोऽस्योचित..........................परिपन्थना वाकार्यागामिनृपतिभिश्चानित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः पालयितव्यश्च । यश्चाछिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैः सोपपातकैः संयुक्तः स्यात् । अपि चात्र श्लोका भवन्ति—

यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते पूर्वदायं हरन्ति ये ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
गवां शतसहस्रस्य हन्तुः प्राप्नोति किल्बिषम् ॥ इति ।

दूतकोऽत्र..................पुत्रविष्णुसिंहेनेति । स्वहस्तो मम श्रीमहाराजगुहसेनस्य । [१]संवत् २४० श्रावणशु०..........

(इण्डियन् आण्टिक्केरी—७ । ६७-६८)

---

१. वलभीसंवत्सरोऽयम् २४०. अत्र ३१९ मितवर्षेषु योजितेषु ५५९ मितः ख्रिस्ताब्दो बोध्यः.

(१६४)

वलभीप्रभोः श्रीधरसेनमहाराजानां द्वितीयं दानपत्रम्।

(A. D. 571)

ॐ स्वस्ति वलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तसप्रहारशतलब्धप्रतापः प्रतापोपनतदानमानार्जवोपवर्जितानुरागानुरक्तमौलिभृतमित्रश्रेणीबलावाप्तराज्यश्रीः परममाहेश्वरः श्रीसेनापतिभट्टार्कस्तस्य सुतस्तत्पादरजोरुणावनतपवित्रीकृतशिराः शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिर्दीनानाथकृपणजनोपजीव्यमानविभवपरममाहेश्वरः श्रीसेनापतिधरसेनस्तस्यानुजस्तत्पादप्रणामप्रशस्ततरविमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विहितविजयव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगैकस्वामिना **परमस्वामिना** स्वयमुपहितराज्याभिषेको महाविश्रणनावपूतराजश्रीपरममाहेश्वरमहाराजश्रीद्रोणसिंह सिंह इव तस्यानुजः स्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणैषिणां शरणमवबोद्धा शस्त्रार्थतत्त्वानां कल्पतरुरिव सुहृत्प्रणयिनां यथाभिलषितफलोपभोगदः परमभागवतो महाराजध्रुवसेनस्तस्यानुजस्तच्चरणारविन्दप्रणतिप्रविधौताशेषकल्मषः सुविशुद्धस्वचरितोदकक्षालितसकलकलिकलङ्कः प्रसभनिजितारातिपक्षप्रथितमहिमा परमादित्यभक्तः श्रीमहाराजधरपट्टस्तस्यात्मजस्तत्पादसपर्यावाप्तपुण्योदयः शैशवात्प्रभृतिखड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणतारातिचूडारत्नप्रभासंसक्तसव्यपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः

---

१. इदं च दानपत्रं **काठियावाड**राष्ट्रान्तर्गत**सुराथपुरे** Mr. Bau'ddin, Divan of H. H. the Navab of Junâgadhतः संप्राप्तमिति G. Bühler महाशयवराः.

प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः श्रीमहाराज**गुहसेन**स्तस्य सुतस्तत्पादनखसंतानविसृतजाह्नवीजलौघनिक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानभोगसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मादायादानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहताराातिपक्षलक्ष्मीक्षोभदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरो महाराजश्री**धरसेनः** कुशली सर्वानेवायुक्तकद्राङ्गिकमहत्तरभटचाटभटध्रुवाधिकरणिकदण्डपाशिकभोगाधरणिकशौल्किकवर्त्मपलप्रतिसरकराजस्थानीयकुमारामात्यादींश्चानन्यांश्च यथा संबध्यमानकान्समाज्ञापयति—अस्तु वः संविदितम्—यथा मया मातापित्रोः पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तये **सूर्य[आर्य]दास**ग्रामे दक्षिणपूर्वसीम्नि पदावर्थशतद्वयवापी च ज्योतिपद्रक्रमे उत्तरपूर्वसीम्नि क्षेत्रपादावर्तशतद्वयविंशोत्तरः, **लेशुदक**ग्रामे खट्टखट्टावर्तितपादावर्ती पञ्चत्रिंशः, एतसोद्रङ्गं सोपरिकरं सवातभूतधानहिरण्यादेयः सोत्पद्यमानविष्टिकः समस्तराजकीयानामहस्तप्रक्षेपणीयं भूमिच्छिद्रन्यायेन **शाण्डिल्य**सगोत्र**च्छन्दोगकौथुम**सब्रह्मचारिब्राह्मण**दुशाय** तथा ब्राह्मण**षष्ठ्ये** बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञिकानां क्रियाणां समुत्सर्पणार्थमाचन्द्रार्कार्णवसरित्क्षितिसमकालीनः पुत्रपौत्रान्वयभोग्यमुदकसर्गेण ब्रह्मदायं निसृष्टं यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चित्प्रतिषेधे वर्तितव्यमागामिभद्रनृपतिभिश्चास्मद्वंशजैरनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च । यश्चैनमाच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैः सोपपातकैश्च संयुक्तः स्यादिति । उक्तं च भगवता **वेदव्यासेन** व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

लिखितः संधिविग्रहाधिकृतस्कन्धभट्टेन । स्वहस्तो मम महाराजश्री-**धरसेनस्य** ॥ दु०चिब्बर सं० २९२ वैशाख व० १९ ॥

(इण्डियन् आण्टिक्केरी—७ । ६८–७०)

---

(१६९)

वलभीप्रभोः श्रीधरसेनमहाराजानां तृतीयं दानपत्रम् ।

(A. D. 589)

ॐ स्वस्ति विजयस्कन्धावारात् भर्तृटाटनकवासकात् प्रसभप्रणता-मित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तसंप्रहारशतलब्धप्रतापः प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतमित्रश्रेणिबलावाप्तरा-ज्यश्रीः परममाहेश्वरः श्रीसेनापति**भट्टार्क**स्तस्य सुतस्तत्पादरजोरुणावनतपवि-त्रीकृतशिराः शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिः, दीनानाथकृपणजनोपजीव्यमानविभवः, परममाहेश्वरः श्रीसेनापति**धरसे-न**स्तस्यानुजस्तत्पादप्रणामप्रशस्ततरविमलमौलिमणिर्मन्वादिप्रणीतविधिवि-धानधर्मा धर्मराज इव विनयविहितव्यवस्थापद्धतिरखिलभुवनमण्डलाभो-गैकस्वामिना **परमस्वामिना** स्वयमुपहितराज्याभिषेकमहाविश्राणनावपू-तराज्यश्रीः परममाहेश्वरो महाराजश्री**द्रोणसिंहः** सिंह इव तस्यानुजः स्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणैषिणां शरणमव-बोद्धा शास्त्रार्थतत्वानां कल्पतरुरिव सुहृत्प्रणयिनां यथाभिलषितकाम-

---

१. इदं च दानपत्रं **काठियावाड**राष्ट्रान्तर्गत**सुराथपुरे** Mr. Bau'ddin, Divan of H. H. the Navab of Junâgadhतः समुपलब्धमिति G. Bühler महाशयाः.

फलभोगदः परमभागवतो महाराजश्री**ध्रुवसेन**स्तस्यानुजस्तच्चरणारविन्दप्रणतिप्रविधौतावशेषकल्मषः सुविशुद्धस्वचरितोदकप्रक्षालिताशेषकलिकलङ्कः प्रसभनिर्जितारातिपक्षप्रथितमहिमा परमादित्यभक्तो महाराजश्री**धरपट्ट**स्तस्य सुतस्तत्पादसपर्यावाप्तपुण्योदयः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणतारातिचूडारत्नप्रभासंसक्तसव्यपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दोऽभिरूपकान्तिःस्थैर्यधैर्यगाम्भीर्यसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरो महाराजश्री**गुहसेन**स्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानभोगसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसृष्टानामनुपालयिता धर्मादायादानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहतारातिपक्षलक्ष्मीपरिभोगदक्षविक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरो महासामन्तमहाराजश्री**धरसेनः** कुशली सर्वानेव स्वानायुक्तकविनियुक्तकद्राङ्गिकवामहत्तरभटचारभटध्रुवाधिकरणिकशौल्किकचोरोद्धरणिकदण्डपाशिककाथेवरिकविषयपतिराजस्थानीयोपरिकुमारामात्यहस्त्यश्वारोहादीनन्यांश्च यथा संबध्यमानकान् समनुदर्शयति—अस्तु वः संविदितम्—यथा मया मातापित्रोः पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तये **आनर्तपुर**विनिर्गत**खेटक**निवासिसर्कराक्षिसगोत्रबह्वृचसब्रह्मचारिब्राह्मण......मित्रपुत्रब्राह्मण**विष्णुमित्राय** खेटकाहारविषये वण्डरिजिद्रिपथकान्तर्गत**अशिलापल्लिका**ग्रामः सोद्रङ्गः सपरिकरः सवातभूतप्रत्यायः सधान्यभागभोगहिरण्यदेयः सोत्पद्यमानविष्टिकः सदशापराधः समस्तराजकीयानामहस्तप्रक्षेपणीयो भूमिच्छिद्रन्यायेन बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञिकानां क्रियानां

समुत्सर्पणार्थमाचन्द्रार्कार्णवसरित्क्षितिस्थितिपर्वतसमकालीनः पुत्रपौत्रान्वयभोग्यसुदकातिसर्गेण ब्रह्मदायो निसृष्टो यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चिद् व्याघाते वर्तितव्यमागामिभद्रनृपतिभिरस्मद्वंशजैरन्यैर्वानित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च। यश्चैनमाच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैः सोपपातकैश्च संयुक्तः स्यादिति। उक्तं च भगवता **वेदव्यासेन** व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
कृष्णाहयो हि जायन्ते ब्रह्मदेयापहारकाः॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
गवां शतसहस्रस्य हन्तुः प्राप्नोति किल्बिषम्॥
पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम्॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत॥

इति। स्वहस्तो महाराजश्री**धरसेनस्य**। दु० **सामन्तशीलादित्य**। लिखितं संधिविग्रहाधिकरणाधिकृतदिविरपति**स्कन्धभट्टेन**॥ संवत् २७० फाल्गुन व० १०॥

(इण्डियन् आण्टिक्केरी—७। ७१-७३)

---

(१६६)

वलभीप्रभोः श्रीधरसेनमहाराजानां चतुर्थं दानपत्रम्।

(A. D. 449)

ॐ स्वस्ति विजयस्कन्धावाराद्भर..........वासकात्प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तसंप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणिबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः **श्रीगुहसेन**स्तस्य सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मादायादानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः **श्रीधरसेन**स्तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरान् सपीठो व्यूढगुरुमनोरथमहाभारः सर्वविद्यापरापरविभागाधिगम-

१. इदं दानपत्रमेकस्माद्वैश्यवरादुपलब्धमिति G. Bühler महाशयवराः.

विमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्र-लोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खि-लीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुरोधोज्ज्वलतरीकृता-र्थसुखसंपदुपसेवानिरूढ**धर्मादित्य**द्वितीयनामा परममाहेश्वरः **श्रीशीला-दित्य**स्तस्यानुजस्तत्पादानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता सम-भिलषणीयामपि राजलक्ष्मीं स्कन्धासक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनै-करसतयेवोद्वहन् खेदसुखरतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशी-कृतनृपतिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामि-कैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमति-सृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहतारातिपक्षलक्ष्मीपरिभोगदक्षवि-क्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः **श्रीखरग्रह**स्तस्य तन-यस्तत्पादानुध्यातः सकलविद्याधिगमविहितनिखिलद्विजजनमनःपरितो-षातिशयः सत्त्वसंपदात्यागौदार्येण च विगतानुसंधानसमाहितारातिपक्ष-मनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहर-णप्रत्यग्रोदग्रबाहुदण्डविध्वंसितनिखिलप्रतिपक्षदर्पोदयः स्वधनुःप्रभावपरि-भूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनः परममाहेश्वरः **श्रीधरसेन**स्तस्यानुजस्तत्पादानुध्यातः सच्चरितातिशयितसकलपूर्वनरपति-प्रतिदुःसाधानामपप्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परिवृद्ध-गुणानुरागनिर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगतक-लाकलापः कान्तिमान् निर्वृतिहेतुरकलङ्ककुमुदनाथः प्राज्यप्रतापास्थगित-दिगन्तरालप्रध्वंसितध्वान्तराशिः सततोदितसविता प्रकृतिभ्यः परं प्रत्य-यमर्थवन्तमति बहुतिथिप्रयोजनानुबन्धमागमपरिपूर्णं विदधानः संधिवि-ग्रहसमासनिश्चयनिपुणः स्थानेऽनुरूपमादेशं दद्द्गुणवृद्धिविधानजनितसं-स्कारः साधूनां राज्यशालातुरीयतन्त्रयोरुभयोरपि निष्णातः प्रकृष्टविक्र-

१. शालातुरीयः पाणिनिः.

मोऽपि करुणामृदुहृदयः श्रुतवानप्यगर्वितः कान्तोऽपि प्रशमी स्थिरसौहृदयोऽपि निरसिता दोषवतामुदयसमयसमुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथित**बालादित्य**द्वितीयनामा परममाहेश्वरः **श्रीध्रुवसेन**स्तस्य सुतस्तत्पादकमलप्रणामधरणिकषणजनितकिणलाञ्छनघनललाटचन्द्रशकलः शिशुभाव एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतविशेषः प्रदानसलिलक्षालिताग्रहस्तारविन्दः कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः कार्मुकधनुर्वेद इव संभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमाङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरः परमभट्टारकमहाराजाधिराजपरमेश्वरचक्रवर्तिश्री**धरसेनः** कुशली सर्वानेव समाज्ञापयति—अस्तु वः संविदितम्—यथा मया मातापित्रोः पुण्याप्यायनाया**नर्तपुर**विनिर्गत**कासरग्राम**निवास**स्थानर्तपुर**चातुर्विद्यसामान्यसर्कराक्षिसगोत्रबह्वृचसब्रह्मचारिब्राह्मण**केशवमित्र**पुत्रब्राह्मण**नारायणा**मित्राय खेटकाहारे सिंहपल्लिकापथके **देसुरक्षितिज**ग्रामः सोद्रङ्गः सोपरिकरः सभूतवातप्रत्यायः सधान्यहिरण्यादेयः सदशापराधः सोत्पद्यमानविष्टिकः सर्वराजकीयानामहस्तप्रक्षेपणीयः पूर्वप्रत्तदेवब्रह्मदेयब्राह्मणविंशतिरहितः भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयभोग्यः, उदकातिसर्गेण धर्मदायो निसृष्टः, यतोऽस्योचितया ब्रह्मदेयाग्रहारस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यमागामिभद्रनृपतिभिरप्यस्मद्वंशजैरन्यैर्वा, अनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति। उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥

यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत॥

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥

दूतकोऽत्र राजदुहितृभूपा(?)। लिखितमिदं संधिविग्रहाधिकृतदिविरपति-
चन्द्रभट्टिपुत्रदिविरपतिश्री**स्कन्दभट्टे**नेति। सं० ३३० मार्गशिर शु० ३।
स्वहस्तो मम॥

(इण्डियन् आण्टिक्वेरी—७। ७३-७५)

---

(१६७)

वलभीप्रभोः श्रीखरग्रहमहाराजानां दानपत्रम्[1]।

(A. D. 656)

ॐ स्वस्ति विजयस्कन्धावारात् **पूलेण्डक**वासकात् प्रसभप्रणतामित्रा-
णां मैत्रकाणामतुलबलसंपन्नमण्डिलाभोगसंसक्तप्रहारशतलब्धप्रतापात् प्र-
तापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणीदलावाप्तराज्य-
श्रियः परममाहेश्वरश्री**भट्टार्का**दव्यवच्छिन्नराजवंशत(?)मातापितृचरणारवि-
न्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरग-
जघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्त-
पादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्ज-
नान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजो-
दधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपा-
स्ताशेषस्वकार्यफलप्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पाद-
चारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः श्री**गुहसेन**स्तस्य
सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रण-
यिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितसरभसमाभिगामिकैर्गुणैः सह-
जशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टाना-
मनुपालयिता धर्मादायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता
श्रीसरस्वत्योरेकाधिवासस्य संहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमो-
पसंप्राप्तविमलपार्थिवः श्रीपरममाहेश्वरः श्री**धरसेन**स्तस्य सुतस्तत्पादानु-

---

१. इदं दानपत्रमेकस्माद्वैश्यवरात्संप्राप्तमिति G. Bühler विद्वदवतंसवराः.

ध्यातसकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरांसपीठो व्यूढगुरुमनोरथमहाभारः सर्वविद्यापरापरविभागधिगाविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषसमग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिधर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढ**धर्मादित्य**द्वितीयनामा परममाहेश्वरः श्री**शिलादित्य**स्तस्यानुजस्तत्पादानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलाषिणीयामपि राजलक्ष्मीं स्कन्धसक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकरसतयेवोद्वहन्खेदसुखसंपत्तिभ्यामनायासितसत्त्वसंपत्तिप्रभावसंपद्वशीकृतनृपतिशतशिरोरत्नच्छायोपगूढपादपीठोऽपरावज्ञाभिमानरसानालिङ्गितमनोवृत्तिप्रणतिमेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायकृतनिखिलभुवनामोदगुणसंहतिप्रसभविघटितसकलकलिविलसितगतिर्नीचजनाभिरोहिभिरशेषैर्दोषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्रकौशलातिशयगणतिथिविपक्षक्षितिपतिलक्ष्मीस्वयंग्राहप्रकाशितप्रवीरपुरुषप्रथमसंख्याधिगमः परममाहेश्वरः श्री**खरग्रह**स्तस्य तनयस्तत्पादानुध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्वसंपदात्यागौदार्येण च विगतानुसंधानाशमाहितारातिपक्षमनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरणप्रत्यलोदग्रबाहुदण्डविध्वंसितनिखिलप्रतिपक्षदर्पोदयः स्वधनुःप्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनपरममाहेश्वरः श्री**धरसेन**स्तस्यानुजस्तत्पादानुध्यातसच्चरित्रातिशयितसकलपूर्वनरपतिरतिदुःसाधानामपि प्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परिवृद्धगुणानुरागनिर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगतकलाकलापः कान्तिमान्निर्वृतिहेतुरकलङ्कः कुमुदनाथः प्राज्यप्रतापस्थगितदिगन्तरालप्रध्वंसितध्वान्तराशिः सततोदितः सविता प्रकृतिभ्यः परं प्रत्ययमर्थवन्तमतिबहुतिथिप्रयोजनानुबन्धमागमपरिपूर्णं विदधानः संधि-

विग्रहसमासनिश्चयनिपुणः स्थानेऽनुरूपमादेशं ददद्गुणवृद्धिविधानजनि-
तसंस्कारः साधूनां राज्यशालातुरीयतन्त्रयोरुभयोर्निष्णातः प्रकृष्टविक्रमोऽपि
करुणामृदुहृदयः श्रुतवानप्यगर्वितकान्तोऽपि प्रशमी स्थिरसौहृदयोऽपि नि-
रसिता दोषवतामुदयसमयसदुपजनितजनतानुरागपरिपिहितभुवनसमर्थित-
प्रथित**बालादित्य**द्वितीयनामा परममाहेश्वरः **श्रीध्रुवसेन**स्तस्य सुतस्तत्पा-
दकमलप्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकलः शिशुभाव
एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतविशेषप्रदानसलिलक्षालिताग्र-
हस्तारविन्दकन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः
कार्मुके धनुर्वेद इव संशोधिताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमा-
ङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरपरमभट्टारकमहाराजाधिराजपर-
मेश्वरचक्रवर्ति**श्रीधरसेन**स्तत्पितामहभ्रातृश्री**शीलादित्य**स्य शार्ङ्गपाणेरिवा-
ङ्गजन्मनो भक्तिबन्धुरावयवकल्पितप्रणतेरतिधवलतया दूरं तत्पादारविन्द-
प्रवृत्तया नखमणिरुचा मन्दाकिन्येव नित्यममलितोत्तमाङ्गदेशस्यागस्त्यस्येव
राजर्षेर्दाक्षिण्यमातन्वानस्य प्रबलधवलिम्ना यशसां वलयेन मण्डितककुभा
नभसि यामिनीपतेर्विनिर्मिताखण्डपरिवेषमण्डलस्य पयोदश्यामशिखरचू-
चुकरुचिरसह्यविन्ध्य····स्तनयुगायाः क्षितेः पत्युः **श्रीदेरभट**स्याङ्गजः क्षि-
तिपसंहतेरनुरागिण्याः शुचि(?)यशोंऽशुकभृतः स्वयंवरमालामिव राज्यल-
क्ष्मीमर्पयन्त्याः कृतपरिग्रहः शौर्यमप्रतिहति व्यापारमानमितप्रचण्डरिपुम-
ण्डलं मण्डलाग्रमिवावलम्बमानः शरदि प्रसभमाकृष्टशिलीमुखबाणासना-
पादितप्रसाधनानां परभुवां विधिवदाचरितकरग्रहणः पूर्वमेव विविधवर्णो-
ज्ज्वलेन श्रुतातिशयेनोद्भासितश्रवणः पुनःपुनरुक्तचक्रमेव रत्नालंकारे-
णालंकृतश्रोत्रः परस्फुरत्कटकविकटकीटपक्षरत्नकिरणविच्छिन्नप्रदानस-
लिलनिवहावसेकविलसन्नवशैवशैवलालंकारमिवाग्रपाणिमुद्वहन् धृतविशा-
लरत्नवलयजलधिवेलतटायमानभुजपरिष्वक्तविश्वंभरः परममाहेश्वरः श्री-
ध्रुवसेनस्तस्याग्रजः परमहीपतिस्पर्शदोषनाशनधियेव लक्ष्म्या स्वयम-
तिस्पष्टचेष्टमाश्लिष्टाङ्गयष्टिमतिरुचिरतरचरितगरिमपरिकलितसकलनरपतिर-
तिप्रकृष्टानुरागरसरभसवशीकृतप्रणतसामन्तसमन्तचक्रचूडामणिमयूखख-

चितचरणकमलयुगलः प्रोद्दामोदारदोर्दण्डदलितद्विषद्वर्गदर्पः प्रसर्पत्पटीयः प्रतापप्लोषिताशेषशत्रुवंशः प्रणयिपक्षनिक्षिप्तलक्ष्मीकः प्रेरितगदोत्क्षिप्तसुदर्शनचक्रः परिहृतबालक्रीडोऽनधःकृतद्विजातिरेकविक्रमप्रसाधितधरित्रीतलोऽनङ्गीकृतजलशय्योऽपूर्वपुरुषोत्तमः साक्षाद्धर्म इव सम्यगुपस्थापितवर्णाश्रमाचारः परममाहेश्वर**श्रीखरग्रहः** कुशली सर्वानेव समाज्ञापयति—अस्तु वः संविदितं यथा—मया मातापित्रोः पुण्याप्यायनाया**नन्दपुर**विनिर्गतखेटकवास्तव्य**नन्दपुर**चातुर्विद्यसामान्यशकराक्षिसगोत्रबह्वृचसब्रह्मचारिब्राह्मण**केशव**पुत्रब्राह्मण**नारायणाय शिवभागपुर**विषये घृतालयभूमौ **पङ्कुलपल्लिका**ग्रामः सोद्रङ्गः सपरिकरः सभूतवातप्रत्यायः सधान्यहिरण्यादेयः सदशपराधः सोत्पद्यमानविष्टिकः सर्वराजकीयानामहस्तप्रक्षेपणीयः पूर्वप्रत्तदेवब्रह्मदेयब्राह्मणविंशतिरहितभूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयभोग्य उदकातिसर्गेण धर्मदायो निसृष्टः । यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यम् । आगामिभद्रनृपतिभिरप्यस्मद्वंशजैरन्यैर्वा अनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति । उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकोऽत्र **प्रमातृश्रीना** । लिखितमिदं संधिविग्रहाधिकृतदिविरपतिश्री**स्कन्धभट**पुत्रदिविरपतिश्री**मदनहिले**नेति । सं० ३२७ आषाढ वदी ५। स्वहस्तो मम ॥

(इण्डियन् आण्टिक्केरी—७ । ७६–७९)

(१६८)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थः प्रथमः शिलालेखः।

पायान्नेमिजिनः स यस्य कथितः स्वामीकृतागस्थिता-
वप्रे रूपदिदृक्षया स्थितवते प्रीते सुराणां प्रभौ।
काये भागवते वने वक''''द्विपोलावने शंसता-
मिदशां''''मपि ''''वनाजवे''''''''''''''''''' ॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ. श्रीचण्डपालात्मज ठ. श्रीचण्डप्रसादाङ्गज ठ. श्रीसोमतनुज ठ. श्रीआशाराजनन्दनस्य ठ. श्रीकुमारदेवीकुक्षिसंभूतस्य ठ. श्रीलुणिग महं० श्रीमालदेवयोरनुजस्य महं० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे महं० श्रीललितादेवीकुक्षिसरोवरराजहंसायमाने महं० श्रीजयन्तसिंहे सं० ७९ वर्षपूर्वं स्तम्भतीर्थमुद्राव्यापारान्व्यापृण्वति सति सं० ७७ वर्षे श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महाराजश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारान्व्यापृण्वता महं० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः। तथा सचीवेश्वरश्रीवस्तुपालेन इह स्वयं निर्मापितश्रीशत्रुंजयमहातीर्थावतार श्रीमदादितीर्थंकरश्रीऋषभदेवस्तम्भनकपुरावतार श्रीपार्श्वनाथदेवसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहितकश्मीरावतार श्रीसरस्वतिमूर्तिदेवकुलिकाचतुष्टयजिनयुगलाम्बावलोक-

नाशाम्ब**प्रद्युम्न**शिखरेषु श्रीनेमिनाथदेवालंकृतदेवकुलिकाचतुष्टयतुरगाधिरूढस्वपितामह ठ. श्री**सोम**निजपितृ ठ. श्री**आशाराज**मूर्तिद्वितयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितमुखोद्घाटनकस्तम्भश्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीम**दुज्जयन्त**महातीर्थे आत्मनस्तथा स्वसधर्मचारिण्याः **प्राग्वाट**जातीय ठ. श्री**कान्हड**पुत्र्याः ठ. **राणु**कुक्षिसंभूताया महं॰ श्री**ललिता**देव्याः पुण्याभिवृद्धये श्री**नागेन्द्रगच्छे** भट्टारकश्री**महेन्द्रसूरि**संताने शिष्यश्री**शान्तिसूरि**शिष्यश्री**आणन्दसूरि**श्री**अमरसूरि**पदे भट्टारकश्री**हरिभद्रसूरि**पट्टालंकरणप्रभुश्री**विजयसेनसूरि**प्रतिष्ठित श्रीअजितनाथदेवादिविंशतितीर्थंकरालंकृतोऽयमभिनवः समण्डपः श्रीसंमेदमहातीर्थावतारप्रासादः कारितः।

पीयूषपूरस्य च **वस्तुपाल**मन्त्रीशितुश्चायमियान्विभेदः।
एकः पुनर्जीवयति प्रमीतं प्रमीयमाणं तु भुवि द्वितीयः॥

श्रीदश्रीदयितेश्वरप्रभृतयः सन्तु क्वचित्तेऽपि ये
प्रीणन्ति प्रभविष्णवोऽपि विभवैर्नाकिंचनं कंचन।
सोऽयं सिञ्चति काञ्चनैः प्रतिदिनं दारिद्र्यदावानलप्रम्लानां पृथिवीं नवीनजलदः श्री**वस्तुपालः** पुनः॥

भ्रातः पातकिनां किमत्र कथया दुर्मन्त्रिणामेतया
येषां चेतसि नास्ति किंचिदपरं लोकोपकारं विना।
नन्वस्यैव गुणान्गृणीहि गणशः श्री**वस्तुपालस्य** यस्तद्विश्वोपकृतिव्रतं चरति यत्कर्णेन चीर्णं पुरा॥

भित्त्वा भानुं **भोजराजे** प्रयाते श्री**मुञ्जे**ऽपि स्वर्गसाम्राज्यभाजि।
एकः संप्रत्यर्थिनां **वस्तुपाल**स्तिष्ठत्यश्रुस्यन्दनिष्कन्दनाय॥

चौलुक्यक्षितिपालमौलिसचिवत्वत्कीर्तिकोलाहलस्त्रैलोक्येऽपि विलोक्यमानपुलकानन्दाश्रुभिः श्रूयते।
किं चैषा कलिदूषितापि भवता प्रासादवापीप्रपाकूपारामसरोवरप्रभृतिभिर्धात्री पवित्रीकृता॥

स श्रीतेजःपालः सचिवश्चिरकालमस्तु तेजस्वी ।
येन वयं निश्चिन्ता चिन्तामणिनेव नन्दाम ॥
लवणप्रसादपुत्रश्रीकरणे लवणसिंहजनकोऽसौ ।
मन्त्रित्वमत्र कुरुतां कल्पशतं तरुकल्पः ॥
पुरापातेन दैत्यारेर्भुवनोपरिवर्तिना ।
अधुना वस्तुपालस्य हस्तेनाधः कृतो बलिः ॥
दयिता ललिता देवी तनयमवीतनयमाप सचिवेन्द्रात् ।
नाम्ना जयन्तसिंहं जयन्तमिन्द्रात्पुलोमपुत्रीव ॥
एते श्रीगुर्जरेश्वरपुरोहित ठ. श्रीसोमेश्वरदेवस्य ।
स्तम्भतीर्थेऽत्र कायस्थवंशे वाजडनन्दनः ।
प्रशस्तिमेतामलिखज्जैत्रसिंहध्रुवः सुधीः ॥
वाड.....स्य तनूजेन सूत्रधारेण धीमता ।
एषा कुमारसिंहेन समुत्कीर्णा प्रयत्नतः ॥
श्रीनेमेस्त्रिजगद्भर्त्तुरम्बायाश्च प्रसादतः ।
वस्तुपालान्वयस्यास्तु प्रशस्तिः स्वस्तिशालिनी ॥

(गिरनार इन्स्क्रिप्शन्स् नं० २ । २१–२३)

---

(१६९)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थो द्वितीयः शिलालेखः ।

............यः पु....तयदुकूलक्षीरार्णवेन्दुर्जिनो
यत्पादाब्जपवित्रमौलिरसमश्रीरुज्जयन्तोऽप्ययम् ।
धत्ते मूर्ध्नि निजप्रभुप्रसृमरोद्दामप्रभामण्डलो
विश्वक्षोणिभृदाधिपत्यपदवीं नीलातपत्रोज्ज्वलाम् ॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुर-वास्तव्यप्राग्वाटान्वयप्रसूत ठ. श्रीचण्डपालात्मज ठ. श्रीचण्डप्रसादाङ्गज

ठ. श्री**सोम**तनुज ठ. श्री**आशाराज**नन्दनस्य ठ. श्री**कुमरादेवी**कुक्षिसंभूतस्य ठ. श्री**लुणिग** महं० ठ. श्री**मालदेव**योरनुजस्य महं० ठ. श्री**तेजःपाला**-ग्रजन्मनो महामात्यश्री**वस्तुपाल**स्यात्मजे महं० ठ. श्री**ललितादेवी**कुक्षि-सरोवरराजहंसायमाने महं० श्री**जयन्तसिंहे** सं० ७९ वर्षपूर्वं मुद्राव्या-पारं व्यापृण्वति सति सं० ७७ वर्षे श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थया-त्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन **चौलुक्य**-कुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्री**लवणप्रसाद**देवसुतमहा-राजश्री**वीरधवलदेव**प्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्री**वस्तुपालेन** तथानुजेन सं० ७६ वर्षपूर्वं **गुर्जर**मण्डले **धवल-क्कक**प्रमुखनगरेषु मुद्राव्यापारान्व्यापृण्वता महं० श्री**तेजःपालेन** च श्री**शत्रुंजयार्बुदाचल**प्रभृतिमहातीर्थेषु श्रीम**दणहिलपुरभृगुपुरस्तम्भन-कपुरस्तम्भतीर्थदर्भवतीधवलक्कक**प्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः । तथा सचि-वेश्वरश्री**वस्तुपाले**नेह स्वयं निर्मापितश्री**शत्रुंजय**महातीर्थावतारश्रीम**दा-दितीर्थंकरश्रीऋषभदेवस्तम्भनकपुरावतार** श्री**पार्श्वनाथदेवसत्यपुरा-**वतार श्री**महावीरदेवप्रशस्तिसहितकश्मीरावतार** श्रीसरस्वतीमूर्तिदेवकु-लिकाचतुष्टयजिनद्वयाम्बावलोकनाशाम्ब**प्रद्युम्नशिखरेषु** श्रीनेमिनाथदे-वालंकृतदेवकुलिकाचतुष्टयतुरगाधिरूढनिजपितामह ठ. श्री**सोम**निजपितृ ठ. श्री**आशाराज**मूर्तिद्वितयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजा-ग्रजानुजपुत्रादिमूर्तिसमन्वितखुखोद्धाटनकस्तम्भश्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीम**दुज्जय-न्त**महातीर्थे आत्मनस्तथा स्वभार्यायाः **प्राग्वाट**ज्ञातीय ठ. श्री**कान्हड**पुत्र्याः ठ. **राणु**कुक्षिसंभूताया महं० श्री**सोखुकायाः** पुण्याभिवृद्धये श्री**नागेन्द्र-गच्छे** भट्टारकश्री**महेन्द्रसूरि**संताने शिष्यश्री**शान्तिसूरि**शिष्यश्री**आणन्द-सूरि**श्री**अमरसूरि**पदे भट्टारकश्री**हरिभद्रसूरि**पट्टालंकरण श्री**विजयसेनसू-रि**प्रतिष्ठित श्रीऋषभदेवप्रमुखचतुर्विंशतितीर्थंकरालंकृतोऽयमभिनवः सम-ण्डपः श्रीसंमेत(द)महातीर्थावतारप्रधानप्रासादः कारितः ।

चेतः किं कलिकालसालसमहो किं मोहनो हस्यते
तृष्णे कृष्णमुखासि किं कथय किं विघ्नौघमोघो भवान्।
ब्रूमः किंतु सखे न खेलति किमप्यस्माकमुज्जृम्भितं
सैन्यं यत्किल **वस्तुपाल**कृतिना धर्मस्य संवर्धितम्॥

यं विधुं वन्धवसिद्धमार्थिनः शत्र···· ।
····ण····पश्यन्ति वर्ण्यतां किमयं मया॥

वैरं विभूतिभारत्योः प्रभुत्वप्रणिपातयोः।
तेजस्विताप्रशमयोः शमितं येन मन्त्रिणा॥

दीपः स्फूर्जति सज्जकज्जलमलस्नेहं मुहुः संहर-
न्निन्दुर्मण्डलवृत्तखण्डनपरः प्रद्वेष्टि मित्रोदयम्।
शूरः क्रूरतरः परस्य सहते तेजो न तेजस्विन-
स्तत्केन प्रतिमं ब्रवीमि सचिवं श्री**वस्तुपाला**भिधम्॥

आयाताः कति नैव यान्ति कति नो यास्यन्ति नो वा कति
स्थाने स्थाननिवासिनो भवपथे पान्थीभवन्तो जनाः।
अस्मिन्विस्मयनीयबुद्धिजलधिर्विध्वस्य दस्यून्करे
कुर्वन्पुण्यनिधिं धिनोति वसुधां श्री**वस्तुपालः** परम्॥

दध्रेऽस्य **वीरधवल**क्षितिपस्य राज्यभारे धुरंधरधुरां··········· ।
श्री**तेजःपाल**सचिवे दधति स्वबन्धुभारोद्धृतावविधुरैकधुरीणभावम्॥

इह **तेजपाल**सचिवो विमलित**विमलाचले**न्द्रममृतभृतम्।
कृत्वानुपमसरोवरममरगणं प्रीणयांचक्रे॥

एते श्री**मलधारि**श्री**नरचन्द्रसुरी**णाम्।

इह **वालिग**सुतसहजिगपुत्रातकतनुजवाजडतनूजः।
अलिखदिमां कायस्थ**स्तम्भपुरी**यध्रुवो **जयन्तसिंहः**॥

हरिमण्डपनन्दीश्वरशिल्पीश्वर**सोमदेव**पौत्रेण।
बकुलस्वामिसुतेनोत्कीर्णा **पुरुषोत्तमे**नेयम्॥

वस्तुपालस्य प्रशस्तिरियं ६०३ महामात्यवस्तुपालभार्यामहम् (?) श्रीसोखुकाया धर्मस्थानमिदम्।

(गिरनार इन्स्क्रिप्शन्स् नं० २।२३-२४)

---

(१७०)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थस्तृतीयः शिलालेखः।

प्रणमदमरप्रेङ्खन्मौलिस्फुरन्मणिघोरणी-
तरुणकिरणश्रेणीशोणीकृताखिलविग्रहः।
सुरपतिकरोन्मुक्तैः स्ना(?)त्रोदकैर्घुसृणारुण-
द्युततनुरिवापायात्पायाज्जगन्ति शिवाङ्गजः॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ. श्रीचण्डपालात्मज ठ. श्रीचण्डप्रसादाङ्गज ठ. श्रीसोमतनुज ठ. श्रीआशाराजनन्दनस्य ठ. श्रीकुमारदेवीकुक्षिसंभूतस्य ठ. श्रीलुणिग महं० श्रीमालदेवयोरनुजस्य महं० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे महं० श्रीललितदेवीकुक्षिसरोवरराजहंसायमाने महं० श्रीजयन्तसिंहे सं० ७९ वर्षपूर्वं स्तम्भनकतीर्थमुद्राव्यापारं व्यापृण्वति सति सं० ७७ वर्षे श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्ककप्रमुखनगरेषु मुद्राव्यापारान्व्यापृण्वता महं० श्रीतेजःपालेन च शत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः। तथा सचिवेश्वर-

श्रीवस्तुपालेनेह स्वयं निर्मापितश्रीशत्रुंजयमहातीर्थावतारश्रीमदादितीर्थंकरश्रीऋषभदेवस्तम्भनकपुरावतारश्रीपार्श्वनाथदेवश्रीसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहितकाश्मीरावतार श्रीसरस्वतीमूर्तिदेवकुलिकाचतुष्टयजिनयुगलाम्बावलोकनाशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालंकृतदेवकुलिकाचतुष्टयतुरगाधिरूढनिजपितामह ठ. श्रीसोमस्वपितृ ठ. श्रीआशाराजमूर्तिद्वितयकुंजराधिरूढमहामात्यश्रीवस्तुपालानुज महं० श्रीतेजःपालमूर्तिद्वयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्धाटनकस्तम्भश्रीसंमेत(द)महातीर्थप्रभृति अनेकतीर्थपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वभार्यायाश्च प्राग्वाटजातीय ठ. श्रीकान्हडपुत्र्याः ठ. राणुकुक्षिसंभूताया महं० श्रीसोखुकायाः पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसंताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालंकरण प्रभुश्रीविजयसेनसूरिप्रतिष्ठित ऋषभदेवालंकृतोऽयमभिनवः समण्डपः श्रीअष्टापदमहातीर्थावतारनिरुपमप्रधानप्रासादः कारितः।

प्रासादैर्गगनाङ्गणप्रणयिभिः पातालमूलंकषैः
　　कासारैश्च सितैः सिताम्बरगृहैर्नीलैश्च लीलावनैः।
येनेयं नयनिर्जितेन्द्रसचिवेनालंकृतालं क्षितिः
　　क्षेमैकायतनां चिरायुरुदयी श्रीवस्तुपालोऽस्तु सः॥
संदिष्टं तव वस्तुपालवलिना विश्वत्रयी यात्रिका-
　　न्मत्वा नारदतश्चरित्रमिति ते हृष्टोऽसि नन्द्याश्चिरम्।
नार्थिभ्यः क्रुधमर्थितः प्रथयसि स्वल्पं न दत्से न च
　　स्वश्लाघां बहु मन्यसे किमपरं न श्रीमदान्मुह्यति॥
अखिलविदलनश्रीवीरनामायमुर्व्यां
　　सरपतिरवतीर्णस्तर्कयामास्तदस्य।
निवसति सुरशाखी वस्तुपालाभिधानः
　　सुरगुरुरपि तेजःपालसंज्ञः समीपे॥

उदारः शूरो वा रुचिरवचनो वास्ति न हि वा
भवत्तुल्यः कोऽपि क्वचिदिति चुलुक्येन्द्रसचिव ।
समुद्भूतभ्रान्तिर्नियतमवगन्तुं तव यश-
स्तातिर्गेहे गेहे पुरि पुरि च याता दिशि दिशि ॥

सा कुत्रापि युगत्रयी बत गता सृष्टा च सृष्टिः सतां
सीदत्साधुरसंचरत्सुचरितः खेलत्खलोऽभूत्कलिः ।
तद्विश्वार्तिनिवर्तनैकमनसा प्रत्तोऽधुना शंभुना
प्रस्तावस्तव वस्तुपाल भवते यद्रोचते तत्कुरु ॥

के निधाय वसुधातले वनं वस्तुपाल न यमालयं गताः ।
त्वं तु नन्दसि निवेशयन्निदं दिक्षु धावति जने क्षुधावति ॥

पौत्रेण धारय वराहपते धरित्रीं
सूर्य प्रकाशय सदा जलदाभिषिञ्च ।
विश्राणितेन परिपालय वस्तुपाल
भारं भवत्सु यदिमं निदधे विधाता ॥

आत्मा त्वं जगतः सदागतिरियं कीर्तिर्मुखं पुष्करं
मैत्री मन्त्रिवर स्थिरा घनरसः श्लोकस्तमोघ्नः शमः ।
नोक्तः केन करस्तवामृतकरः कायश्च भास्वानिति
स्पष्टं धूर्जटिमूर्तयः कृतपदा श्रीवस्तुपाल त्वयि ॥

विद्या यद्यपि वैदिकी न लभते सौभाग्यमेषा क्वचि-
न्न स्वार्तं कुरुते च कश्चन वचः कर्णद्वये यद्यपि ।
राजानः कृपणाश्च यद्यपि गृहे यद्यप्ययं च व्यय-
श्चिन्ता कापि तथापि तिष्ठति न मे श्रीवस्तुपाले सति ॥

कर्णे खलप्रलपितं न करोषि रोषं
नाविष्करोषि न करोष्यपदे च लोभम् ।
तेनोपरि त्वमवनेरपि वर्तमानः
श्रीवस्तुपाल कलिकालमधःकरोषि ॥

सर्वत्र भ्रान्तिमती सर्वविदस्त्वदभवत्कथं कीर्तिः।
श्रीवस्तुपालपितृकमनुहर्त्ते संप्रति प्रायः॥
सोऽपि बलेरवलेपः स्वल्पतरोऽभूत्तथैव कल्पतरोः।
श्रीवस्तुपालसचिवे सिञ्चति दानामृतैर्जगतीम्॥
नियोगिनागेषु नरेश्वराणां भद्रस्वभावः खलु **वस्तुपालः**।
उद्दामदामप्रसरस्य यस्य विभाव्यते क्वापि न मत्तभावः॥
विबुधैः पयोधिमध्यादेको बहुतः करी दुरुपलब्धः।
बहुवस्तु **वस्तुपाल**प्राप्ता विबुध त्वयैकेन॥
प्रथमं धनप्रवाहैर्वनरथनाथात्मजः सचिवः।
अधुना तु सुकृतसिन्धुर....वृन्दैः प्रमोदयति॥
श्रीवस्तुपाल भवता जलधेर्गम्भीरता किलाकलिता।
आनीय ततो गजता श्वपतिद्वारे यदाकलिता॥
एते श्रीमद्गुर्जरेश्वरपुरोहित ठ. श्रीसोमेश्वरदेवस्य।
इह वालिगसुतसहजिगपुत्रानकतनुजवाजडतनूजः।
अलिखदिमं **कायस्थः स्तम्भपुरीयो ध्रुवो जयतसिंहः**॥
हरिमण्डपनन्दीश्वर शिल्पीश्वर **सोमदेव**पौत्रेण।
बकुलस्वामिसुतेनोत्कीर्णा पुरुषोत्तमेनेयम्॥
महामात्यश्रीवस्तुपालस्य प्रशस्तिरियं निष्पन्ना ६०२।
श्रीनेमेस्त्रिजगद्भर्त्तुरम्बायाश्च प्रसादतः।
वस्तुपालान्वयस्यास्तु प्रशस्तिः स्वस्तिशालिनी॥
महामात्य**वस्तुपाल**भार्या महं० श्रीसोखुकाया धर्मस्थानमिदम्॥

(गिरनार इन्स्क्रिप्शन्स् नं० २। २४–२५)

१९

(१७१)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थश्चतुर्थः शिलालेखः।

तीर्थेशाः प्रणतेन्द्रसंहतिशिरःकोटीरकोटिस्फुट-
त्तेजोजालजलप्रवाहलहरीप्रक्षालिताङ्घ्रिद्वयः।
ते वः केवलमूर्तयो धवलितारिष्टां विशिष्टाममी
तामष्टापदशैलमौलिमणयो विश्राणयन्तु श्रियम् ॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण सुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ. श्रीचण्डपालात्मजश्रीचण्डप्रसादाङ्गज ठ. श्रीसोमतनुज ठ. श्रीआशाराजनन्दनस्य ठ. श्रीकुमारदेवीकुक्षिसंभूतस्य ठ. श्रीलुणिग महं० श्रीमालदेवयोरनुजस्य महं० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे महं० श्रीललितादेवीकुक्षिसरोवरराजहंसायमाने महं० श्रीजयन्तसिंहे सं० ७ वर्षे पूर्वं स्तम्भतीर्थवेलाकुलमुद्राव्यापारं व्यापृण्वति सति सं० ७७ श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभावाविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वेश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षे पूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारं व्यापृण्वता महं० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशो धर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः। तथा सचिवेश्वरश्रीवस्तुपालेनेह स्वयं निर्मापितशत्रुंजयमहातीर्थावतारश्रीमदादितीर्थंकरश्रीऋषभदेवस्थ(स्त)म्भनकपुरावतारश्रीपार्श्वनाथदेवसत्यपुरावतारश्रीमहावीरदेवप्रशस्तिसहितकश्मीरावतारश्रीसरस्वती-

देवकुलिकाचतुष्टययुगलाम्बावलोकनशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथकुला-लंकृतदेवकुलिकाचतुष्टयतुरगाधिरूढनिजपितामह ठ. श्रीसोमपितृ ठ. श्रीआशाराजमूर्त्तिद्वितयतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्त्तिसमन्वितसुखोद्धाटनकस्तम्भश्रीसंमेतावतारमहातीर्थप्रभृति अनेककीर्त्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वभार्यायाः प्राग्वाटजातीय ठ. कान्हडपुत्र्याः ठ. राणुकुक्षिसंभूताया महं० श्रीसोखुकायाः पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसंताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालंकरणश्रीविजयसेनसूरिप्रतिष्ठितश्रीमदादिजिनराजश्रीऋषभदेवप्रमुखचतुर्विंशतितीर्थंकरालंकृतोऽयमभिनवः समण्डपः श्रीअष्टापदमहातीर्थावतारप्रधानप्रासादः कारितः ।

स्वस्ति श्रीवलये नमोऽस्तु नितरां कर्णाय दाने ययो-
रस्पष्टेऽपि दृशां यशः कियदिदं वन्ध्यास्तदेताः प्रजाः ।
दृष्टे संप्रति वस्तुपालसचिवत्यागे करिष्यन्ति ताः
कीर्त्तिं कांचन या पुनः स्फुटमियं विश्वोऽपि नो मास्यति ॥

कोटीरैः कटकाङ्गुलीयतिलकैः केयूरहारादिभिः
कौशेयैश्च विभूष्यमाणवपुषो यत्पाणिविश्राणितैः ।
विद्वांसो गृहमागताः प्रणयिनीरप्रत्यभिज्ञाभृत-
स्तैस्तैः स्वांशपथैः कथं कथमिव प्रत्याययांचक्रिरे ॥

व्यासं व्यातनुतां विरोचनसुतस्त्यागं कवित्वश्रियं
भासव्यासपुरःसराः पृथुरघुप्रायाश्च वीरव्रतम् ।
प्राज्ञां नाकिपताकिनीगुरुरपि श्रीवस्तुपाल ध्रुवं
जानीमो न विवेकमेकमकृतोत्सेकं तु कौतस्कुतम् ॥

वास्तवं वस्तुपालस्य वेत्ति कश्चरिताद्भुतम् ।
यस्य दानमविश्रान्तमर्थिष्वपि रिपुष्वपि ॥

स्रोतव्यं खलु वस्तुपालसचिवः कैर्नाम वाग्वैभवै-
र्यस्य त्यागविधिर्विधूय विविधां दारिद्रमुद्रां हठात्।
विश्वेऽस्मिन्नखिलेऽप्यसूत्रयदसावर्थातिदानेति च
द्वौ शब्दावभिधेयवस्तुविरहव्याहन्यमानस्थिती ॥

आद्येनाप्यपवर्जनेन जनितार्थित्वप्रमाथान्पुनः
स्तोकं दत्तमतिक्रमान्तरगतानाह्वाययन्नार्थितः।
पूर्वस्माद्गुणसंख्ययापि गुणितं यस्तेष्वनावर्त्तिषु
द्रव्यं दातुमुदस्तहस्तकमलस्तस्थौ चिरं दुःस्थितः ॥

विश्वेऽस्मिन्किल पङ्कपङ्किलतले प्रस्थानवीथीर्विना
सीदन्नेष पदे पदेन पुरतो गन्तेति संचिन्तयन्।
धर्मस्थानशतच्छलेन विदधे धर्मस्य वर्षीयसः
संचाराय शिलाकलापपदवीं श्रीवस्तुपाल स्फुटम् ॥

अम्भोजेषु मरालमण्डलरुचो डिण्डीरपिण्डत्विषः
कासारेषु पयोधिरोधसि लुठन्निर्णिक्तमुक्ताश्रियः।
ज्योत्स्नाभाः कुमुदाकरेषु सदनोद्यानेषु पुष्पोल्बणाः
स्फूर्त्तिं कामिव वस्तुपाल कृतिनः कुर्वन्ति नो कीर्त्तयः ॥

देव स्वर्नाथ कष्टं ननु क इव भवान्नन्दनोद्यानपालः
खेदस्तत्कोऽद्य केनाप्यहह हृतहृतः काननात्कल्पवृक्षः।
हुं मा वादीस्तदेतत्किमपि करुणया मानवानां मयैव
प्रीत्यादिष्टोऽयमूर्व्यास्तिलकयति तलं वस्तुपालच्छलेन ॥

श्रीमन्त्रीश्वरवस्तुपालयशसामुच्चावचैर्वीचिभिः
सर्वस्मिन्नपि लम्भिते धवलतां कल्लोलिनीमण्डले।
गङ्गेयमिति प्रतीतिविकलास्ताम्यन्ति कामं भुवि
श्राम्यन्तस्तनुसादमन्दितमुदो मन्दाकिनीयात्रिकाः ॥

वक्त्रं निर्वासनाज्ञानयनपथगतं यस्य दारिद्यदस्यो-
र्दृष्टिः पीयूषवृष्टिः प्रणयिषु परितः पेतुषी संप्रसादम्।

प्रेमालापस्तु कोऽपि स्फुरदसमपरब्रह्मसंवादवेदी
नेदीयान्वस्तुपालः स खलु यदि तदा को न भाग्यैकभूतिः ॥
साक्षाद्ब्रह्मपरं धरागतमिव श्रेयो विवर्त्तैः सतां
तेजःपाल इति प्रसिद्धमहिमा तस्यानुजन्मा जयी।
यो धत्ते न दशां कदापि कलितावद्यामविद्यामयीं
यं चोपास्य परिस्पृशन्ति कृतिनः सद्यः परां निर्वृतिम् ॥
आकृष्टे कमलाकुलस्य कुदशारम्भस्य संस्तम्भनं
वश्यत्वं जगदाशयस्य यशसा मासान्तनिर्वासनम्।
मोहः शत्रुपराक्रमस्य मृतिरप्यन्याय दस्योरिति
स्वैरं षड्विधकर्मनिर्मितमया मन्त्रोऽस्य मन्त्रीशितुः ॥
एते मलधारिनरेन्द्रसूरिणाम्।
स्तम्भतीर्थेऽत्र कायस्थवंशे वाजडनन्दनः।
प्रशस्तिमेतामलिखज्जैत्रसिंहध्रुवः सुधीः ॥
हरिमण्डप नं० नेयं २ श्रीवस्तुपालप्रभोः प्रशस्तिरियं निष्पन्ना ॥
मङ्गलं महाश्रीः ॥
(गिरनार इन्स्क्रिप्शन्स् नं० २ । २६-२७)

---

(१७२)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थः पञ्चमः शिलालेखः।

ये दुज्जयन्तं.................................जयाभूप्रजाकल्याणा।
स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ. श्रीचण्डपालात्मज ठ. श्रीचण्डप्रसादाङ्गज ठ. श्रीसोमतनुज ठ. श्रीआशाराजनन्दनस्य ठ. श्रीकुमारदेवीकुक्षिसंभूतस्य ठ. श्रीलुणिग महं० श्रीमालदेवयोरनुजस्य महं० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे महं० श्रीललितादेवीकुक्षिसरोवरराजहंसायमाने महं० श्रीजयन्तसिंहे सं० ७८ वर्षपूर्वं स्तम्भतीर्थे

मुद्राव्यापारान्व्यापृण्वति सति सं० ७७ वर्षे **शत्रुंजयोज्जयन्त**प्रभृतिमहातीर्थयात्रोत्सवप्रसादाविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन **चौलुक्य**कुलनभस्तलप्रकाशनैकमार्त्तण्डमहाराजाधिराजश्री**लवणप्रसाद**देवसुतमहाराजश्री**वीरधवलदेव**प्रीतिप्रतिपन्नापत्येन महामात्यश्री**वस्तुपालेन** तथानुजेन सं० ७६ वर्षपूर्वं **गुर्जर**मण्डले **धवलक्क**प्रमुखनगरेषु मुद्राव्यापारं व्यापृण्वता महं० श्री**तेजःपालेन** च श्री**शत्रुंजयार्बुदाचल**प्रभृतिमहातीर्थेषु श्रीम**दणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्क**प्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः। तथा सचिवेश्वरश्री**वस्तुपाले**नेह स्वयं निर्मापितश्री**शत्रुंजयमहातीर्थावतार**श्रीमदातीर्थंकरश्री**ऋषभदेवस्तम्भनकपुरावतार**श्री**पार्श्वनाथदेवसत्यपुरावतार**श्री**महावीरदेवप्रशस्तिसहितकश्मीरावतार**श्रीसरस्वतीमूर्तिकुलिकाचतुष्टयजिनयुगलाम्बावलोकनाशाम्ब**प्रद्युम्नशिखरेषु** श्रीनेमिनाथदेवालंकृतदेवकुलिकाचतुष्टयतुरगाधिरूढस्वपिता महं० श्री**सोम**निजपितृ ठ. श्री**आशाराज**मूर्तिद्वयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्घाटनकस्तम्भश्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीम**दुज्जयन्त**महातीर्थे आत्मनस्तथा स्वधर्मचारिण्याः **प्राग्वाट**जातीय ठ. श्री**कन्हड**पुत्र्याः ठ. **राणु**कुक्षिसंभूताया महं० श्री**ललितादेव्याः** पुण्याभिवृद्धये श्री**नागेन्द्र**गच्छे भट्टारकश्री**महेन्द्रसूरि**संताने शिष्यश्री**शान्तिसूरि**शिष्यश्री**आणन्दसूरि**श्री**अमरसूरि**पदे भट्टारकश्री**हरिभद्रसूरि**पट्टालंकारप्रभुश्री**विजयसेनसूरि**प्रतिष्ठितश्री**अजितनाथदेवा**दिविंशतितीर्थंकरालंकृतोऽयमभिनवः समण्डपः श्रीसंमेतमहातीर्थावतारप्रासादः कारितः।

स श्रीजिनाधिपतिधर्मधुराधुरीणः
श्लाघास्पदं कथमिवास्तु न **वस्तुपालः**।
श्रीशारदासुकृतकीर्तिनयादिवेण्याः
पुण्यः परिस्फुरति जङ्गमसंगमो यः॥

विभुता विक्रमविद्या विदग्धता वित्तवितरणविवेकैः।
यः सप्तभिर्विकारैः कलितोऽपि बभार न विकारम् ॥

यस्य भूः किमसावस्तु वस्तुपालसुतः सदा।
नावर्णनीयावप्येतौ धर्मकर्मकृतौ कृतौ ॥

कस्यापि कविता नास्ति विनास्य हृदये सुखम्।
वास्तवं वस्तुपालस्य पश्यामस्तद्वयं च यम् ॥

दुर्गः स्वर्गगिरिः सकल्पतरुभिर्भेजे न चक्षुःपथे
तस्थौ कामगवी जगाम जलधेरन्तः स चिन्तामणिः।
कालेऽस्मिन्नवलोक्य यस्य करुणं तिष्ठेत कोऽन्यः स्वतः
पुण्यः सोऽस्तु न वस्तुपालसुकृती दानैकवीरः कथम् ॥

सोऽयं मन्त्री गुरुरतितरामुद्धरन्धर्मभारं
श्लाघाभूमिं नयति न कथं वस्तुपालः सहेलम्।
तेजःपालः स्वबलधवलः सर्वकर्मीणबुद्धि-
र्द्वैतीयीकः कलयतितरां यस्य धौरेयकत्वम् ॥

एतस्मिन्वसुधासुधाजलधरे श्रीवस्तुपाले जग-
ज्जीवातौ सितयोच्चयैर्नवनवैर्नक्तं दिवं वर्षति।
आस्वातन्यजनाघनोज्झितशशीज्योत्स्नाच्छवलगद्गुणो-
द्भूतैरद्य.. ॥

लक्ष्मीर्मन्थाचलेन्द्रभ्रमणपरिचयादेव पारिप्लवेयं
भ्रूभृङ्गस्यैव भङ्गाच्चकितमृगदृशां प्रेमनस्थेतरस्य।
आयुर्निश्वासवायुप्रणयपरतयैवेवमस्थैर्यदुःस्थं
स्थास्नुर्धर्मोऽयमेकः परमितिहृदये वस्तुपालेन मेने ॥

तेजःपालस्य विष्णोश्च कः स्वरूपं निरूपयेत्।
स्थितं जगत्रयीं पातुं यदा यो वरकन्धरे ॥

ललितादेवीनाम्ना सधर्मिणी वस्तुपालस्य।
अस्यामनिरस्तनयस्तनयोऽयं जयन्तसिंहाख्यः ॥

दृष्ट्वा वपुश्च वृ⋯⋯च परस्परविरोधिनी ।
विवादा⋯⋯**जैत्रसिंह**स्तारुण्यवाद्रि(?)कः ॥
कृतिरियं **मलधारिश्रीसरचन्द्रसूरी**णाम् ॥
स्तम्भतीर्थेऽत्र कायस्थवंशे **वाजड**नन्दनः ।
प्रशस्तिमेतामलिखज्**जैत्रसिंहः**ध्रुवः सुधीः ॥
वाडहस्य तनूजेन **सूत्रधारे**ण धीमता ।
एषा **कुमारसिंहे**न समुत्कीर्णा प्रयत्नतः ॥
श्रीनेमेस्त्रिजगद्भर्तुरम्बायाश्च प्रसादतः ।
वस्तुपालान्वयस्यास्तु प्रशस्तिः स्वस्तिशालिनी ॥

(गिरनार इन्स्क्रिप्शन्स् नं० २ । २७–२९)

---

(१७३)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थः षष्ठः शिलालेखः ।

संमेताद्रिशिरःकिरीटमणयः स्मेरस्मराहंकृति-
ध्वंसोल्लासितकीर्तयः शिवपुरप्राकारतारश्रियः ।
आनत्यश्रितसंविदादिविलसद्रत्नौघरत्नाकराः
कल्याणावलिहेतवः प्रतिकलं ते सन्तु वस्तीर्थपाः ॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण सुदी १० बुधे श्री**मदणहि-लपुर**वास्तव्यप्राग्वाटकुलालंकरणश्री**चण्डपा**लात्मज ठ. श्री**चण्डप्रसा-दा**ङ्गज ठ. श्री**सोम**तनूज ठ. श्री**आशाराज**नन्दनस्य ठ. श्री**कुमारदेवी**-कुक्षिसंभूतस्य ठ. श्री**लुणिग** महं० श्री**मालदेव**योरनुजस्य महं० श्री**ल-लितादेवी**कुक्षिसरोवरराजहंसायमाने महं० श्री**जयन्तसिंहे** सं० ७९ वर्षपूर्वं **स्तम्भतीर्थ**मुद्राव्यापारान् व्यापृण्वति सति सं० ७७ वर्षे श्री**शत्रुं-जयो**ज्**जयन्त**प्रभृतिमहातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसा-दासादितसंघाधिपत्येन **चौलुक्य**कुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधि-

राजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यस-र्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारान् व्यापृण्वता महं० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथा अन्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः । तथा श्रीशारदाप्रतिपन्नपुत्रसचीवेश्वरश्रीवस्तुपालेन स्वसधर्मचारिण्याः प्राग्वाटजातीय ठ. श्रीकान्हडपुत्र्याः ठ. राणुकुक्षिसंभूताया महं० श्रीललितादेव्यास्तथा आत्मनः पुण्याभिवृद्धये इह स्वयं निर्मापितश्रीशत्रुंजयमहातीर्थावतार श्रीमदादितीर्थंकर श्रीऋषभदेवस्तम्भनकपुरावतार श्रीपार्श्वदेवसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहित काश्मीरावतारश्रीसरस्वतीमूर्तिदेवकुलिकाचतुष्टयजिनयुगल अम्बावलोकनाशाम्ब प्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालंकृत देवकुलिकाचतुष्टयतुरगाधिरूढ निजपितामह ठ. श्रीसोमस्वपितृ ठ. आशाराजमूर्तिद्वितीयचारुतोरणत्रय श्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्धाटनकस्तम्भ श्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसंताने शिष्यश्रीशान्तिसूरिशिष्य श्रीआनन्दसूरि श्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालंकरणप्रभु श्रीविजयसेनसूरिप्रतिष्ठित श्रीमदजितनाथदेवप्रमुखविंशतितीर्थंकरालंकृतोऽयमभिनवः समण्डपः श्रीसंमेतावतारमहातीर्थे प्रासादः कारितः।

मुष्णाति प्रसभं वसु द्विजपतेर्गौरीगुरुं लङ्घय-
　न्नो धत्ते परलोकतो भयमहो हंसापलापे कृती ।
उच्चैरास्तिकचक्रवालमुकुटश्रीवस्तुपाल स्फुटं
　भेजे नास्तिकतामयं तव यशःपूरः कुतस्त्यामिति ॥

कोपाटोपपरैः परैश्चलचमूरङ्गत्तुरङ्गक्षत-

क्षोणीक्षोदवशादशेषजलधिः श्रीस्तम्भतीर्थे पुरे ।
स्वेदाम्भस्तटिनीघटाघटनया श्रीवस्तुपाले स्फुर-
त्तेजस्तिग्मगभस्तितप्ततनुभिस्तैरेव संपूरितः ॥
दिग्यात्रोत्सववीरवीरधवलक्षोणीधवाध्यासितं
प्राज्यं राज्यरथस्य भारमभितः स्कन्धे दधल्लीलया ।
भाति भ्रातरि दक्षिणे समगुणे श्रीवस्तुपालः कथं
न श्लाघ्यः स्वयमश्वराजतनुजः कामं स वामस्थितिः ॥
लावण्याङ्ग इति द्युतिव्यतिकरैः सत्याभिधानोऽभव-
द्भ्राता यस्य निशानिशान्तविकसच्चन्द्रप्रकाशाननः ।
शङ्के शंकरकोपसंभ्रमभरादासीदनङ्गस्मरः
साक्षादङ्गमयोऽयमित्यपहृतः स्वर्गाङ्गनाभिर्लघु ॥
रक्तः सद्गतिभावभाजि चरणे श्रीमल्लदेवोऽपरो
यद्भ्राता परमेष्ठिवाहनतया प्राप्तः प्रतिष्ठां पराम् ।
खेलन्निर्मलमानसे न समयं क्वापि श्रयन्पङ्किलं
विश्वे राजति राजहंस इव यः संशुद्धपक्षद्वयः ॥
सोऽयं तस्य सुधारहस्यकवितानिष्ठः कनिष्ठः कृती
बन्धुर्बन्धुरबुद्धिबोधमधुरः श्रीवस्तुपालाभिधः ।
ज्ञानाम्भोरुहकोटरे भ्रमरतां सारङ्गसाम्यं यशः
सोमे सौरितुलां च यस्य महिमक्षीरोदधौ स्वं दधौ ॥
इन्दुर्बिन्दुरपां सुरेश्वरसरिड्डिण्डीरपिण्डः पति-
र्भासां विद्रुमकन्दलः किल विभुः श्रीवत्सलक्ष्मा नभः ।
कैलाशत्रिदशेभशंभुहिमवत्प्रायास्तु मुक्ताफल-
स्तोमः कोमलवालुकास्य च यशःक्षीरोदधौ कौमुदी ॥
हस्ताग्रन्यस्तसारस्वतरसरसनप्राप्तमाहात्म्यलक्ष्मी-
स्तेजःपालस्ततोऽसौ जयति वसुभरैः पूरयन्दक्षिणाशाम् ॥
यद्बुद्धिः कलिपभ·········(?)द्विपगहनपरक्षोणिभृद्बुद्धिसंप-
ल्लोपामुद्राधिपस्य स्फुरति लसदिनस्फारसंचारहेतुः ॥

पुण्यश्रीर्भुवि मल्लदेवतनयोऽभूत्पुण्यसिंहो यशो-
वर्यः स्फूर्जति जैत्रसिंह इति तु श्रीवस्तुपालात्मजः ।
तेजःपालसुतस्त्वसौ विजयते लावण्यसिंहः स्वयं
यैर्विश्वे भवदेकपादपि कलौ धर्मश्चतुष्पादयम् ॥

एते श्रीनागेन्द्रगच्छे भट्टारकश्रीउदयप्रभसूरीणाम् ।

स्तम्भतीर्थेऽत्र कायस्थवंशे वाजडनन्दनः ।
प्रशस्तिमेतामलिखज्जैत्रसिंहध्रुवः सुधीः ॥
वाहडस्य तनूजेन सूत्रधारेण धीमता ।
एषा कुमारसिंहेन समुत्कीर्णा प्रयत्नतः ॥
श्रीनेमेस्त्रिजगद्भर्तुरम्बायाश्च प्रसादतः ।
वस्तुपालान्वयस्यास्ति प्रशस्तिः स्वस्तिशालिनी ॥

श्रीवस्तुपालप्रभोः प्रशस्तिरियं निष्पन्ना । शुभं भवतु ॥

(गिरनार इन्स्क्रिप्शन्स्-नं० २ । २९-३०)

116